






सं १९८८ ३ व

१२५ पत्रानी



ॐस्वस्तिश्रीगणेशायनमः ॐनमःशिवाय ॐ
श्रीगुरवेनमः ॐजगद्व्यावेनोभ्रमणपटुकौ।
विश्ववनितौ जगद्धाताशीलौज्ञयनिरतसाहित्य
वरदौ रथांगेमन्त्रैहोरविशाशिक्षणाएज्वलदृ।
शौ मयिस्यातांरक्तापरवशधियोसद्गुरुमयौ ।
यन्नित्यंज्योतिषांज्योतिर्जयत्येकमनुत्तमं नत
त्रभासयतेसूर्योनशशांकोनतारकाः विमर्शरूपि
णीशक्तिरस्यविश्वगुरोःपरा परापरिस्फुरतिसं
कापिनानानामातृरूपिणी। पश्यंत्यादिक्रमादे
जातौप्रभुश्रेतरात्मना तेत्रावतारंतन्वातेसर्वज्ञानु
जिघृक्षया तद्धामकेष्ठोरेतंत्रेसूचितार्थान्परापरा
न् व्यक्तीकर्तुंप्रयातेतयोगिनीहृदयेभना मातृषी
हृदयंमस्तौवत्तिनोकोपितत्वतः योगिनीहृदयंज्ञा
तुंकःसमर्थःशिवंविना अनन्योद्घाटितेदिव्याग
मकोशगृहांतरे उद्घात्यतेमयेदानीमहार्थोरहस्य
तांत्रयैः तदनेकार्थसंदर्भनानासंकेतसंकुलं वि
वृणोम्यमृतानंदःशिवयोरेवशासनात् अन्यथा
नादिसंसारेकेनेदंव्याकृतंपुरा तदावसंतिसंतःकिं

किंवानात्रप्रयोजनं शिवादिगुरुपर्यंतपारम्पर्यक्रमा
गतं एतज्ज्ञानंमयालब्धमक्रमाणामगोचरं ॥ इहखे
लभगवान्प्रकाशमूर्तिः परमशिवास्वात्मानंविमर्शां
शेनविभाव्यपश्यंत्यादिक्रमात्स्पष्टेति । शिवएवाहं
वैखरीपर्यंतंव्याप्त्वाविमर्शांशेनपृष्टवानितियावत्
उवाचेतिलिण्नमपुरुषस्यैकवचनंभूतत्वेचवक्तव्यस्य
सदातनत्वात् अनघनत्वमकालकलितत्वात् परोक्ष
त्वमनिंद्रियगोचरत्वात् अनेनश्रीभैरवउवाचेत्येतदा
पिव्याख्यातम् प्रकाशात्मकः परमशिवोहमेवविश्वानु
ग्रहपरः परापश्यंतीमध्यमावैखरीक्रमेणव्याप्त्यवि
मर्शांशेनपृष्टाभूत्वा प्रकाशांशेनप्रतिवचनदाना
पिसन् तंत्रंसमववतारयामीत्यर्थः तदुक्तंश्रीमहास्व
च्छंदे गुरुशिष्यपदेस्थित्वास्वयंदेवःसदाशिवः पूर्वो
त्तरपदैर्वाक्यैस्तंत्रंसमवतारयदिति ॥

श्रीदेव्युवाच ॐ देवदेवमहादेवपरि
पूर्णप्रथामय वामकेश्वरतंत्रेस्मिन्न
ज्ञातार्थाप्यनेकशः तांस्तानर्था ।
नशेषेणवक्तुमर्हसिभैरवेति ॥

यो॰ हृ॰ टी॰ १ 2

विश्वस्य भरणाद्धारणाद्भासनेनत्वात् स्थितिसंहारसृष्टि।
कारीभैरवः देवदेवेति देवाद्योतनात्मानो रव्यादय
स्तेषां देवः प्रकाशकः महादेव महाप्रकाशात्मन्
अयमर्थः तव महाप्रकाशात्मकत्वात् त्वमेव वि।
श्वं भासयसि न त्वां कोपि भासयितुमलमिति तत्रश्रु
तिः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति
कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा स
र्वमिदं विभातीति परिपूर्णप्रथामय प्रथात्मानं परि
पूर्णा प्रथा विश्वविषयिणी त्वामिल्लन्मय तद्रूपतवस
र्वज्ञात्वा त्वमेव सर्वान्बोधयितुमर्हसि न त्वां कोपि बो
धयितुमलमिति अतो वामकेश्वरतंत्रे च तत्त्वज्ञानीणा
स्त्वज्ञातार्था अविदितार्था वहवः संतीत्यर्थः तांस्तानशे
षेण साकल्येन वक्तुं व्यक्तीकर्तुमर्हसि मम विमर्शपद
वीं प्रापयितुमर्हसीत्यर्थः प्रकाशांशेन प्रतिवदति ॥

श्रीईश्वरउवाच शृणु देवि महागुह्यं।
योगिनीहृदयं परम् त्वत्प्रीत्याकथ।
याम्यद्यगोप्तव्यंतद्विशेषतइति ॥

देवि विश्वसर्जनादिव्यवहारक्रीडापरे हे विमर्शविग्र

रूपं महागुह्यं लोके गोपनीयं यदस्य यावत्तावत्का
लमतीन्द्रियगोचरं भवति अस्य तत्सर्वदा मनोवागिं
द्रियातीतत्वात् महागुह्यत्वं योगिनीहृदयं योगिन्याः
स्वसंविदो हृदयमिवाविभावकत्वमित्वाद्धृदयम् अत्र
तु योगो नाम समवस्तु समवायसंबंधस्तेन भासत इति
योगिनी तदुक्तमभियुक्तैः देशकालपदार्थात्मा यद्यद
स्तु यथा यथा तत्तद्रूपेण या भाति तां श्रये संविदं कलामि
ति परमरहस्यं सर्वत्तानोत्तरत्वात् अत एव वक्ष्यति ॥

एतज्ज्ञात्वा वरारोहे सद्यः खे
चरतां व्रजेदिति ॥

एतद्गुह्यविमर्शपदवीं प्रापयत्यत्यीत्यातदेकरहस्य
हेतोः कथयामि अद्य पुरा न कस्यचिदाख्यातमिति रह
स्यत्वात् अतो विशेषतो गोपितव्यं आत्माहंभावभावन
याभावितव्यमित्यर्थः अत्यंतगोपनीयतामेव द्रढयित
माह ॥

कर्णात्कर्णोपदेशेन संप्रा
प्तमवनीतलमिति

कर्णात्कर्मणिस्वर्लोपे पंचमी कर्णाश्राव्य पुनः कर्णप्रवोप
देशक्रमेणैव पारंपर्यक्रमेण संप्राप्तमादिकर्मणि क्तः अ
वनीतलशब्देन तत्रस्थामनुष्यालक्ष्यन्ते यथा मंचाः क्रोशं
तीति तेनायमर्थः संपद्यते दिव्यसिद्धमानवक्रमेणातिरह
स्यत्वात्कस्मादप्यगतत्वात्कर्णपरंपरामात्रगम्यमेवेदमिति
अत्रमानवग्रहणं सिद्धदिव्यानामुपलक्षणार्थं अनेहस्यानये
दमित्याह ॥

नेदेयंपरशिष्येभ्योनास्तिकेभ्योनचैवसू
रि नशुश्रूषारतानांच नैवान
र्थप्रदायिनामिति ॥

परशिष्येभ्य इति परशिष्याः एवकेयेभ्योनदेयमित्य
तआह येविद्यान्तरेषु पारंपर्येणाधिगतनाशेषरहस्यपर
मार्था अप्राप्तसंस्पर्शाभिषेकाश्चते परशिष्यास्तेभ्योदेयं
तैरपिनग्राह्यं येनेदृशाः नतेपरशिष्यास्तेभ्योदेयंतैर
पिग्राह्यं गंधलुब्धोयथाभृंगः पुष्पात्पुष्पांतरंव्रजेत् ज्ञा
नलुब्धस्तथाशिष्यो गुरोर्गुर्वन्तरंव्रजेदिति वचनात्तेपर
शिष्याः स्पर्शाभिषेककर्तायोगुरुस्तस्यैवपादुकामितिव
चनात् नास्तिकेभ्योनास्तिपरलोक इतियोमन्वतेतेनास्ति
काः श्रद्धाविहीनाधनधान्याद्यपेक्षायातेषांकविमुत्पाद्य

नदेयमित्यर्थः तदुक्तं श्रीभगवद्गीतायां नबुद्धिभेदंज
नयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणिविद्वान्यु
क्तः समाचरन्निति नाशुश्रूषारतानांचयेशुश्रूषालसा
लेभ्योनदेयंवानर्थप्रदायिनां शुश्रूषालसानामपि।
यत्नेचवर्तंतितेभ्योदेयंशुश्रूषाबालसाश्चयत्ने न
वर्तंतितेभ्योनदेयमित्यर्थः तदुक्तं गुरुशुश्रूषया
वापिपुष्कलेनधनेनवा अथवाविद्ययाविद्याचतुर्थीनो
पपद्यतइति । परीक्षार्हायदेयमित्याह ॥

परीक्षितायदातव्यंवत्सरार्धोषितायवेति ।

परशिष्यत्वादिदोषपरीक्षणं वत्सरार्धेनसहवासेन।
कर्तुंशक्यते गुरोर्विवेकितत्वात् उक्तार्थमेवदृढयंशिष्य
प्रवर्तयेफलमाह ॥

एतज्ज्ञानावरारोहःसद्यःखेचरतांव्रजेदिति ।

अस्यात्महार्थत्वात्परीक्षितायदेयं एतस्यपरिज्ञानेनैव
शिष्यः खेचरतांखेपरमव्योम्निचरतीतिखेचरःपरशिवः
तदुक्तंविज्ञानगगनचंद्रिकायां दृक्क्रियात्मशशिभानुमध्यगः
खेचरत्वलहरीक्रियामयः यत्तदूर्ध्वशिखरेपरंनभस्तत्पद
र्शीयशिवत्वमंबिकेइति सद्यस्तत्त्वंव्रजेज्जीवन्मुक्तोभवेत्।

दित्यर्थः तदुक्तं वेदरहस्ये तस्यैवात्मापदवित्तं वि
त्वानकर्मणालिप्यते पातकेनेति शास्त्रमारभते ॥

चक्रसंकेतको मंत्रपूजासंकेतकस्तथा त्रि
विधः त्रिपुरादेव्याः संकेतः परमेश्वरीति ।

संकेतवत्संकेतः संकेतः समयः यथाकृतसमयौ का
मिनीकामकौ यत्रक्वापि निवसतः एवमस्मिंशिवाति
चक्रसंकेतको मंत्रसंकेतकः पूजासंकेतकश्च एवं त्रि।
विधः संकेतः त्रिपुरादेव्या यामतत्त्वपीठलिंगमातृका
दिभ्यस्त्रिभ्योपिं पुरयाविद्यते सादेवी प्रकाशविमर्शसाम
रस्यरूपिणी परा अस्यास्त्रिविधः संकेतः परमेश्वरीति प
रमोत्कृष्टमिंद्रियादिभिरपि परिपाल्यमानमैश्वर्यमास्ता
यस्याः तदुक्तं वेदरहस्ये भीषास्माद्वातः पवते भीषोदे
ति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचमः
इति एतज्ज्ञानविहीनस्य फलवैपरीत्यमाह ।

यावदेतन्न जानाति संकेतत्रयमुत्तमं न ता
वत्त्रिपुराचक्रे परमात्ताधरे भवेदिति

यथावदेतदुत्तमाण संकेतत्रयं यो जानाति सतावत्त्रि

प्रायाः परायाः स्वसंविद्रूपके मातृमानमेयलक्षणे तत्त्व
समूहे परमाज्ञाधरो न भवेत् आज्ञानामनिग्रहानुग्रहसाम
र्थ्यं तद्दातामपि लोके ह्यस्ति तदुच्यते परमेति परमा सर्वलोके
ष्वप्रतिहता परमेश्वरस्यैव परमाज्ञाधरः परमेश्वरो भवेत्
येनैतद्विजानाति तद्भावं व्रजेदित्यन्वयव्यतिरेकसिद्धिमि
त्यर्थः अत्रैतत्प्रयोजनकीर्तनमधिकारिविषयसंबंधाना
मप्युपलक्षणम् मुमुक्षुरधिकारी स्वसंविद्देवताविषयः
मोक्षः प्रयोजनं प्रतिपाद्यप्रतिपादकभावः संबंधः
अत्रादौ चक्रसंकेतं वक्तुमुपक्रमते ॥

तच्छक्तिपंचकस्यास्य लयेनाग्निवसुद्वयं पं
चशक्तिचतुर्वह्निसंयोगाच्चक्रसंभवः

तच्चक्रं सृष्टिरूपेण शक्तिपंचकं स्वाभिमुखाग्रत्रिकोणं श
क्तिरुच्यते तादृशशक्तिपंचकं लयेनाग्निवसुद्वयं लयेन
संहाररूपेण पराङ्मुखाग्रत्रिकोणमग्निरुच्यते तद्वसुद्वयं
एवं पंचशक्तीनां चतुर्वह्नीनां संयोगात् सम्यग्योगः संयोगः
शक्त्या शक्तिं विनिर्भिद्येत्यादि चतुःशतीशास्त्रोक्तरीत्या ग्रं
थिभेदक्रमेण मम त्रिकोणशक्त्यग्रं समरेखं यथा भव
ति तथा लेखनेन संयोगात्तस्माच्चक्रस्य संभवो भवति सा
मान्यचक्रसमुदायं संपाद्येदानीमवयवशः संभवं प्रति
जानीते ।

एतस्य चक्रावतारं तु कथयामि तवानघे इति

एतस्य श्रीमहात्रिपुरसुन्दर्याश्चक्रस्य पूजाचक्रस्यावतारं अ-
वतारो नाम लोके सौधाग्रन्तप्रदेशान्निम्नदेशप्राप्तिः अत्र
तु विश्वोत्तरात्मकाशात्मनः परमशिवात्तत्क्रमेणाप्रसर-
त्तादृशं चक्राकारमनघे परशिष्यत्वादिदोषरहिते तवप्र-
काशात्मनो सर्वांशभूतायाः विमर्शशक्तेः कथयामि क-
थमक्रियात्परमशिवात्तन्मयं चक्रं संभवीत्याह ॥

**यदा सा परमा शक्तिः स्वेच्छया विश्वरूपिणी स्फु-
रत्तामात्मनः पश्येत्तदा चक्रस्य संभव इति ।**

यदा यस्मिन्काले प्राणिनामदृष्टवशात्स्वान्तः संहृतविश्वा-
सिसृक्षया सैव पराशक्तिविमर्शरूपिणी स्वेच्छया विश्वरूपि-
णी विश्वं सृजति शिवस्तटस्थ उदासीन इत्यर्थः अत्र श्रुतिः
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्य-
ते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविके ज्ञानबलक्रि-
याबले इति ज्ञानावतारेप्युक्तं स्वेच्छयैव जगत्सर्वं निगिर-
त्युद्गिरत्यपि इति विश्वसर्जनमेव पराशक्तेः स्फुरत्ता सृष्टि-
रूपत्वात् तदा षट्त्रिंशत्तत्त्वात्मकविश्वसृष्टिकाले चक्र-
स्य परदेवताचक्रस्य विश्वमयस्य संभवः एतदेवाह ।

शून्याकाराद्विसर्गान्ताद्बिंदुप्रस्पंदसंवि
दः प्रसारपरमार्थतास्फुरत्तालहरी
युतात् प्रसृतंविषलहरीस्थानं।
मातृत्रयान्वितम् वैयवंवक्रमिति

शून्यस्याभावकारश्चेति शून्याकारः शून्यत्वं पुनरत्र
त्रनिरस्तनिखिलप्रपंचत्वात् अतएव परमशिवः तदु
क्तं संकेतपद्धत्यां अकारः सर्ववर्णाग्र्यः प्रकाशः पर
मःशिव इति अत्र श्रुतिः अः इति ब्रह्मेति विसर्गान्तात्
विसर्गोन्ते यस्य तस्माद्विसर्गान्ताद्बिंदुप्रस्पंदसंविदः बिं
दुरग्नीषोमात्मकः कामाख्यो रविः शिवशक्तिसामर
स्यात्मवाच्यजातः तदुक्तं चिद्गगनचंद्रिकायां भोक्तृभो
गमयोगविसर्गगो देवि मां बिंदुदयेहफांदशां अर्पयन्न
नलसोममिश्रणास्तद्विमर्शोऽहमात्मजृंभणा इति शि
वशक्तिसामरस्यरूपकामाख्यसंस्कारः प्रस्पंदः दहने
दुरूपमितशोणबिंदुद्वयात्मिकः अकारहकारसामर
स्यबिंदोः प्रस्पंदात् सितशोणबिंदुयुगलात् संविच्चि।
न्मयी दहनेंदुरूपा कला जायत इत्यर्थः प्रसारपरमार्थ

यो॰
हृ॰ टी॰
६
6

त्वात्स्फुरत्ताल्लहरीयुक्तो स्फुरत्तायाविमर्शशक्तेः लहरी
बिंदुद्वयांतरालमिश्रितार्धकलारूपाख्यायुक्तात् प
वंभूतात्कामकलाक्षरात् प्रसृतं विश्वलहरीस्थानं मातृ
त्रयात्मकं वैंदवं चक्रं विश्वलहर्या वीचयः षट्त्रिंशत्तत्त्व
रूपास्तासां स्थानभूतत्वादिहतत्त्वान्मातृत्रयान्वितं पश्यंती
मध्यमावैखरीरूपं एवं तत्समष्टिरूपपरमात्मकसदाशि
वाख्य तुरीयबिंदोरुत्पन्नत्वाद्वैंदवं चक्रं मध्यत्रिकोणं प्र
स्तं एतदत्र वक्ष्यति आत्मनःस्फुरणं पश्येत्यादि वैखरीवि
श्वविग्रहे समतेन चक्रं कामकलारूपं प्रसारपरमार्थत्व
त्वेन कामकलाविलासेभ्यः सद्गुरुभिः प्रपंचितं स्फुटंशि
वशक्तिसमागमबीजांकुररूपिणी पराशक्तिः अणुतर
रूपानुत्तरविमर्शलिपिलक्षणविग्रहा भाति परशिवर।
विकरनिकरे प्रतिफलति विमर्शदर्पणे विशदे प्रतिरु।
चिरुचिरे कुड्ये चित्तमये निविशते महाबिंदुः चित्तमये
हंकारः सद्यवकाशाणीसमरसाकारः शिवशक्तिमिथु
नपिंडः कवलीकृतभुवनमंडलो जयति सितशोणबिंदुयु
गलं विविक्तशिवशक्तिसंकुचत्प्रसरं वागर्थसृष्टिहेतुः
परस्परानुप्रविष्टविस्पष्टं बिंदुरहंकारात्मा रविरेतन्मिथुन
समरसाकारः कामः कमनीयतया कला च दहनेंदुविग्रहौ

विंदुरिति कामकलाविद्यादेवीचक्रक्रमात्मिकासेयंविदि
तायेनसमुक्तो भवति महात्रिपुरसुंदरी रूपयति ॥

एकस्य त्रिरूपत्वं पुनर्भवेदिति

एकस्यत्रिकोणात्मनश्चक्रस्य पुनस्त्रिरूपत्वंभवेत् पुनः
शब्देन सर्वाङ्गस्यैव गुणांतरकथनेगम्यते इदमेवत्रि
कोणात्मकंभूयोपिशक्तित्वंरूपावह्नित्वंच संहारा
त्मनाप्रपद्यतत्त्रिधाभूदित्यर्थः एवंकृतेसति सवास
नेनवयोनिचक्रंनिष्पद्यतइत्याह ॥

धर्माधर्मौतथात्मानमस्मेयौतथाप्रमा न
वयोन्यात्मकमिदंचिदानंदघनंमहदिति

धर्माधर्मौ पुण्यपापे आत्मानः आत्मा अंतरात्मापरमात्मा
ज्ञानात्माचेतिचत्वारःमातृमेयौ माताजीवःमेयोग्राह्यवर्गः
प्रमात्ताभिः एवमेतन्नवधमयंनवयोन्यात्मकंचक्रं चिदा
नंदघनंचिद्वेतन्यकला आनंदोविश्वाहंतापरिणामरूपा।
भ्यांघनंवहिरंतर्निर्विड़ंयथालवणघनं महदितिदेशका
लाकारैरनाकलितंचिन्मयत्वात् प्रथमंत्रिकोणस्यपरंच

त्यादित्रितयरूपत्वात् तन्मयत्वंप्रतिपाद्य इदानींबाह्यचक्र
स्य वैखरीमयत्वात्तदुत्थितत्वात् तद्रूपत्वंचकथयति ॥

चक्रंनवात्मकमिदंनवधाभिन्नमंत्रकं

इत्यादि वामाद्यष्टभित्रयमित्यंतेन इदंचक्रंत्रिकोणत्रयरू
पेणनवात्मकंत्रैलोक्यमोहनादि नवचक्रात्मनासततनवधाभि
न्नमंत्रकं वक्ष्यमाणकएईत्यादिनवचक्रेश्वरीमंत्रनवकभेदवत्

वैंदवासनसंरूढसंवर्त्तानलचित्कलम्

वैंदवासनंदेवि महाविद्यात्मकसदाशिवासनंअत्रैववक्ष्य
ति सदाशिवासनंदेविमहाबिंदुमयंपरमिति शिवशक्त्योः
सदाशिवतत्त्वोपरिस्थितत्वात् वैंदवासनसंरूढत्वंसंवर्त्तान
लोलयानलः यत्रतत्त्वादिशिवपर्यंतंलीयते तदनुष्ठु
परूपंसकलवर्णाद्यभूतमनुत्तरम् प्रकाशात्मकंसं
वर्त्तानलः चिदेवकलाचित्कला विमर्शात्मिका सर्व
वर्णाभ्यंतरस्थार्धकला तदुक्तंसंकेतपद्धत्यां अकारः
सर्ववर्णाग्र्यःप्रकाशःपरमःशिवः हकारोंत्यकलारूपो
विमर्शाख्यःप्रकीर्तितइति ।

वैंदवासनसंहृत्फसंवर्तानलविक
लेयस्मिंस्तथैवत्रिकोणम् अंवि।
कारूपमेवैंदमष्टारस्यंस्वराहृतम्

शिवशक्तिसामरस्यरूपमहाविंदुमयमध्यचक्रोत्पन्नत्वा दे
विकारूपमष्टारस्यंत्रिकोणंसंदत्रयमुत्पन्नत्वा दष्टकोणस्थ
निष्टारस्यंस्वराहृतम् अकारादिविंदुतपंचदशस्वरैस्त्रिधाविभ
क्तैराकलितरेखात्रयं अः स्वरान्यांतमध्ये तद्रूमभियुक्तैः
विभाव्यवमहायज्ञसमरेखास्वरोदरमिति अयमर्थः इदमेव।
त्रिकोणचक्रंनवचक्रात्मनापरिणतं त्रिपुरादिनवचक्रेश्वरी
करस्थत्वादि तत्तन्मंत्रनवककलितमष्टकोणगतंषोडशस्व
राहृतमंविकाशांतासमरसरूपमहाविंदुमयसदाशिवा।
सनाहृत्फप्रकाशविमर्शात्मककामेश्वराकामेश्वर्याधिष्टि
तमिति उपचक्रंवासनमुत्पादयति ॥

नवत्रिकोणस्फुरतिप्रभारूपदशारकं श
क्त्यादिनवपर्यंतदशारस्फूर्तिकारणं भूत
तन्मात्रदशकप्रकाशालंबनत्वतइति।

नचवत्रिकोणानि च नवत्रिकोणानि त्रिकोणशब्देन त्रिकोणम
ष्टवैंदवं लक्ष्यते नवकोणानां वैंदवस्य च स्फुरिताः प्रतीयमा
नाः प्रभाः तद्रूपं दशारं यत्र यद्यथा परिणमते तत्तथा विधं श
क्तिरेफः तदुक्तं मत्स्यसिद्धांते रमाशक्तिबीजहारेवंद्वः शक्ति
र्महाशक्तिर्ब्रह्माणीकालिकादिकमिति शक्तिरेफस्यादिर्य
कारः शक्त्यादिवकारमारभ्य नवानां पर्यंतगः तकारस्तेषां द
शानां स्फूर्तिकारकं स्फूर्तिर्विमर्शः यकारादितकारांतदश
वर्णविमर्शकमित्यर्थः भूततन्मात्रमिति भूतानि पृथिव्य
प्तेजोवाय्वाकाशास्तन्मात्राः पंचगंधरूपरसस्पर्शशब्दास्तेषां।
दशानां प्रकाशादशानेषामालंबकत्वात् शिवात्मकत्वात्पृथि
व्यादीनां शक्त्यात्मकत्वाद्यकारादिवर्णानां तदुभयप्रकाश
विमर्शमयदशकोणवृत्तमिदं चक्रमित्यर्थः पृथिव्यादित।
कारांतवर्णदशकमयतांकथनेन प्रथमचक्रत्रयस्य स्थिति
रूपता द्योतिते। द्वितीयं दशारमाह।

द्विदशारस्फुरद्रूपं क्रोधीशादिदशार्णकम्

द्वितीयं दशारं द्विदशारं द्वितीयदशारं तयास्फुरंतो रूपं तर
ति रूपा इंद्रियार्थी दशाशा द्वारयोवचनादयस्य द्वितीयदशार
तयास्फुरंतो रूपायस्य तत्तथाविधं क्रोधीशाः ककारः कका

रादिदशवर्णवत् कोर्थः बैंदवत्रिकोणाष्टकोणचक्रेषु मध्य
स्थितप्रकाशविमर्शमयद्वीपद्वयदीपितेषु तद्दशकप्रभाछ्छा
यादशकद्वयमय यकारादिपृथिव्यादि ककारादिदशकद्व
यात्मकं दशारचक्रद्वयात्मना दृष्टमिति तत्र भूततन्मात्रदशक
प्रकाशालंबनत्वतःस्तत्रैवशब्दादीनामुक्तत्वात् पुनर्हि दशार
स्फुरद्रूपमित्यत्रापि रूपशब्देनापि कथ्यते इति मेवतन्मात्रपदेन
भूतसूक्ष्माणामनिंद्रियगोचराणां ग्रहणं रूपशब्देन भूतगुणाः
शब्दादयः श्रोत्रादिग्राह्यास्ते इति अतो विरोधः। चतुर्दशारमाह

चतुरस्रकप्रभारूपसंयुक्तपरिणामतः चतुर्द
शाररूपेण संवित्तिकरणात्मना ऐश्वर्या
दिजयंतानां परमार्थप्रथामयमिति ॥

चत्वारि चक्राणि बैंदवत्रिकोणाष्टकोणप्रथमदशाररूपाणि
तेषां प्रभास्वतरस्तो विप्रकृष्टत्वात् प्रभारूपमेव गम्यते यथा व
ह्वेर्वृत्तावनमिति नावयवभेदतस्त्र्यक्रभेदः तथा तस्रकप्रभा
चतुष्टयसंयुक्तस्य द्वितीयदशारस्य सन्निकृष्टत्वात् अवयवा
प्रतीतिः तत्प्रभाचतुष्टयसमेतद्वितीयदशारावयवचतुर्द
शाररूपेण संवित्तिकरणात्मना संवित्तिर्ज्ञानं संवित्तिशब्देन क्रि
यापि लक्ष्यते करणानीन्द्रियदशकं श्रोत्रादिकं वागादिकं च मनो

यो॰ हृ॰टी॰
९
9

बुद्ध्यहंकारचित्तानिचतुर्दशतदात्मनाएवचरीटकारः जयाभका
रः टकारादिठकारांतास्तत्तुर्दशवर्णास्तेषां परमार्थप्रथाकर
णभूताप्रथाविमर्शस्तन्मयंकोर्थः मध्यचक्रमेवत्रिकोणाष्टको
णद्विदशकोणक्रमेणश्रोत्रादिज्ञानेंद्रिय वागादिकर्मेंद्रिय
मनोबुद्ध्यहंकारचित्तात्मककरणचतुर्दशक टकारादिभका
रांतवर्णचतुर्दशकप्रकाशविमर्शमयचतुर्दशारूपेणपरि
णतमित्यर्थः त्रिकोणचक्रसांविकारूपमेवदमष्टारस्यम
णहूतमित्यत्रांविकारूपतामुक्का इदानीमष्टारादिचतुर्द।
शारपर्यंतस्यश्रीचक्रस्यरौद्रीरूपतामाह ॥

एवंशक्तानलाकारस्फुरद्रौद्रीप्रथामयमिति

एवमुक्तप्रकारेणशक्तानलाकारेणपंचशक्तिचतुर्वह्निरूपे
णस्फुरत्स्वरूपं द्विचत्वारिंशद्योन्यात्मकं रौद्रीप्रथामयं रौद्रीश
क्तिविस्फारविजृंभितमित्यर्थः । शिवचक्रमाह ॥

ज्येष्ठारूपचतुष्कोणंवामारूपभ्रमित्रयमिति

ज्येष्ठाशक्तिरूपाणिचतुष्कोणानिचतुष्कोष्ठानिचतुरस्राणिय
स्यतत् ज्येष्ठारूपचतुष्कोणंवामाशक्तिरूपं भ्रमित्रयंवृत्तत्रय

योस्य भ्रमित्रयगाहेन तदंतरालस्थितपद्मद्वयमपि लक्ष्यते अ
त्रैव वक्ष्यते वपद्मद्वयेनेति अत्र वामारूपभ्रमित्रयं ज्येष्ठारूपव
त्तकोणमिति पाठेऽयुक्तोपि अंबिकादिशक्तिपाठक्रमायाते
नयाज्येष्ठारूप वृत्तकोणं वामारूप भ्रमित्रयमित्युक्तदे
वेन पुनरस्यैव चक्रस्यावासनांतरमाह ॥

दिग्रंशांतस्त्रिकोणं च शांतातीताष्टकोणके शां
तेशादिदशारे च तथैव भुवनारकम् विद्या
केलाप्रभारूपदलाष्टकसमाहृते प्रतिष्ठाव
पुषा साष्टस्फुरद्युष्टदलांबुजम् निवृत्त्या
कारविलसत्त्वतुष्कोणविराजितमिति ॥

दिग्दशास्त्रिकलातन्मयमेतत्त्रिकोणं शांत्यतीत शांतिवि
द्याप्रतिष्ठा निवृत्तयो गगनादिपंचभूतकालास्तन्मयमेतच्च
क्रमित्यर्थः अवयवार्थस्त्वस्पष्ट एव अस्यैव चक्रस्य संहार।
क्रमेणवासनांतरमाह। त्रैलोक्यमोहनाद्येतीत्यादिकि।
याशेषमित्यंतेन ग्रंथलेशात्: पूर्वोक्तकामकलारूपत्वप्र
तिपादनप्रसंगपरिसमाप्तौ ॥

त्रैलोक्यमोहनाद्यैस्तु नवचक्रेश्वरीति

त्रैलोक्यमोहनाद्येत्वित्यादिशब्दात्सर्वाशापरिपूरकादिचक्रा
ण्युच्यन्ते तेषांनामान्युत्तरत्रवक्ष्यन्ति त्रैलोक्यमोहनाद्येतुन
वचक्रेजातावेकवचनम् त्रैलोक्यमोहनादेष्वित्यर्थः ॥

नादोबिंदुकलाज्येष्ठारौद्रीवामतथापरः विष।
घ्नीलहरीचैवसर्वानंदात्मकास्थिताइति ॥

नादादिसर्वानंदानवशक्तयस्त्रैलोक्यमोहनादिबैंदवान्तन
वचक्रेषुक्रमेणादिवसंतीत्यर्थः पदार्थःस्पष्टएवएवमंबि
कारूपमेवेत्यादिनाप्रकाशांशानामंबिकादीनांचक्राणांत्रि
कोणादि चतुरस्रान्तमयतावासनाप्युक्ता इदानींविमर्शांशा
नांशान्तादीनांचक्राणांचतुरस्रादिबैंदवान्तचक्रमयतावासना
माह ॥

निरंशोनादबिंदुश्चकलाचेच्छास्वरू
पकम् ज्येष्ठाज्ञानेक्रियाशेषमिति।

निरंशाशांताशक्तिःशांतायानिरंशत्वंचिद्रूपत्वात् तेननिरं
नादबिंदूद्वावपिशांताशक्तिमयानादबिंदुरूपंचतुरस्रत्रयषो
डशदलात्मकं चक्रद्वयंशांताशक्तिमयमित्यर्थः कलाचेच्छा
स्वरूपकंइच्छायाः स्वरूपंकलारूपमष्टदलपद्ममिच्छाशक्ति
मयमित्यर्थः ज्येष्ठाज्ञानेज्ञानशक्तिरेवज्येष्ठारूपंचतुर्दशारं

ज्ञानशक्तिमयमित्यर्थः क्रियाशैषरौद्रीवामाविषघ्नीलहरी
सर्वानंदेति शक्तिपंचकरूपं द्विदशारष्टकोणत्रिकोणवैंद
वाख्यचक्रपंचकं क्रियाशक्तिमयमित्यर्थः एवंचक्रस्यसृष्ट्या
कारादित्यारभ्य कामकलारूपतां प्रतिपाद्येदानीमुपसंहरति

इत्येवं त्रितयात्मकम् चक्रं कामक
लारूपप्रसारपरमार्थ्यतइति ॥

यद्यस्मात्प्रसृतं तत्तस्य परमार्थतः तद्रूपं चतत् यथामृत्पट
स्यसूत्रमयपण्यटः तंतवः पटस्तंतुरूपः पटः एवंकामकला
त्वरात्प्रसृतस्य चक्रस्य कामकलात्वं परमार्थतः तद्रूपं चेदंच
क्रमित्यर्थः पुनरस्यैव चक्रस्य प्रकाशांतरेणावासनांतरमाह ।
अकुले विषुसंज्ञे चेत्यादिना परमानंदपूर्णानित्यनेन ॥

अकुले विषुसंज्ञे च शाक्ते चक्रे तथा पुनः
नाभावनाहते शुद्धे लंबिकाग्रे भ्रुवोंतरे इंदौ
तदर्धरोधिन्यां नादे नादांते च पुनश्च शाक्तौ पुन
र्व्यापिकायां समनोन्मनगोचरे महाबिंदाविति

कुलादन्यद् अकुलं सुषुम्णामूले सहस्रदलकमलं नाम तद्

यो॰ पर्यष्टदलोर्ध्वस्थितषट्दलं कुलपद्मं तदूर्ध्वं स्वच्छंदसंग्रहे ब्र
हृ॰टी॰ यस्योर्ध्वं सुषुम्नायाः सहस्रदलसंपुटे रक्तं श्वेतं च साहस्रदल
११ स्थशक्तिभिर्युतम् ऊर्ध्वाधोमुखमीशानिकर्णिकाकेसरान्वि
तम् शक्तिरूपं महादेवि कुलाचलमयं शुभं पंकजद्वयमीशा।
नि स्थितं शाश्वतमव्ययं तयोर्मध्ये सुषुम्नान्तस्त्रिदशायाः पं
कजे शक्तिरूपं शिवाकारं सदाभ्यासनिजालयं तेषां रूपं त्व
मं चैव क्रमाद्वक्ष्ये शृणुष्वण गुदे मेढ्रान्तरे देवि पंचांगुलसमु
च्छ्रिते गुदमेकांगुलं मध्ये द्व्यंगुलविस्तारिणि तस्य मूले महा
योनिस्त्रिकोणाकाररूपिणी सुषुम्नायोनिमध्यस्था तस्या मू
ले महेश्वरि अधःपद्मं सहस्रान्तं कर्णिकाकेसरान्वितं तेजसं
रक्तवर्णं तद्दलस्थितिशक्तिभिः प्रतिकिंजल्कसंस्थाभिः
शक्तिभिः संवृतं प्रिये कर्णिकामध्यतो देवि कुलदेवी च सं।
स्थिता तत्पद्मोर्ध्वं सुषुम्नायां मध्ये त्वेकांगुलोपरि पद्ममष्टद
लैर्युक्तमष्टग्रंथिसमन्वितं रक्तं सकर्णिकोपेतं रक्तकिंजल्क
शोभितं शेषाग्रस्य त्रिशृंगी च ब्राह्मण्याद्यष्टभैरवैः अष्टपत्र
स्थितं ग्रंथिस्थिरवर्गादिशक्तिभिः तदन्यशक्तिभिश्चैव षोडश
स्थाभिः समावृतं तन्मध्ये कौलशक्त्या तु संवितं च स्मरेत् ततः
एकांगुलप्रमाणोर्ध्वषट्दलं कुलपंकजमिति ननु कुलाद
कुलं तत्किं न स्यादित्यत आह विषुमन्तेवेति विलग्यामोय

स्वभुमग्नातदंतर्गतत्रिंशत्संकजानि च व्याख्यवंति तत्सहस्र
दलकमलेवियत्सर्वाधारत्वात्ततोनाष्टदलकमलमङ्कलवि
त्यर्थः शाक्तेवह्नौवह्नौशाक्तेइतिव्याख्येयेनपठितंवह्निबि
लाधारः वह्निबिंबाधारत्वात् तदुक्तंस्वच्छंदसंग्रहे आधारपं
कजेपीतंवज्रकोणंत्रसुकेसरं भ्रयोसुवीतन्मध्येकुंडलीपरमे
श्वरि स्वयंभूमध्यगाचिंत्यावरदादिभिरावृता पार्थिवंपंक
जेह्येतत्तस्याधःपंकजेपरं तेजसंपरमेशानितन्मध्येमित
शक्तयः निष्कलापरमेशानिविद्युत्पुंजनिभाःस्मरेत् त
दूर्ध्वकर्णिकामध्येवह्निबिंबंतदूर्ध्वकम्

स्वर्णपीठंवतस्योर्ध्वेशाकिनीसंस्थितापिवे

शाक्तेशाकिलक्ष्हेरवातदूर्ध्वस्थितत्वात् शाक्तंस्वाधिष्ठाने तदु
क्तंस्वच्छंदसंग्रहे आधारपंकजस्योर्ध्वेसार्धद्व्यंगुलतोपरि ते
जसंस्वाष्टपत्रंवपीतकर्णिकयायुतं लक्ष्हेरवाकर्णिकामध्ये
स्थितानागदिसेविता पतत्साद्व्यंगुलादूर्ध्वेस्वाधिष्ठानेषडम्बु
के आर्णवंधिनीशाकिरूवाभिःशक्तिभिर्वृतं कांकिनी
मभिसंचिंत्येति नाभौदशदलकमलेमणिपूरके तदुक्तंत
त्रैव नाभिरष्टांगुलोपरितत्पद्मंमणिपूरकंदशपत्रसुशोभितं
लाकिनीमध्यगंतत्रडामर्यादिभिरावृतमिति अनाहतेहृदय

स्थाने द्वादशदलकमले तडंके तत्रैव वक्तदेशांगुलाद्दूर्ध्वम
णिपूराख्यपंकजात् पंकजे राकिणीमध्ये द्वादशारमना
हते तत्रस्थकालरात्र्यादिशक्तिभिश्च समाहते तत्रस्य सूर्य
विंवेति नादोऽनाख्यपीठकमिति षुष्टो कंठस्थिते षोडश
दलकमले तडंके अत्रैव तस्मादेकांगुलादूर्ध्वे विशुद्धे षोडशा
रके मध्यगाडाकिनीवासपत्रे शुपरमेश्वरि अमृताद्यक्षरांतः
स्थाखंद्रविंवतदूर्ध्वं तद्रति लंबिकाग्रे अष्टदलकमले तडंके
मत्रैव कंठोर्ध्वे परमेशानि लंबिकावतंरगले तस्यामष्टदलेप
संवशिन्यादिभिराहृतमिति भ्रुवोंतरे आज्ञायां द्विदलकम
ले तडंके तत्रैव आज्ञाधारे द्विपत्राब्जे इत्यत्र द्विदलसंस्थिते हंस
वतीत्यमापार्श्वद्वयंमध्ये हाकिनीति भ्रुव इत्येकवचनं भ्रुव
योपलक्षणं भ्रुवोरंतरे इत्यर्थः इंदौ बिंदौ विंदुतदर्धरोधिनी
नादनादांतशक्तिव्यापिकासमनोन्मनीनाम्नुपर्युपरि रूपा
णि उच्चारणकाले चवस्तीति विंद्वाद्युन्मन्यंताः भागाः सूक्ष्माः
सूक्ष्मतराः देहचक्रविद्यानां साधारणाः अत्र त्रैलोक्यमो
हनाद्युन्मन्यंतान् स्थूलसूक्ष्मसूक्ष्मतरेषु भागेषु महाविंदो
वनान्विभावयेदित्यर्थः पुनरपि त्रैविध्यमाह ॥

पुनश्चैवं त्रिधा चक्रं तु भावयेदिति

एवमुक्तप्रकारेण विभावितं चक्रं पुनस्त्रिधा विभावयेत्
त्रैविध्यमाह

अस्तान्तं सकलं प्रोक्तं ततः सकलनिष्कलं ।
उन्मन्यन्तं परे स्थाने निष्कलं च त्रिधा स्थितमिति

अस्तान्तं सकलाद्यान्तापर्यन्तं चतुरस्रादित्रिकोणान्तं चक्राष्टकं स्थूलं भावयेत् तद्भावनं सकलं ततो बिन्दुमारभ्योन्मन्यन्तं चक्रं सूक्ष्मसूक्ष्मतरभावेन भावयेत् तद्भावनं सकलनिष्कलं तत्रान्तरात्मनि स्पन्दवाक्यं सूक्ष्मसंवित् उन्मिषः संवित् उन्मन्यवस्थास्वात्मा सूक्ष्मा परा तत्प्रथमसमुदितेति परापरे स्थाने समविशेषसूक्ष्मसंविदं भावयेत् तद्भावनं निष्कलं त्रिधा स्थितम् अकुलाद्यान्तानां सकलादीनां विस्तरेणोक्ताः अनेनान्येऽप्युक्ताः बिन्द्वाद्युन्मन्यन्तानां च स्वरूपमुच्चारणकालं वाह दीपाकारोऽर्धमात्रश्च इत्यादिना मनोन्मन्यन्तेन

दीपाकारोऽर्धमात्रश्च ललाटे वृत्त इष्यते इति

दीपाकारो दीपस्य यादृशं भासनं तादृशमस्य स्वरूपं अर्धमात्रस्य ह्रस्वस्योच्चारणकालो मात्रेत्युच्यते मात्राया अर्धं सु

यो· स्मरणकालोयस्यसोर्धमात्रः ललाटेवृत्तइष्यते वर्तुलासन्नि
सि·टी· वेशोललाटेभ्रूवोरुपरिभागेदीपाकारोर्धमात्रोस्मरणका
१२ लोवृत्तसन्निवेशोबिंदुरित्यर्थः बिंद्वादीनांतुविस्तारः स्वच्छं
13 दसंग्रहेप्रपंचितः तत्रबिंद्वोर्धयाबिंद्वाचरणेनतदूर्ध्वतः
सूर्यकोटिप्रतीकाशमतिदीप्तमहारुणं तन्मध्येदशकोटी।
नांसंख्यायोजनपंकजे तत्कर्णिकायामासीनःशांत्यतीतेश्व
रःप्रभुः पंचवक्त्रोदशभुजोविद्युत्पुंजनिभाकृतिः निवृत्ति।
प्रतिष्ठाचविद्याशांतिरनुक्रमात् परितोवर्धयित्वास्थिताश्चैताः
शांत्यतीतस्यसुंदरि वामभागेसमासीनाशांत्यतीतामनोन्म
नी पंचवक्त्रधराःसर्वाःदशबाहुविभूषणाः बिंदुतत्त्वंसमा
ख्यातकोटिसूर्यशतैर्युतमिति

अर्धचंद्रस्तथाकारःपादमात्रस्तदूर्ध्वतइति

अर्धचंद्रोबिंदोरूर्ध्वभागस्तथाकारोदीपाकारएवपादमा
त्राकालश्चतुर्थभागोस्मरणकालइत्यर्थः तदूर्ध्वके
बिंदोरूर्ध्वभागे बिंदूपरिदेशेपादमात्रोस्मरणकाल।
इत्यर्थः दीपाकारोर्धचंद्रइत्यर्थः ।

ज्योत्स्नाकारान्तथाष्टांशारोधिनीअप्रवि
ग्रहेति ।

ज्योत्स्नाकारार्धचंद्रिकासमकांतिः अर्द्धांशमात्रार्धांशोच्चारण
काराद्यम्रविग्रहात्रिकोणाकारा रोधिनी हृदयोरपि । स्वच्छंद
संग्रहे यथा प्रपंचः । अर्धचंद्रस्योर्ध्वतो रोधिनी तस्याश्चोपरि
ज्योत्स्ना ज्योत्स्नावती कांतिः सुप्रभा विमलापि च । अर्धचंद्रोस्थि
ता ह्येताः कलाः पंच प्रकीर्तिताः । रुंधिनी रोधिनी रोधा ज्ञानरो
धा तमोपहा निरोधिका कलाः पंच कथितास्तत्र सुंदरि ब्रह्मा
दिपरमेशानां परप्राप्ति निरोधनात् । निरोधिकेति संप्रोक्ता
तस्या भेदाद्धरानेने परापदाप्य संप्राप्तिरिति

विंदुद्वयांतरे दण्डः शेषरूपो म
णिप्रभः कलांश इति ॥

विंदुद्वयमध्यगतः ऋज्वरेखाकारः शेषरूपो बिंदुद्वयमध्यग
नस्मिराशेषरूच्यते तत्स्वरूपः मणिप्रभः पद्मरागसवर्णव
र्णः कलांशः कलाः षोडशमात्राः षोडशांशोच्चारणकालस्तद
र्थः सुप्तः कलांशो नादसंज्ञैरुच्यते कलो नादः ध्वनोत्तमघु
रास्फुटेकलसत्तमरः मधुरास्फुटो ध्वनिर्नादः नादप्रपंचः स्वच्छं
दसंग्रहे यथारोहाधिनापरेन यडके तेनादस्तस्योर्ध्वसंस्थितः
पद्मकिंजल्कसंकाशः सूर्यकोटिसमप्रभः पुरः परिवृतो संख्ये
मध्ये पंचकलावृतः । इंद्रिका दीपिका चैव रोधिका मोचिका तथा

ऊर्ध्वगामध्यगातासौपंचमीपरमाकला वह्निकोटिसमप्रख्येत
न्मध्येत्रिपथयोजनं। पद्ममध्येसमासीनमीश्वरोवोर्ध्वगामिनं
वेदाम्बुजप्रतीकाशंपंचवक्त्रंत्रिलोचनं ईदिशायैर्हृतंदेवंशूल
पाणिजटाधरं तस्योत्संगगतामूर्ध्वगामिनींपरमांशिवां ध्याये
दिति।

हिरण्यांशस्मनादांतोविद्युदुज्जलः हला
कारस्तमध्यगविंदुयुक्तोविराजतेइति।

हलाकारोलांगलरूपसदृशः मध्यगविंदुयुक्तोविंदुद्वयम
ध्येदक्षिणभागस्थितविंदुयुक्तः विद्युदुज्ज्वलःतडित्सदृशकां
तिः हिरण्यांशस्सर्वैकषोडशांशोहिरण्यांशद्वात्रिंशत्तमो
भागः कोर्थः मात्राद्वात्रिंशत्तमानोच्चारणकालोहलाकारा
दिविशेषणविशेषतोनादांतइत्यर्थः नादस्यांतेलयोभवति
यत्रब्रह्मरंध्रे तत्प्रपंचः स्वच्छंदसंग्रहे यथा हकारस्तुनादांते।
भित्वासर्वमिदंजगत् अधःशक्तिंविनिर्भिद्यऊर्ध्वशक्त्यवसान
कः नाम्नाब्रह्मबिलेलीनस्तस्मात्ध्वनिलक्षणः ततोब्रह्मवि।
लंतस्यरुद्रकोट्यर्द्धविस्तृतम् तत्रब्रह्मशिवोनित्यः शशांकस
न्निभः दशबाहुस्त्रिनेत्रश्चपंचवक्त्रोमहेश्वरः ब्रह्माणीव
पराशक्तिर्ब्रह्मणोत्संगगामिनी द्वारंसामोक्षमार्गस्यरोध
यित्वावतिष्ठते॥

शक्तिवामस्थविंदूद्घत्सिराकारा तत्राप्युनरिति

पुनःशब्देन पूर्वेभ्यो विशेषो द्योत्यते पूर्वेषां विंद्वाभ्यां शान्तोऽस्य
रूपवर्णमात्राकलाः पश्चाद्वक्ष्यंते इत्यर्थः शक्तिः विंदुद्वयमध्ये
वामभागस्थविंदूत्सिराकाररूपः शक्तिप्रपंचः स्वच्छंदसंग्रहे क्रमयथा
शक्तितत्त्वं समाख्यातं भुवनैराश्रितं महत् आधारं भुवनानां वै
व्यासमासतः सूक्ष्मा चैव सुसूक्ष्मा च तथैवामृता शून्या चतुर्दि
क्षु स्थिता तासां मध्यस्था व्यापिनी स्थिता पंचवक्त्रा त्रिनेत्रा च स्वते
जस्का च पंचमी शक्तितत्त्वं समाख्यातं ध्यानान्मुक्तिफलप्रदमिति

व्यापिका विंदुविलसत्त्रिकोणाकारं तां गता इति

व्यापिका विंदुविलसद्धामादिति शक्तिमयत्रिकोणरूपतां ग
तेत्यर्थः इयं तु शक्तितत्त्वकथनेनैव कथिता स्वच्छंदसंग्रहे
यथा सूक्ष्मा चैव सुसूक्ष्मा चेत्याद्युपवर्णितमुक्तम्

विंदुद्वयांतरालस्थऋज्वीरेखामयी
पुनः समनीति ॥

एतत्समनायाः प्रपंचः स्वच्छंदभैरवे यथा चिदानंदस्वरूपात्

यो॰ पराशक्तिस्तदूर्ध्वतः समनानामसमाशक्तिः सर्वकारणकारणं
स्व॰टी॰ सर्वानानिविभर्तीयंशिवेनसमधिष्ठिता तदारूढःसभगवांशिवः
१५ परमकारणं शिवःसर्वस्यकर्तायंशक्तिःकारणमिष्यतइति ।

15

विंदुविलसद्गन्नेरवातथोन्मनेति ।

एकस्मादेवविंदोविलसद्गन्नेरवाद्योन्मनाउन्मनायाः प्रपंचः
स्वच्छंदसंग्रहे यथा यथाशक्तिःकारणत्वेनतदूर्ध्वउन्मनीस्थिता
नात्रकालकलाभानंनतत्वंनचदेवता । सुनिर्वाणंपरंशुद्धंरुद्रव
क्त्रंतदुच्यते शिवशक्तिरितिख्याता निर्विकल्पानिरंजनेति शक्त्या
दीनांसमनांतानांवर्णमात्रांशकालंचाह ॥

शक्त्यादीनांवपुःसूक्ष्मे द्वादशादित्यसन्निभे चतुः
षष्टिस्तदूर्ध्वंतद्विगुणाद्विगुणातथा शक्त्या
दीनांतुमात्रांशो मनोन्मन्याइति ॥

मनोन्मन्याइति मनोन्मनीपर्यंतं मनोन्मनीनामसमनामनः
सहितत्वात् तद्रहितत्वादुन्मनीत्युच्यते शक्त्यादीनामुन्मनीपर्यं
तानांमंशानांवपुः स्वरूपंसूक्ष्मं द्वादशादित्यसन्निभं एकत्रहेलयो
दितद्वादशादित्यसवर्णांवर्णमात्रांशः चतुःषष्टिमात्रांशकालः

वतः षष्टितमोंशः इत्यर्थः तदूर्ध्वं तद्व्यापिकायामात्रांशोच्चार
णं द्विगुणं व्यापिकच्चारणमात्रावयवकालेष्वविंशत्युत्तरशत
तमो भाग इत्यर्थः समनोच्चारणमात्रावयवकालः षडधिकपं
चाशदुत्तरद्विशततमो भाग इत्यर्थः ॥

तथोन्मनीति ॥

उन्मनी यथेदानीमकथितविशेषणा तथा निराकारनिरुच्चा
रा यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति उपनिषदुक्तरीत्या
मनोतीतगोचरत्वादुन्मनीत्युच्यते महाविंदोर्वाकाररूपवर्णो
च्चारकालो न विद्यते अतो नात्रोच्यते तस्य विषयानीर्णत्वात् तदु
क्तं स्वच्छंदसंग्रहे तत्वातीते वरारोहे वाङ्मनोतीतगोचरं निष्क
लं वापि सकलं नीरूपं निर्विकल्पकं निर्द्वन्द्वं परमं तत्वं शिवाख्यं
परमोपदमिति हकारादिविंद्वंतानां स्थूलवर्णानामुच्चारणका
लो मात्रा विंद्वादिसमानांतानामर्धमात्रा तदर्धादिक्रमेण लवप
र्यंतं उच्चारणकालो लवो नलिनीपत्रसंहत्यां सूक्ष्मसूच्याभि
वेधने दले दले तु यः कालः स कालो लववाचक इति वचनात्
तदूर्ध्वं शून्यपर्वतदधिकसूक्ष्मतरकालाभावात् एवं विषयवि
षभावनया शिवपदं भूयादित्यर्थः तदुक्तं विज्ञानभैरवभट्टा
रके पिंडरूपस्य मंत्रस्य स्थूलवर्णक्रमेण तु अर्धेंदुविंदुनादांतशू

यो० हृ० टी० २६
16

न्योस्माराद्भवेच्छिव इति अत्र विंदुर्ध्येय इति वक्तव्ये हृन्नात्तरोधनस्य
नामः विंदुर्हृदं तु नादांतश्च न्योस्माराद्भवेच्छिव इति अत्राहारी।
न्याग्रहणं अर्थे दोहपरिरोधिनीनादयोर्नादांतस्यैवोपरिच्छि
च्छक्तिव्यापिकासमानानां च विद्यमानत्वात् अस्य शब्दो नोन्म
नोच्यते अत्र येऽन्तु विंदुनादांतश्च न्योस्मारमभवेदिति पिंडरूपस्य
मंत्रस्य मंत्रसंग्रहेणोक्तिः ॥

देशकालानवच्छिन्नं तदर्थं परमं महत् । नि
सर्गसुंदरं तत्त्वं परमानंददर्शितम् ॥

तदर्थं हकारादिविंदुनानां सकलनिष्कलकेवलनिष्कलानां
त्रयाणामपृथ्यं परमं महत् महत्वं घटादीनामप्यस्ति न्यूनप।
रिमाणापेक्षया अतउक्तं परममिति यतः परं महत्वं नास्ति त
त्परमं महत् अतएव देशकालानवच्छिन्नं देशकालाकारैरनव
च्छिन्नमेव परमं महदिति तेन निसर्गसुंदरं लोके सुंदरमपि
वस्त्राद्यलंकारैरारोपितैः सुंदरमिव प्रतीयते इदं तु स्वभाव
सुंदरं सर्वैः स्वात्मतया स्पृहणीयत्वात् परमानंददर्शितम्
आनंदशब्दादिविषयानुभवेऽप्यस्ति तत्क्षणिकः तदुच्यते परमानं
दर्शितमिति कोऽर्थः त्रित्रपसमरूपवस्तुनः पुरातनीदे
शकालानवच्छिन्नपरममहद्रूपात्स्वभावसुंदरी परमप्रकाश

त्मकपरमशिवसमरस्यपरानंदशालिनीविमर्शशक्तिर्म
हात्रिपुरसुंदरीत्यर्थः अस्तेनविमलहरीस्थानमिति एवंमंत्र
सूचितं मातृकामयवासनामिदानीविवृणोति आत्मनइत्या
दिना ॥

आत्मनास्फुरणंपश्येद्यदासापरमाकला अ
विकाररूपमापन्नापरावाक्सुंदरीरिनाइति

सापरमासर्ववर्णाद्यभूतविमर्शरूपाकलाविमर्शशक्तिः
आत्मनःपरशिवस्यस्फुरणंपश्येदित्यादिक्रमेणवैखरीप
र्यंतेविमर्शनेपश्येत् दृष्टमिच्छेत्तदापरमर्शनात्मिकाभूताऽवि
काररूपमापन्ना प्रकाशांशरूपायाःसामरस्यमापन्नापरावाक्
सुंदरीरितापरमातृकोच्यते तदुक्तंसंकेतपद्धत्यां अनयोः
सामरस्यंयत्परस्मिन्महसिस्फुटमिति ॥

बीजभावस्थितंविश्वंस्फुटीकर्तुंयदोन्मनी
वामाविश्वस्यवमनादंकुशाकारतांगता इच्छा
शक्तिस्तदासेयंपश्यंतीवपुषास्थितेति ।

बीजभावस्थितंविश्वंयथावृत्तस्तथाषट्त्रिंशत्तत्वात्मिकंवि
श्वपरायांकारणतावन्मात्रमास्थितंस्फुटीकर्तुंयदोन्मुखी

यो.
हृ. टी.
१२
17

स्फुटीकर्त्तुमादयितृ सुन्मुखीग्रन्थोन्मादनेनाम स्फुटीकरणं
अतएवकार्यस्यस्फुटीकरणावामाविश्वस्यवमनात् कारणे
सतोविश्वस्यवमनात् वमनंनामोदरस्थस्याहारादेःवहिर्निर्ग
ग्रहासनं उत्पादनमप्येवमेव अतएवगर्भभावेनात्मोदरगत
स्यवहिर्वमनाद्वामावक्रांकुशाकारतांगता वक्रत्वाच्चवामा
शृंगाटस्यवामरेखासृष्टिरूपाप्यभूदित्यर्थः तथेच्छाशक्तिः
सामरस्यमापन्नापश्यन्तीरूपेणस्थितेत्यर्थः ॥

ज्ञानशक्तिस्तथाज्येष्ठामध्यमावागुदीरिता ऋजु
रेखामयीविश्वस्थितौप्रथितविग्रहेति ॥

तथाज्येष्ठाशक्तिर्ज्ञानशक्तिर्यथावामशक्तिरिच्छाशक्तिसा
मरस्यमापन्नाविश्वस्थितौ प्रथितविग्रहास्पष्टविश्वस्थितौ
हेतुर्वा ऋजुरेखामयी अत्रशृंगाटाग्ररेखाकारामध्यमवा
गुदीरिता मध्यमामातृकात्वमापन्ना ॥

तत्संहृतिदशायांतु वैन्दवंरूपमास्थिता
प्रत्याहृतिक्रमेणैवं शृंगाटवपुरुज्ज्वला क्रि
याशक्तिस्तु रौद्रीयंवैखरीविश्वविग्रहेति ।

सृष्टस्य स्थितस्य विश्वस्य संहारकाले बैंदवरूपमास्थिता ग्रं
विकाशान्तासामरस्यरूपास्थिता मध्यविंदोराविर्भूय सृष्टिं
स्थितिं च संपाद्य तत्संहारोन्मुखी पुनर्विंदुमेव प्रविष्टेत्यर्थः
एवं प्रत्याहृतिक्रमेणेयं क्रियाशक्तिसामरस्यात्मैवं शृंगा
टवपुः शृंगाटस्य दक्षिणरेखाभूत्वा ज्वला शृंगाटस्य रूपेण
भासमाना शृंगाटनाम त्रिकोणं वैखरी विश्वविग्रहा वाग्रू
पश्यंत्येवमय वैखरीरूपा जातेत्यर्थः प्रकाशविमर्शमिश्ररू
पाणामंबिकादीनां शान्तादीनां चतसृणां शक्तीनां शृंगाट
रूपतामुक्त्वा पुनरिदानीं त्रिकोणान्तर्गत पीठाकारवर्णि
लिंगावस्थाचतुष्टयमयत्वमाह । भासनाद्विश्वरू
पस्येत्यादिना तदर्थरूप एव मूलनिविष्टेनेन उत्तरार्धेन स्पष्टमा
ण चतुष्टयत्वे हेतुमाह ॥

भासनाद्विश्वरूपस्य स्वरूपे बाह्यतोऽपि च प
ताश्चतस्रः शक्तयस्तु कापूजाओ इति क्रमादिति

विश्वशिवादिभूम्यंतेनामरूपात्मकेन रूपस्य स्वरूपे बीज
भावेन बाह्यतः सृष्ट्यात्मना भासनात् एताश्चतस्रः शक्त्य
स्तशाकीब्यामाविस्तरस्य धातोः शक्तिः शाकस्य सुत्पत्तिः चत
स्रः क्रमेण परस्परसामरस्यमापन्नाः कापूजाओ इति क्रमा।

यो॰ रासन् का कामरूपपीठं पूर्णगिरिपीठं जालंधरपीठं ओ-
हृ॰ टी॰ ड्डियानपीठं प्रकाशविमर्शतया सामरसीभूताः सर्वाकारास्व-
१८ त्वरसाः शक्तयः कामरूपपूर्णगिरिजालंधरओड्डियानरूपे-
18 णपरिणताः पीठचतुष्टयस्य पिंडादिमयतावासनामाह ।

पीठाः कंदे पदे रूपे रूपातीते क्रमास्थिता इति

कंद इति सुषुम्णामूले कंदशब्देन तत्स्थापिंडाख्या कुंड-
लीलक्ष्यते तदुक्तं स्वच्छंदसंग्रहे लिंगनालं सुषुम्णायाः कं-
दस्थाने च मारुते इच्छाज्ञानक्रियारूपा कुंडली परमेश्वरी
प्रसुप्तभुजगाकारा मातृकारूपिणी शिवामिति पदं हंसः
रूपं बिंदुः रूपातीतं निरंजनं तत्र तदुक्तं स्वच्छंदसंग्रहे पिंडं
कुंडलिनी शक्तिः पदं हंसः प्रकीर्तितः रूपं बिंदुरिति ख्या-
तं रूपातीतं तु चिन्मयमिति पीठाश्चत्वारः पिंडपदरूप-
रूपातीतशब्देन तत्स्थानानि आधारहृदयभ्रूमध्यब्रह्म-
रंध्राणि लक्ष्यंते तेन क्रमात्तेषु स्थिताः तत्तन्मया इत्यर्थः तेषां
पृथिवीवायुसलिलतेजोरूपतां स्वचतुरस्रत्वरूपभेदमाह

चतुरस्रं तथा बिंदुषट्कयुतं च वृत्तकं अर्ध-
चंद्रं त्रिकोणं च रूपाण्येषां क्रमेण तु इति

चतुरस्रं च चतुरस्ररूपः कामरूपपीठः भूतत्त्वमित्यर्थः भूमंडल
स्य चतुरस्ररूपत्वात् विंदुषट्कं च षट्कं पूर्णगिरिपीठः षट्विं
दुयुक्तषट्करूपः वायुमित्यर्थः वायुमंडलस्य षडावर्तषट्करू
पत्वात् अर्धचंद्रं जालंधरपीठः अर्धचंद्ररूपो जलतत्त्वमयः अप्मं
डलस्यार्धचंद्ररूपत्वात् त्रिकोणं उड्डियानपीठस्त्रिकोणरूपः
तेजस्तत्त्वमयः अग्निमंडलस्य त्रिकोणरूपत्वात् क्रमेण काम
रूपादिपीठनामेतानि रूपाणीत्यर्थः अत्र गगनरूपस्य रूपत्वा
निरवयवत्वान्नानुक्तिः पीठनामेव क्रमेण वर्णानामाह ॥

पीतो धूम्रस्तथा श्वेतो रक्तो रूपं च कीर्तितमिति

पृथिवीवायुसलिलतेजसां क्रमेण पीतधूम्रश्वेतरक्तवर्णा।
तत्पीठानामपि तएव वर्णा इत्यर्थः अवयवार्थः स्पष्टः अत्र
भूतानामक्रमः पीठानुसारेण पीठानां तात्म्यभेदेन क्रमस्य
नियमात् पीठेषु लिंगान्याह।

स्वयंभूर्बाणलिंगं च इतरं च परं पुनः पीठे
ष्वेतानि लिंगानि संस्थितानि वरानने इति।

लीनं वाहेंद्रियगोचरं चिद्रूपमर्थं गमनीयंतीति लिंगानि

यो॰
हृ॰ दी॰
१९
19

विषयप्रकृतिं प्रतिपन्नवतीमसतिहृतिमहंकारणं च मतेः उभयंप
रिपश्यति योधिकृतः ...... परमात्मरसो विषयाकृतसंस्थि
तेरेकविधामनसस्त्वसदाव्यवहारविधाः अहमित्यपितद्विष
याचपरामतिहृतिरपिच्छलितात्मचितामनोहंकारबुद्धिचि
नात्मकानि कामरूपादीनि विस्फुरतायारूपत्वात् पीठाख्ये
तेषु तः करणचतुष्टयेषु ततद्रूपं चतुष्टयमयानि लिंगानि
स्वयंभ्वादीनि संतीत्यर्थः एतत्सर्वं सौभाग्यहृदये प्रपंचि।
तं पुनरेव कामपीठे तदग्रकोणस्थिते मनोरूपे प्रतिफलितं
तज्ज्योतिः स्वयंभुलिंगं समीरितं सद्भिः दक्षिणकोणे हृंकृति
रूपे जालंधरे तत्संक्रांते परधामबाणलिंगं ज्ञानसंक्रमणा
दिभेदवशात् मध्यत्रिकोणकोणे वामे श्रीपूर्णपीठमेतस्मि
न् बुद्धिमयं परं तेजः प्रतिफलितं त्वितरलिंगतायातं चित्तम
ये श्रीपीठे ज्योतिर्विंदोल्लसत्संक्रांते प्रतिफलितं परधाम्नः
परलिंगं तत्प्रकीर्तितं प्राज्ञैरिति लिंगानां स्वरूपं पीतादिव।
र्णांस्त्वेवरीवर्णांश्च विमृश्याह ।

हेमबंधूककुसुमस्फारसंद्रनिभानि त स्व
गृहं त्रिकूटं च महालिंगं स्वयंभुवं कादि
नोतान्तरस्थं तं बाणलिंगं त्रिकोणके कंद
वगोलकाकारं यादिमान्तान्तरस्थितं स्मरेत्।

रूपंसमस्तार्णावृतंपरमलिंगकम् विंदु
रूपंपरानंदकंदंनित्यपदोदितमिति ।

हेमनिभंपीतवर्णंत्रिकूटंविंदुत्रयकूटरूपंस्वराद्यावृतं अकारा
दिषोडशस्वरावृतंस्वयंभूलिंगंवह्निककुष्मनिभंरक्तवर्णंत्रि
कोणरूपं कादितांतान्तरावृतं बाणलिंगंशरच्चंद्रनिभंश्वेतव
र्णंकंदंचगोलकाकारंकंदंचकुसुमगोलकरूपंथादिसांताक्षरा
वृतं इतरलिंगंपरलिंगस्यपरतेजोरूपत्वात् अवर्णत्वं अतःस्व
स्वरूपमनिंद्रियगोचरमतएवविंदुरूपंसमस्तार्णावृतं आदि
क्षांतपंचाशदक्षरावृतंपरमलिंगंपरानंदकंदंपरायाअक्षररूपा
याः पश्यंत्यादिशाखावल्लतायाआनंदकंदंनित्यपदोदितं
नित्यत्वंचमात्मकत्वात् उत्पत्तिविनाशरहितत्वात् पदाद्धिस्थ
स्वतमनःप्राप्यात् उदितंप्रथमस्पंदरूपतयासर्वाण्यपिबीज
त्रितययुक्तायस्तुरीयविद्यायावाच्यरूपाणीत्याह ।

बीजत्रितययुक्तस्यसकलस्यमनोःपुनः ए
तानिवाच्यरूपाणिकुलकौलमयानितु ॥

एतानिशक्तिचक्रषट्कंपीठचक्रषट्कंमातृकाचक्रषट्कंमध्यको
णचक्रषट्कंलिंगचक्रषट्कंचेति एतानिसर्वाणिबीजत्रितययु

कस्य सकलस्य मनोवाग्भवकामराजशक्तिसमेतायास्तत्सम
ष्टिरूपयास्तुरीयविद्याया वाच्यरूपाणि विद्यावाचकानि सर्वा
णि वाच्यानि अत एव तस्यास्तुरीयरूपिण्यां विद्येत्यर्थः वाच्यवा
चकयोरभेदात् कलं मेयमानमातृलक्षणकोणं तत्समष्टिलक्ष
यानीत्यर्थः अमूनि पूर्वोक्तानि सर्वाणि चतुरात्मकानि जाग्रदादि
मयानीत्यर्थः ।

जाग्रत्स्वप्नसुषुप्ताख्यतुर्यरूपाण्यमूनि विति

जाग्रज्जागरितं देहेन्द्रियव्यवहारः अन्तःकरणमात्रव्यवहारः स्व
प्नः सर्वेन्द्रियोपरति सत्वात्तावन्मात्रपरामर्शः सुषुप्तिस्तुरीयं चै
तन्यमात्रवृत्तिः अवैवं वक्ष्यति तद्वैविमहाजाग्रदवस्थाविंदि
यद्वैयरित्यादिना चक्रस्य पूर्वं चतुरात्मकत्वमुक्तं तन्मध्ये वै ।
दवनिवासिन्याः स्वसंविदस्तदतीतरूपतामाह ॥

अतीतं तत्परं तेजः स्वसंविदुभयात्मकम्

अतीतं जागरितादिदशाचतुष्टयातीतम् अत एव परं विश्वोत्तीर्णत्वा
त् किं च परमनुत्तरं प्रकाशरूपं अरणशक्तिः तदेव ज्योतिषां ज्योति
रिति स्वसंविदुदयात्मकमिति सर्वप्राणिनामात्ममयतया स्थिते
तदुक्तं नवशतीशास्त्रे अनेकं परमं ज्योतिः सर्वप्राणिहृदि स्थित

मिति वक्रस्य पुनर्वासनान्तरकथनाय विश्रान्तीं तत्त्वकथ।
यिता वक्रस्यावासनामाह ॥

स्वेच्छाविश्वमयोल्लेखखचितं विश्वरूपकमिति

विश्वमयोल्लेखः विश्वं षट्त्रिंशत्तत्त्वात्मकं तन्मयउल्लेखः उल्लि
ख्यते इति उल्लेखविचित्रेतेन स्वेच्छाविश्वमयोल्लेखेन खचितं आत्म
स्वेच्छातूलिकयात्मभित्तौ विश्वमुन्मीलयतीति अत्र प्रमाणं भ
वनेजगच्चित्रं समालिख्य स्वेच्छातूलिकयात्मनि स्वयमेव समा
लोक्य प्रीणाति भगवान्शिवः इति विश्वरूपमतएव शिवादिक्षि
त्यंतरूपेण परिणतमित्यर्थः यथा क्षीरं दध्याकारेण परिण
मते नतु चितिरेव विश्वाकारेण परिणमते तदुक्तमीश्वरप्र
त्यभिज्ञाहृदये चितिः स्वतंत्रा विश्वसिद्धिहेतुरितिं तेन किमा
यातं देवस्येत्यत आह ॥

चैतन्यमात्मनो रूपं निसर्गानंदसुंदरमिति

चैतन्यं चिद्विमर्शशक्तिः आत्मनः प्रकाशात्मनः परशिवस्य
रूपं निसर्गानंदसुंदरं तत्सामरस्येन सहजानंदोल्लासादाखि
लस्पृहणीयं विमर्शशक्तिः प्रकाशात्मना परशिवेन सामर

यो॰
हृ॰ टी॰
२१
21

स्मात् विश्वं सृजति न तु केवला यथा न केवलेन तुषेणांकुरो जा
यते नापि तंडुलेन किंतु ताभ्यां संयुतमिति हि संवेद्य शालिभ्यो
तदुक्तं महास्वच्छंदसंग्रहे शिवाभिन्ना परा शक्तिः सर्वेक्रमश
रीरिणीति तदेवाह ॥

मेयमातृप्रमामानप्रसरैः संकुचत्प्रभे शृं
गाटरूपमापन्नमिच्छाज्ञानक्रियात्मकमिति

मेयं प्रमेयं प्रमाविषयः सम्यगनुभवः प्रमातद्वान् प्रमाता प्रमा
करणं प्रमाणं तदुक्तं तंत्रांतरे मितिः सम्यक्परिच्छित्तिस्तद्वता
वप्रमातृता तदयोगव्यवच्छेदः प्रमाणं मानमेयमतेरिति निर्विक
ल्परूपायाः स्वसंविदो मातृमेयप्रमाणरूपेण विकल्पात्मनाप्र
सर एव संकोचः शिवस्य प्रकाशात्मनो जीवस्य शक्तिविमर्शाख्ये
वप्रमामातृ निर्विकल्पात्मना विश्वाकारा मेयमातृप्रमाप्रमाण
भेदैर्भोगदा संकुचद्रूप तथापि संकुचद्रूपः एतदुभयमिच्छाज्ञा
नक्रियात्मक इच्छादिवामादिश[illegible]शभेदभिन्नं शृंगाटरूपमा
पन्नं त्रिकोणरूपेण परिणतं हृद्बीजत्रितययुक्तस्य सकल।
स्य मनोः पुनरित्यत्र कामकलादिकाया विद्यायाः श्रीचक्रे।
त भूतत्रिकोणमयपीठादिवत्तद्व्याप्ततामुक्त्वा इदानीं देवताया
अपि तन्मयतामुक्तवानिति भावः तदेव विवर्जिति विश्वाका

रप्रथाधारेत्यादिस्फुरदूर्मिसमावृतमित्यंतेन ॥

विश्वाकारप्रथाधारनिजरूपशिवाश्रयमिति

विश्वाकारप्रथा षट्त्रिंशत्तत्त्वात्मना परिणता विमर्शशक्ति-
स्तस्या आधारः निजरूपं नान्विकं रूपं शिवः प्रकाशात्मकः
स एवाश्रयं आधारो यस्य तद्विश्वाकारप्रथाधारनिजरूपशिवा-
श्रयं ।

कामेश्वरांकपर्यंकनिविष्टमतिसुंदरमिति

परंतेजः कामेश्वरांकपर्यंकनिविष्टकामेश्वरः प्रकाशात्म-
कः शिवः तस्यांकपर्यंकनिविष्टविमर्शशक्तिरूपं अतिसुं-
दरमिति सुभगैः सर्वैः स्वस्वात्मया स्पृहणीयत्वात् ॥

इच्छाशक्तिमयं पाशमंकुशं ज्ञानरूपिणं क्रियाशक्तिमयैर्बाणधनुषी दधदुज्ज्वलमिति

इच्छाशक्तिरेव पाशो बंधनहेतुत्वात् ज्ञानशक्तिरंकुशो मनोम-
यगजस्य नियामकत्वात् क्रियाशक्तिमये बाणधनुषी शब्दस्प-
र्शादयो बाणा मनस्तस्या भावद्धनुरिति वचनात् शब्दादिबाण

णांमनसापञ्चबाणसंयोजनेक्रियाशक्तेरेवव्यापारः अतएवेच्छाशक्ति
मयंपाशंज्ञानशक्तिमयमङ्कुशंक्रियाशक्तिमयीबाणपञ्चषी
एवमायुधचतुष्टयं स्वेच्छयागृहीतेकामकलामयविग्रहत्वा।
ङ्गचतुष्टयेदयत् उज्ज्वलचिदात्मकत्वात् ॥

आश्रयाश्रयभेदेनाष्टधाभिन्नहेतिमदिति

आश्रयःकामेश्वरः आश्रयकामेश्वर्यावेवपरंतेजएवमाश्रया श्र
यिभेदेनाष्टधाभिन्नहेतिमत् हेतिरायुधमाश्रयएवचत्वार्यायु
धानि आश्रयिणश्चत्वारिचेत्यष्टधाभिन्नहेतिमत् परशिवएव
प्रकाशविमर्शात्मकौनिजावेशौविभज्यकामेश्वरः कामेश्वरी
भूत्वा पाशाङ्कुशधनुःशरांस्त्रीभेदेनाष्टधाभूत्वा आश्रयाश्रय
भावेनस्वरमयमध्यत्रिकोणमध्यगतसदाशिवाख्यवैंदवत्री
यबिन्दुमयेपरलिङ्गेनिवसतेत्यर्थः इदमेवमिथुनंनवधाविभ
ज्य आत्मानंनववक्त्रेषुस्थितमित्याह ॥

अष्टारचक्रभेदंफंनववक्त्रात्मनस्थितमिति

पूर्वोक्तक्रमेणातदेववामादीच्छादिमयंत्रिकोणमेवत्रिधाविभि
न्नेदिशत्कोकवह्निभेदेनाष्टारचक्रमभूत् पुनस्तदेवशक्तिरूपभू
त्वानववक्त्रमभूत् एवंरूपस्वयमेवश्रीचक्रमष्टारचक्रम् चि

तिष्ठंतं चैतन्यं चेतनाह्वयकमेव जीवः कलावदेवेशि स्तत्व
पर्यष्टकमत्रमिति स्वच्छंदसंग्रहोक्त्या निजस्तत्वं पर्यष्टकं विभ
ज्याष्टारचक्रं वशिन्यादिरूपेण संरूपमित्यर्थः नवचक्रात्मनस्थि
ते एवंरूपमिथुनमेव निजाधारनवकं नवचक्रत्वेन विभज्य नि
जनादशक्तिं नवके चक्रेश्वरीरूपेण संपाद्य ॥

इच्छादिशक्तिचितयंपशोःसत्वादिसंतिकम्

महार्थं चिंतयामि गुरुवक्त्रादनंतरं अष्टारांशप्रदेशोयं विनि
वीर्णैषणादिकं स्तत्वं पर्यष्टकं देविमति रेषाह्निगौरवी अंतर्देशा
रवस्थाज्ञानकर्मेंद्रियावलिः महात्रिपुरसुंदर्या इति संचिंतया
म्यहं बाह्योदशारभागोयं बुद्धिकर्मात्मगोचरः चतुर्दशारवस्त
याकारेणनिचतुर्दश वसुष्टदलपद्माकदेशोभूतात्ममानसं
विकारात्मकतायास्त्रदेशोयश्चक्रगोभुवि अध्यकाधाप्रभूतयो
भूतेनानिश्चिनोम्यहं षोडशाख्यपद्माकेदेशाभूतात्ममानसं
विकारात्मकतापंक्तेदेव्याः संभावयाम्यहमित्यादि स्वभगोदय
वासनोक्तरीत्या बैंदवादिचतुरस्रांतेषु नवचक्रेष्वासनभूतेषु
इंद्रियादिरूपेण स्थितमित्यर्थः।

एवंरूपः परं तेजः श्रीचक्रवपुषा स्थितमिति

एवंरूपप्रकारेण विभक्तनिजेच्छादिषोडशविकारान्तावयवम
यत्रिकोणादिचतुरश्रान्तश्रीचक्रवपुषास्थितमित्यर्थः इत्थं
तस्मिन्निष्पन्ने श्रीचक्रवपुषा परिणते सति तदीयाः शक्तय
एवावरणदेवतारूपेण स्थिता इत्याह ॥

तदीयशक्तिनिकरस्फारोर्मिसमावृतमिति

तयोः कामेश्वरकामेश्वर्योरेव तदीयावयवास्तेषां शक्तयस्ता
सां निकरः समूहस्तेषां स्फारैः प्रकाशविमर्शात्मककामेश्वरका
मेश्वरीवज्रेश्वरीभगमालिन्याद्यावरणपरिवारैस्तिष्ठतीत्यर्थः
एवम्भूतस्तरंगास्तैः समावृते परिवृते कोऽर्थः ऊर्मिशब्देनो
द्योत्यार्थः प्रकाशात्मकः परमेश्वरः समुद्रः विमर्शरूपिणी
कामेश्वरी सलिलं तदीयावयवः शक्तिनिकररूपमयः यथा
कल्लोलाः समुद्रे जायन्ते तत्रैव लीयन्ते एवं तन्मये शक्तिचक्रं
तत्रैवोदेति अस्तमेति चेति तात्पर्यं तत्राभिप्रकाशवचने मूलो
क्तं च शक्तिचक्रं यतस्तन्मयतां गतम् तस्मिन्नेवाधायेत्तत्त्वं
विलीनं परिभावयेत् मूले स्वात्मनि चिद्रूपे यद्यद्यत्तत्तदेवही
ति सर्वचक्रवासनामुक्ता ते श्रमवासने मुद्राभेदमाह यि
दात्मभिन्नाविस्यादि एवं चक्रमयं स्थितमित्येतेन ॥

चिदात्मभित्तौ विश्वस्य प्रकाशामर्शने यदा।
करोति स्वेच्छया पूर्णा विचिकीर्षासमन्विता।
क्रियाशक्तिस्तु विश्वस्य मोदनाद्द्रावणात्।
तथा मुद्राख्ये इति।

चिद्विमर्शशक्तिः आत्मभित्तौ आत्मैव भित्तिः स्वरूपमेव भित्ति
रित्यर्थः विश्वस्य शिवादेर्भूम्यंतस्य प्रकाशामर्शने अस्फुटस्फुटी
कारः प्रकाशयदातया हृदयंगमीभावो विमर्शः एवंविधे ये
प्रकाशामर्शने यदा सृष्टिकाले पूर्णा विचिकीर्षासमन्विता वि
कर्त्तुमिच्छा विचिकीर्षा विकारः क्षीरादीनामप्यस्ति अत पाक
वचनादिना अत एव पूर्णा विचिकीर्षासमन्वितेति क्षीरादेर्दध्या
दिमात्रमेव विकारः अत्र तु शिवादिक्षित्यंततत्त्वाकारेण विका
रः अत एव पूर्णा विचिकीर्षासमन्विता क्रियाशक्तिस्तु क्रियाश
क्तिरेव स्तुनानरवधारणे एवंविधस्य विश्वस्य मोदनाद्द्रावणा
श्च अत्र तन्नकुलक्रियैव मेदनं द्रावणं तदेकरसीभावः संवि
उल्लासं लभते अयमर्थः यदा विमर्शशक्तिर्विश्वरूपेण वि
कर्त्तुमिच्छति तदा क्रियाशक्तिर्भूत्वा स्वविकारभूतस्य वि
श्वस्य परचिदानंदलक्षणेन मोदनेन तदेकरस्यलक्षणेन
द्रावणेन च मुद्राख्यमाप्नोतीत्यर्थः तत्रादौ व्यापिकां त्रिखंडां
मुद्रामाह ॥

सा परा संविदंबिका त्रिकलामयी त्रिखंडरू
पं संपन्ना सदा सन्निधिकारिणी सर्वस्य
चक्रराजस्य व्यापिका परिकीर्तितेति ।

साविमर्शरूपिणी शुद्धा संवित्कलामयी वामाज्येष्ठारौद्रीरू
पकलात्रयसमष्टिरंबिकाभूतांबिकाग्रहणं शांत्यतीताया
अप्युपलक्षणं । ज्ञानक्रियारूपकलासमष्टिभूततयाच्छा
तात्मिकापि श्रुतेत्यर्थः त्रिखंडरूपमापन्ना इति णाउलयो
वामाद्याः प्रकाशांशा वामोऽउल इच्छाद्या विमर्शास्तदुभयसं
योगरूपं घनात्मकखंडत्रयवती त्रिखंडमुद्रा जातेत्यर्थः
सदासन्निधिकारिणी अतएव संविद्देवतायास्त्रिपुरायाः
सन्निधिकारिणी सर्वस्य चक्रराजस्य सर्वेषां चक्राणांशक्ता
यंत्राणां श्रेष्ठत्वाच्चक्रराजस्य व्यापिका नवचक्रस्थितनवा
मुद्राणां समष्टिभूतत्वात् सर्वसंक्षोभिणीमुद्रामाह ॥

योनिप्राचुर्यतः सैषा सर्वसंक्षोभिकाऽत्र नः
वामाशक्तिप्रधानेयं द्वारचक्रे स्थिता भवेदिति

सैषा त्रिखंडाखंडत्रयसंक्षोभ्य योनिप्राचुर्यतो मध्यमाद्वयसं

योगादेकयोनिरनामहृदयसंयोगादन्यायोनिः कनिष्ठाहृदय
संयोगादपरा एवं योनित्रयप्रादुर्यात्सर्वसंक्षोभिकापरानं
दप्रवणत्वकारिणी वामाशक्तिप्रधानीयं सर्वसंक्षोभिणी
मुद्रा वामाशक्तिप्रधानत्वाद्दृष्टिः सृष्टिरेव क्षोभः क्षोभश्चैव
त्वरूपत्रयरूपेवत्वद्दीरवति त्रैलोक्यमोहने स्थिता द्राविणीमा
हृ॥

तथ्य विश्वस्थितिकरी ज्येष्ठाप्राधान्यमाश्रिता
स्थूलनादकलारूपा सर्वानुग्रहकारिणी स
र्वाशापूरणाख्ये तु सैषा स्फुरति विग्रहेति ।

तथास्य विश्वस्थितिकरी संविन्मात्रस्थितिकारिणी अतो
ज्येष्ठाप्राधान्यमाश्रिता ज्येष्ठाशक्तेः स्थितिहेतुत्वात् नादात्मा
नः कला नादकला षोडशस्वराः अत्राभियुक्तवचनं कलानं
दस्वभावा वंदे त्वज्जा इत्यादि तद्रूपाः कामाकर्षिण्याद्यास्त।
द्रूपाः सर्वाशापरिपूरकचक्रव्यापकत्वात् सर्वाशापरिपूर
काख्ये कामाकर्षिणी कलाधाररूपत्वात् अत एव सर्वानुग्र
हकारिणी कामाकर्षिण्यामेव सर्वानुग्रहः सैषा तच्छब्देन च
त्स्थनीशा स्थेका सर्वविद्राविणी परामृश्यते स्फुरति विग्र
हा संविद्रूपत्वात् कोर्थः ज्येष्ठाप्राधान्याधारत्वात् स्थितिरूपि
णी अत एव स्वरूपमध्यमातर्जन्योः कनिष्ठानामयोश्च संयो

यो. हृ. टी. २५ गद्रूपिणी कामाकर्षिण्यादिरूपत्वात् सर्वानुग्रहकारिणीत्वा।
दाधारत्वात् सर्वाशापरिपूरणाख्यचक्रे संविद्रूपत्वात् स्फुरि
तविग्रहा चतुश्शतीशास्त्रे प्रतिपादिता सैषा सर्वविद्राविणी
मुद्रा स्थितेत्यर्थः सर्वाकर्षिणीमुद्रामाह ॥

25

ज्येष्ठावामासमत्वेन सृष्टेः प्राधान्यमाश्रिता आ
कर्षिणीव मुद्रेयं सर्वसंक्षोभिणी स्मृतेति।

ज्येष्ठावामासमत्वेन ज्येष्ठवामाशक्तिद्वयसामरस्यरूपत्वात्
सृष्टेः प्राधान्यमाश्रिता सृष्टिरूपा वामा स्थितिरूपा ज्येष्ठा उ
भयसामस्यात्सृष्टिस्थिति साधारणीयम् वामांशेन वक्रतर्ज
नीमध्यमाद्वयरूपा ज्येष्ठांशेन ऋजुः संयुक्तानामिकाकनि
ष्ठाद्वयरूपेत्यर्थः अत एव वक्रांगुलिद्वयरूपत्वादाकर्षिणी
यं मुद्रा सर्वसंक्षोभिणी सर्वसंक्षोभकारिणी चक्रे स्मृता स्मृ
तिरेवानुभवसंस्कारजं ज्ञानं एवं चतुश्शतीशास्त्रेन भता ३
दांनी स्मृता सवासना कथ्यतेत्यर्थः सर्वावेशकरीमुद्रामाह

व्योमद्वयान्तरालस्थविंदुरूपा महेश्वरि शि
वशक्त्यात्मसंश्लेषाद्ध्यावेशकरी स्मृता चत
र्दशारचक्रस्था संविदानंदविग्रहेति ॥

आधारत्वात्तांतषट्चक्रांतरालानि विंदवः पंचभूतमयाः तदु
क्रमभिमुक्तैः पंचविंदुमयं भेदपंचप्रणवपंकजे इति तद्रूपा व्यो
महृदयांतरालस्य विंदुरूपा शिवशक्त्यात्मसंश्लेषात् शिवात्मा
नो दक्षकरांगुलयः शक्त्यात्मनो वामकरांगुलयः शिवशक्त्या
त्मना परिवृत्तेन तत्रते रांगुल्यान्तरालहृदयगते केकांगुलिरूपान्यो
गाफणातनादेवं श्वाद्याद्यावेशकरी मुद्रादिव्यस्य प्रकाशात्म
नः शिवस्यावेशकरी सामरस्यचकरी चतुर्दशारचक्रस्था चतु
र्दशारचक्रे सर्वसौभाग्यदायकनामधेये स्थिता संवित् स्थिरा
नंदविग्रहा शिवसामरस्यविंदुरूपलक्षणा वेपनात्मिके यं मु
द्रामयी संविदेकरस्य विंदुरूपलक्षणानंदमयी चतुर्दशारच
क्रे स्थिते त्यर्थः उन्मादिनीमुद्रामाह ॥

विंद्वंतरालविलसत्सूक्ष्मरूपशिखामयी उपे
क्षाशक्तिप्रदानात्सर्वोन्मादनकारिणी दशा
रचक्रमास्थाय संस्थिता वीरवंदिते इति ॥

विंद्वंतरालादाधानब्रह्मरंध्रांतगतयो निमद्राविंदोः स्वयंभूप
राख्ययोर्लिंगयोरंतरालात् विलसत्सूक्ष्मरूपशिखामयी विल
संत्यो सूक्ष्मरूपे विमंतन्तरूपाकृती शिखी शिखावच्छिखा प्रवि
काशांते तन्मयी तदेकरस्यरूपा उपेक्षाशक्तिप्रधाना उपेक्षाशक्ति

यो॰ प्रवृत्ता सर्वोन्मादकारिणी उन्मादस्थितविभ्रमः सर्वोन्मत्तवत्स्व
वृ॰ टी॰ स्वव्यापारपरां मुद्रां शिवशक्तिसामरस्यानुसंधानपरां करोती
२९ त्यर्थः दशारचक्रमास्थाय दशारचक्रं बहिर्दशारचक्रं वीरवंदि
ते इदंताविपोरहसिरण्णागने प्रलयप्रतिपादनपरा वीरासनैर्वंदि
28 तै आत्मा आत्माहंभावनया भाविते तदुक्तं परापंचाशिकाया
म् अहमस्मि प्रलयं कुर्वन्निदमः प्रतियोगिनः पराचक्रमपरोक्षं के
स्वभावमशिवापहमितिकोर्थः अंतः कुलाकुलविंदुनालवि
लसद्विकाशांतात्मवज्ञामृतकुंडलिनीरूपशक्तिशिवात्मद्व
यमोऽत्र ह संयोगविंदुहृदयाकारवत्ते द्वयांतर्गतकनिष्ठाद्वय
मयी सेषा शक्तिप्रधानत्वात् रजः कृत्स्नामातर्जनी हृद्याग्र।
संयोगरूपा शिवशक्तिसामरस्यानुसंधानलक्षणा वंधनरूपा
सर्वोन्मादिन्याख्या मुद्रा बहिर्दशारचक्रमास्थाय संस्थिते त्यर्थः
महांकुशामुद्रामाह ॥

वामाशक्तिप्रधानात्तु महांकुशमयी पुनः अथो
विद्धं वसंती माहितीयेन्तु दशारके संस्थिता
मोदनपरा मुद्रा रूपत्वमास्थितेति ॥

विंदुनालविलसत्सत्सरूपशिवात्मयोः सल्लाकृतितर्जन्याना
मिकासंयोगरूपा वामाशक्तिप्रधानात्तथा न भवति इदानीं वा
माशक्तिप्रधाना वामा विश्वस्य वमनादंकुशाकारतां गतेति

एवोंकारीत्यावामाशक्तिप्रधानत्वाच्चक्राकारतर्जनीबंधनरू
पाश्रिताविश्वंवमंतीसृष्टिरूपत्वात् तद्वत्परमशिववत् द्विती
येदशारेतद्दशाकारकेमोदनपराशिवसामरस्यलक्षणपरा
त्रसंधानमयी अतएवमुद्रारूपत्वमास्थिता अयमर्थः एवों
कारमुद्रालक्षणविमर्शमयिचिच्छक्तिरिववामाप्राधान्याद्वक्री
भूतेत्यर्थः तेनाद्वयपरमशिवसामरस्यपरानंदप्रणवरूपम
हांकुशमुद्राख्यातद्दशारस्थितेति खेचरीमुद्रामाह।

धर्माधर्मस्यसंघट्टादुत्थिताचिन्निरूपिणी वि
कल्पास्यक्रियालोपरूपदोषविघातिनी विक
ल्परूपरोगाणांहारिणीखेचरीपरा सर्वरोग।
हराख्येतुचक्रेसंविन्मयीस्थितेति ॥

धर्माधर्मस्यसंघट्टात् धर्मः शक्तिः सृष्टादिसकलधर्मपर
त्वात् अधर्मः शिवः तत्सकलधर्मरहितत्वात् तस्यसंघट्टः
सामरस्यंतस्मादुत्थिताचिन्निरूपिणीचित्तिः संवित्तिः विक
ल्पोस्यक्रियेति विकल्पः कोटिद्वयावलंबनेएवंवानवेति सं
शयज्ञानंविकल्पः विकल्पोर्थः क्रियानित्यनैमित्तिककाम्य
रूपाः तल्लोपेनपापंजायते तस्याविघातिनीनिर्विकल्परोगा
णांहारिणीपरिपूर्णभावस्यशिवस्यमयैवमेतत्कर्तव्यमेव

नेतिविकल्परोगा आणवपवनाथयः तदुक्तमभियुक्तैः अ
पूर्णंमन्यताव्याधिःकार्पण्यैकनिदानभूः क्लेशावहातिकष्टाचे
ति तेषांहारिणीखेचरीखेनिमग्नसमस्तक्रियाक्रमेयाश्मिति।
स्मरति शाश्वतोदयोमाशिवत्वसमवाप्तिकारिणीखेचरीसक
लखेदहारिणीति तदुक्तरीत्यानिर्विकल्पकबोधभूमिसंचारि
णीचितिःशक्तिः परमशिवसामरस्यरूपानन्ददपिष्टितत्वात् स
र्वरोगहराखेचक्रेसंविन्मयीस्थिता कोऽर्थः शिवशक्तिमयद
क्षवामबाहुहृदयपरिवर्तनरूपातर्जनीद्वयावलंबितखुमतिक
रद्वयकनिष्ठिकानामिकाद्वंद्व तदुपरिस्थित मध्यमाद्वंद्वसंयु
क्तांगुष्ठद्वयाग्रसंयोजनलक्षणवेधनरूपाशिवशक्तिद्वयसंघा
ट्टादुदिता यदानिर्विकल्पबोधभूमिसंचारिणी अतएवविक।
ल्परूपरोगाणामपूर्णंमन्यतालक्षणानांहारिणी सर्वरोग।
हराखेचक्रेखेचरीमुद्रास्थितेत्यर्थः बीजमुद्रामाह ॥

शिवशक्तिसमाश्लेषस्फुरद्व्योमान्तरोद्भवः प्रका
शयंती विश्वमास्वात्मरूपस्थितं सदा बीजरू
पमहामुद्रासर्वसिद्धिमयेस्थितेति ॥

शिवशक्त्योः समाश्लेषः सामरस्यं तन्मयेस्फुरद्व्योमान्तरे प्रकाश
विमर्शात्मान्तरगगनान्तराले स्वात्मस्वरूपस्थितं कारणताव

न्मात्रतयास्थितं विश्वं सदा सर्वदा प्रकाशात्मत्वात्तत एव बीजरूपा
महामुद्रा तस्याश्चाधाररूपविश्वोत्पत्तिहेतुत्वात् सर्वसिद्धि
मये विश्वोत्पत्तिहेतुभूतबीजमुद्राधारत्वात् सर्वस्यापि वादे
र्भूम्यंतसिद्धिरुत्पत्तिः तदुक्तं श्रीप्रत्यभिज्ञाहृदये चितिः स्व
तंत्रा विश्वसिद्धिहेतुरिति तन्मये चक्रे स्थिता कोऽर्थः शिवश
क्तिरूपसंमिलितोभयकरांगुलकनिष्ठिकाद्वयावलंबनमयाना
मिकोभयपार्श्वप्रसृतसंपुटाकारमध्यमाद्वयोपरिस्थितवक्रा।
कारतर्जनीसंपुष्टांगुलाग्रमध्यमाश्लेषांतरालप्रतीयमानगगनां
तरालकारणं तन्मात्रतयास्थिते विश्वप्रकाशयंती बीजमुद्रा
सर्वसिद्धिमयाभिधेये चक्रे स्थितेत्यर्थः योनिमुद्रामाह ॥

संहर्णीस्य प्रकाशस्य लाभभूमिरियं पुनः योनि
मुद्रा कलारूपा सर्वानंदमये स्थितेति ॥

संहर्णीस्य प्रकाशस्य प्रकाशात्मनः परमशिवस्य लाभभूमिः
प्राप्तिस्थानं अत एव योनिमुद्रा योनिरूपा मुद्रा योनिस्त्रिको।
णं वामादीच्छादिशक्तित्रितयसामरस्यरूपा हार्धकलात्मक
विमर्शरूपा तत एव सर्वानंदमयी शिवशक्तिसामरस्यसमुदि
तपरानंदपूर्णत्वाद्बिंदुरूपसर्वानंदमयिनाम्नि चक्रे स्थिते।
ति कोवामेच्छारूपावक्रतर्जनीद्वयाग्रग्रहीतव्यस्तनामिका

हृदयाग्रपरिगतस्येष्टा ज्ञानमयस्यन्त्वसंपूर्णकार्यमध्यमा हृदयमध्य
गता रौद्री क्रियात्मककनिष्ठिका हृदयाग्रसंयोजित संपूर्णप्र
काशरूपां गुह्यहृदयाग्ररूपा विमर्शकलारूपमयी योनिमुद्रा
प्रकाशविमर्शसामरस्यलक्षणबिंदुमयसर्वानंदमयीचक्रे
स्थितेत्यर्थः उक्तमुपसंहरति ।

क्रियाचैतन्यरूपत्वादेवंचक्रमयंस्थितमिति

क्रियाक्रियाशक्तिः विश्वस्योद्भेदनाह्वावणात्मयेत्यकं चक्रं।
ताक्रियाभेदेन विरचनामयवामादिशक्तिप्राधान्यभेदात् सं
तोभिन्नादियोन्यं ततन्मुद्रारूपेण चैतन्यस्वरूपत्वाच्चक्रम
यंत्रैलोक्यमोहनादि सर्वानंदमयांतनवचक्रमयंस्थितमित्य
र्थः ननु यदा सा परमाशक्तिरिच्छया विश्वरूपिणी स्वपक्रांते
पुनः क्रियाचैतन्यरूपत्वान्नवचक्रमयंस्थितमित्युपसंह्रिय
ते इंसशकाननर्हिमया प्रक्रान्तोपसंहारस्तत्रयमित्याह ॥

इच्छारूपंपरंतेजः सर्वदाभावयेद्बुधः इति ॥

परं तेजः शिवशक्तिसामरस्यरूपपरमयं ज्योतिरिच्छास्वरू
पं स्वेच्छाकृतनानारूपप्रपंचमयं सर्वदाकालत्रयेपि भावये
द्बुधः ज्ञाता परशिवरूपगुरुकटाक्षपातनक्षीणाशेषकाममयंल

जात्मशक्तिश्चेति पंचमी कुलंशीलंचजातिश्चेत्यष्टौपाशाः प्रकीर्तिताः।
इतिग्रभियुक्तवचनोक्तपरिपाटितपाशाष्टकतयापरिस्फुरत्पशु
भावः स्वेच्छयाकल्पितनानारूपप्रपंचमयंश्रीचक्ररूपेणापरि
णतं परामयंतेजः सर्वदाभावयेदित्यर्थः पुनरस्यैवचक्रस्य प्रका।
रांतरेणक[illegible]नांतरमाह त्रिधावेत्यादिना।

त्रिधावनवधावैवचक्रसंकेतकः पुनरिति।

स्पष्टंतत्रादौ त्रिधात्व वासना माह ॥ ॥

वह्निनैकेनशक्तिभ्यांद्वाभ्यांवैकः पुनः पुनः
तैश्चवह्नित्रयेणापिशक्तीनांत्रितयेनच पंच
द्वयेनचान्यः स्याद्गृहत्रितयेनच पंचशक्तिच
तुर्वह्निपद्मद्वयमयीत्रयं एणंमहाचक्रमिति

एकेनवह्निनाद्वाभ्यांशक्तिभ्यामेकः प्रकारः तेष्वेकवह्निना
शक्तिद्वयरूपस्त्रिकोणैः पुनर्वह्नित्रयेणशक्तीनांत्रितयेनचा
परः प्रकारः अयमर्थः त्रिकोणमेयोपारिविस्तारक्रमेणपुन
र्वह्नित्रयेणशक्तित्रयेजातेपरः प्रकारोभवति इतिपद्मद्वयेन
भूगृहत्रितयेनचान्यः प्रकारः पद्मद्वयोरष्टत्रयांतरालयोरष्टद
लषोडशदलेचेति भूगृहत्रयंचतस्रत्रयंपवंकृतेसति पंचश

यो॰ हृ॰ टी॰ २९ तयस्त्रतारो वक्त्रः पद्मद्वयं च महीत्रयं चेति परिशिष्टो महाचक्रस्य
मष्टिरूपं तत्प्रकारत्रयमेव विविच्य विवृणोति तत्प्रकारः प्रदर्श्यते।

29

तत्राद्यं नवयोनिः स्यात्तेन द्विदशसंयुतं मनु
योनिपरं विद्यात्तृतीयं तदनन्तरम् अष्टद्युष्ट
दलोपेतं चतुरस्रत्रयान्वितम् चक्रस्य त्रि
प्रकारत्वं कथितं परमेश्वरीति ॥

तत्प्रकारो नानात्वेकवचनं तत्प्रकारः प्रदर्श्यत इत्यर्थः तत्र।
तेषु प्रकारेषु आद्यं नवयोनिः वह्निनैकेन शक्तिभ्यां द्वाभ्यामि
त्यस्य विवरणं एकस्य वह्नेर्द्वयोः शक्त्योश्च संयोगे सति वैंधवत्रि
कोणाष्टकोणैर्नवयोनिचक्रं भवेदित्यर्थः तेन द्विदशसंयुतं म।
नुयोनिपरं विद्यात् तेन नवयोनिचक्रेण संयुते द्विदशसंयुते
दशारद्वयसंयुतं मनुयोनिवत् चतुर्दशकोणं परं द्वितीयं जानीया
त् तेषु वह्नित्रयी शक्तित्रये च कृते दशारचक्रद्वयं चतुर्दशार
चक्रं च चक्रत्रितयं द्वितीयचक्रं भवतीत्यर्थः तदनन्तरं तेन चक्रे
द्वयेनानन्तरमव्यवधानेन स्थितमनन्तरमव्यवहितं अष्टदलक
मलेन षोडशदलकमलेनोपेतं चतुरस्रत्रयात्मकं तृतीयचक्रमि
त्यर्थः एकेन चक्रावयवत्रितयस्य प्रत्येकस्य सृष्टिस्थितिसंहार
भेदात् क्रोडीकारः तद्यथा चतुरस्रत्रये सृष्टिः सृष्टिः षोडशदल
पद्मे सृष्टिस्थितिः अष्टदलपद्मे सृष्टिसंहारः एवं चक्रमये सृष्टि।

मयत्वात् एवं चतुर्दशारे स्थितिसृष्टिः बाह्यदशारे स्थितिस्थितिः
अन्तर्दशारे स्थितिसंहारः एवं चक्रमयं स्थितिमयत्वात् एवम
ष्टकोणे संहारसृष्टिः त्रिकोणे संहारस्थितिः बैन्दवं संहारसं
हारः एवं चक्रमयं संहारमयत्वात् बैन्दवचक्रमारभ्य चतुर
स्रान्तो हारः सृष्टिरित्यर्थः एवं सर्वमेतन्मनसि ध्याय चक्रस्य त्रि
प्रकारत्वं कथितं परमेश्वरीति। नन्वेवं विश्वमुक्तं तर्ह्येवं चक्रं
मध्यचक्रमारभ्य किमुत्पादयितुं न शक्यत इत्याह ॥

सृष्टिस्थं नवयोन्यादिष्वन्तं संहृतिपुनः ए
थ्यादिनवयोन्यन्तमिति निशाम्नस्य निर्णय इति

संहृतिपुनः एथ्यादिनवयोन्यन्तमित्यत्र नवयोनिशब्देन यो
न्यन्तर्गते बैन्दवे चक्रे लक्ष्यते तथा च चतुरस्रत्रयमारभ्य बैन्द
वान्तमुहारः संहार इत्यर्थः इति चतुःशान्तीः शाम्नस्य निर्णयः
अतो न मध्यमादिचक्रमुहारयतीतात्पर्यम् देवदत्तविष्णु
मित्रयज्ञदत्तेषु देवदत्तयज्ञदत्तयोः फलानि देयानीत्युक्ते
विष्णुमित्रस्य न देयानीति गम्यते एवं श्रीचक्रमयं वशो विम
र्शवासनामुक्ता इदानीं समष्टिचक्रस्य वासनामाह ॥

एतत्समष्टिरूपं तु त्रिपुराचक्रमुच्यते ॥

यो· एतत्समष्टिरूपं सृष्ट्यादित्रितयं समष्टिर्नाम अवयवी तत् तथा
हृ·दी· न भवति सृष्टिपदेन स्थितिपदेन संहारपदेनापि च नाभिधी
३· यते त्रिपुराचक्रमुच्यते त्रिपुरायाः सृष्ट्यादिभिस्त्रिभ्यः पुरा
30 विद्यमानत्वात् उपादानभिसंधेयायाः अनाद्यंततद्रूपायाः
स्वसंविदस्तत्क्रमाविर्भावभूमिरित्युच्यते तदुक्तं संकेतपद्ध
त्यां वशिन्याद्यैर्मांतरालमित्यादिना ।आसर्वगात ततस्त्वं ते
न ननु संविद्रूपा त्रिपुरैव मास्तां यतंतां किमनेन चक्रवास
नालक्षणेन क्रमवैधविधिप्रयासेनेत्यत आह ॥

यस्य विज्ञानमात्रेण त्रिपुराज्ञानवान् भवेत्

यस्य विज्ञानमात्रेण यस्मिन् विज्ञाते एव त्रिपुराचक्रज्ञानमा
त्रेण त्रिपुराज्ञानवान् ज्ञाता कोऽर्थः पूर्वं निराकारमूर्तित्रि
पुरायाज्ञानमाशंकाम् अशेषप्रवेशकरी सैव एतच्चक्रवास।
नायाः उन्मथ्यैवं देवक्रोडीकृतासाज्ञानशंकेत्यर्थः तदु
क्तमभियुक्तैः पराकाहं तत्तच्चक्रं महायोगविदां परं उत
हेमवनीभावमिव मूर्तिं करोम्यहमिति चक्रस्यैवसु
हिष्टं नवधात्वमिदानीं वक्तुं प्रतिजानीते ॥

चक्रस्य नवधात्वं च कथयामि तव प्रिये इति

यतःप्रियतमासित्वमतोरहस्यमपिकथयामीत्यर्थः इदानीं
नवधात्वमाह ।

आदिमंभूत्रयेणस्याद्द्वितीयंषोडशारकं अष्टद
ष्टदलंप्रोक्तंमन्त्रकोणमनंतरम् पंचमंदशको
णंस्यात्षष्ठंचापिदशारकं सप्तमंवसुकोणं
स्यान्मध्यंत्र्यस्रमथाष्टकं नवमंत्र्यस्रमध्यंस्यादि
ति ॥

भूत्रयेणचतुरस्रेणमन्त्रकोणंचतुर्दशकोणंसप्तमस्यात् ३
कानांनवचक्राणांनामान्याह ॥

तेषांनामान्यतःशृणु त्रैलोक्यमोहनंचक्रंसर्वा
शापरिपूरकं सर्वसंक्षोभकरंदेविसर्वसौभाग्यदा
यकं सर्वार्थसाधकंचक्रंसर्वरक्षाकरंपरम् स
र्वरोगहरंदेविसर्वसिद्धिमयंतथा सर्वानंद
मयंचापिनवमंशृणुसुंदरीति ॥

त्रीः त्रैलोक्यमोहनंलोक्यन्तेइतिलोकाः लोक्यतेनेनेतिवालोकः
लोकायतीतिलोकः इतिकर्मकरणकर्तृव्युत्पत्त्यामेयमानमातृ
लक्षणं त्रैलोक्यंतस्यमोहनंतिरोधायाहंतप्रतीतिव्युत्पादनेनम

वीणापरिहारकं आशानामन्यस्यपदार्थान्तरेभ्यस्पृहा तस्याः
सर्वस्याः स्पृहायाः परिपूरकं नित्यपरिपूर्णानन्दमिलक्षणपरम
शिवस्यामरस्य प्रतिपादनेन सर्वक्षोभकरं सर्वस्यचित्तस्याशिवां
तस्यो पर्युपरितनक्रमेण क्षोभस्य संहारलक्षणस्य कारकभेद
प्रपंचलयरूपत्वात् सर्वसौभाग्यदायकं सर्वसौभाग्यं सर्वस्पृह
णीयता तस्यादायकं सर्वस्पृहणीयपरप्रेमास्पदपरशिवैक
प्रतिपादनेन सर्वार्थसाधकं सर्वेषां वैदिकानां तान्त्रिकानां क्रि
याणामभ्यर्थः प्रयोजनं परशिवप्राप्तिः तदुक्तं महाकविभिः
बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः त्वय्येव निपतंत्यो
घा जाह्नवीया इवार्णवे उत्पादयति सर्वरक्षाकरं रक्षानाम प्रति
कूलपदार्थादुपहरति परिहारः षट्त्रिंशत्तत्वात्मकं सर्वमेवप्र
तिकूलपदार्थः तस्मात्सर्वस्माद्रक्षाशिवाहंभावभावनालक्ष
णां करोति तदुक्तं पराप्रवेशिकायां अहमिप्रलये कुर्वन्निदमः
प्रतियोगिनः पराक्रमपरो भुंक्ते स्वभावमशिवापहमिति सर्व
रोगहरं भेदलक्षणं षट्त्रिंशत्तत्वात्मकं सर्वमेव रोगः तस्य हरं अ
भेदप्रतीतिहेतुत्वात् अत्रैवोक्तं विकल्परूपो रोगाणां हारिणी
खेचरीपरेति सर्वसिद्धिमयं सर्वस्य सिद्धिरुत्पत्तिः स्थितिः
संहारश्च तन्मयं त्रिकोणस्य सर्वस्य सृष्टिस्थितिसंहाररूपहे
तुत्वात् तदुक्तं श्रीप्रत्यभिज्ञाहृदये चितिः स्वतंत्रा विश्वसिद्धि
हेतुरिति सर्वानंदमयं शिवशक्तिलक्षणविमर्शप्रकाशसामर

स्वरूपत्वात् अत्र सर्वत्र प्रवृत्तिनिमित्तभेदाद्वैतभेदाद्वैतविश्रां
तिरेव परमार्थः सर्वात्मकवासनाचक्रस्य प्रयोजनमाह ॥

अत्रैषा महादेवी महात्रिपुरसुंदरीति ॥

महादेवी महती देशकालाकारैरनाकलितत्वात् देवी द्योतना
दिति देवीपदाभिधेया विमर्शरूपा च त्रिपाद्यनवथाव सर्वात्म
वासनैव चक्रे महात्रिपुरसुंदरी महती अनावरणचिद्रूपिणी
त्रिपुरा तुरीयरूपत्वात् सुंदरी स्वस्वात्मतया सर्वस्य स्पृहणीय
त्वात् एवंविधा स्वसंविद्देवता एतज्ञापस्यमाणपरादित्रिविधरू
पतया एतया भावनीया त्रैलोक्यमोहनादिनवचक्राणां स्वस्व
नामानुरूपलक्षणफलान्युक्त्वा इदानीं समष्टिचक्रस्य फलमाह

परिपूर्णं महाचक्रमजरामरकारकमिति ।

परिपूर्णं महायोनिमध्यमहाबिंदुस्फुरत्प्रकाशविमर्शसाम
रस्यरूपपराप्रभापटलमय सर्वानंदमयं चक्रं विश्वमयं वि
श्वोत्तीर्णं परामयत्वा दजरामरकारकं अजरः कालत्रयातीत
त्वात् अमर अत एवोत्पत्तिःविनाशरहितत्वात् अजरोमरः
शिवः स्वपूजकस्य कलातीतनित्यपरशिवप्राप्तिलक्षणमि।

त्यर्थः चक्रसंकेतमुपसंहरति ॥

एवमेष महाचक्रसंकेतः परमेश्वरि कथित
स्त्रिपुरादेव्या जीवन्मुक्तिफलप्रदः ॥

एवमुक्तप्रकारेण त्रिपुरादेव्याः सर्वोत्कलनरूपायाः महाचक्रसं
केतः षट्त्रिंशत्तत्त्वचक्ररूपत्वात् महाचक्रे जीवतो मुक्तिर्जीव
न्मुक्तिर्मुक्तिर्हि बंधनान्मोचनं घृणादिपाशाष्टकेन परशिवादि
गुरुपरमदेवतापितत् परमार्थस्वचक्रसंकेतः स्वपरामर्शैक्य
सहसैव सकलपापनाशनेन शिवाहंभावभावनाप्रवर्त
यतीत्यर्थः इति श्रीमत्परमयोगीन्द्रपरमहंसपुण्यानंदशिष्यप
रमहंसममृतानंदशिष्ययोगिप्रवरविरचितायां योगिनीहृदय
दीपिकायां चक्रसंकेतः प्रथमः १ द्वितीयसंकेतं श्रोतृजन
प्रवृत्तये फलप्रतिपादनपूर्वकं वक्तुं प्रतिजानीते ॥

ॐ मंत्रसंकेतकं दिव्यमधुना कथयामि ते यदृ
ज्ञात्रिपुराकारो वीरचक्रेश्वरो भवेदिति ॥

दिव्यप्रकाशविमर्शरूपपरशिवपरशक्तिप्रतिपादनपरत्वात्
मंत्रसंकेतकं मननात्त्रायते साधकमिति मंत्राः चिन्मरीचयः

तद्वाचकत्वाद्देवीवर्णविलासभूतानां सौभाग्यविद्यादीनां मन
न्त्राणां तदुक्तं संकेतपद्धतौ मननात्राणधर्माणो मंत्रोयं परिकी
र्तितेति संकेतं एवं विमलत्वेण प्रकाशात्मकोहं ते विमर्शरूपिण्याः
कथयामि हृदयंगमं तानयामीत्यर्थः यद्ज्ञानाद्यस्य मंत्रसंकेतस्य
वेत्ता ज्ञाता त्रिपुराकारः वेदनं संपरिस्फुरत्परमभट्टारकः वीरच
क्रेश्वरो भवेत् वीराः एवं विकलत्वेणास्तेषां चक्रं समूहस्तस्येश्व
रः परशिवकोर्थः एतन्मंत्रसंकेतप्रतिपादितश्रीविद्यादिमं
त्रार्थस्य स्फूर्तिपदो भावनाप्राशस्त्यशाली परमशिव एव भवेदि
त्यर्थः एवं मंत्रेतरोकरीत्या त्रैलोक्यमोहनादिनवचक्रेश्वरी
मंत्रानेवोपक्रम्य मंत्रसंकेतमारभते ॥

करशुद्धिकरी बाला द्वितीया चात्मरक्षिका । श्री
न्मासनगता देवि तृतीया तदनंतरं । चक्रासन
गता पश्चात्सर्वमंत्रासने स्थिता । साध्यसिद्धास
ना षष्ठी मायालक्ष्मीमयी परा । मूर्तिविद्या च स
देवि सप्तमी परिकीर्तिता । अष्टम्यावाहनी वि।
द्या नवमी भैरवी परा । मूलविद्या तथा ख्याता
त्रैलोक्यवशकारिणीति ।

करशुद्धकरी आत्मतत्त्वमलयोरशुद्धयोरत्रकर्मकरणात्मनोर्द्द

यो॰ योः स्फुरत्तात्त्वलयभावनामयीशुद्धिरात्मकरयोः परामृतेनसमस्तु
ह्व॰ टी॰ हूकरीत्याकर्मेन्द्रियान्तःपातिनोः करयोरन्तरशुद्धत्वान्तर्गतयो
११ रशुद्धयोः स्फुरत्तात्त्वलयभावनाशुद्धिः तत्करीयंविद्यापराहन्ताप्र
३३ तिपादनपरत्वात् अत्रैव वक्ष्यति कर्मेन्द्रियाणांवैमल्याकरशु
द्धिकरीसृष्टेति आद्यात्रैलोक्यमोहनचक्रेश्वरीत्यर्थः नत्वकर
शुद्ध्यादिमन्त्राणांसंख्यामेवकरोति किमितिनोद्धरति उच्यते
वामकेश्वरशास्त्रएवास्योद्धारउक्तः अत्रतत्त्वतात्पर्यप्रतिपादन
परत्वादस्यशास्त्रस्यनमन्त्रोद्धारः क्रियतेइति द्वितीयाचात्म
रक्षिकेति भेदलक्षणविपक्षसंकरोद्धारणपरमिहात्मरक्षणमि
त्यस्मिडकरीत्या भेदप्रपंचलक्षणप्रतिपक्षसंकरात् रक्षामभेद
प्रतीतिरूपांपराहन्ताप्रतिपादनेनचात्मनःकरोति इत्यात्मर।
क्षकाद्वितीयासर्वाशापरिपूरणाख्यो द्वितीयचक्रेश्वरीविद्येय।
त्यर्थः आत्मासनगतादेविरतीयाअष्टचक्रमन्त्रदेवतात्मनांसा
विमर्शमनयत्स्वभासनमितस्समस्तुहूकरीत्या साधकचक्रमन्त्रदे
वतानांस्वसंविद्रूपतयानुसंधानलक्षणामननवत्तृष्टयविद्यात्मा
मादिभूतात्मासनगताविद्यात्तृतीयासर्वसंक्षोभलक्षणात्तृती
यचक्रेश्वरीविद्येत्यर्थः तदनन्तरंचक्रासनगता अनन्तरंचक्र
संकेतकोक्तचक्रसनाथत्वाच्चतुर्थीविद्यासर्वसौभाग्यदायक
लक्षणवत्तुर्थचक्रेश्वरीविद्येत्यर्थः पश्चात्सर्वमन्त्रासनस्थिता
अनन्तरोक्तवासनामननरूपाचिन्मयीविप्रसरादिलावण्य।

देवतामंत्रासनस्थिता पंचमी विद्या सर्वार्थसाधनलक्षणं पंचम
चक्रेश्वरी विद्येत्यर्थः साध्यसिद्धासनाषष्ठी सर्वपीठनिवासिनः
सर्वगास्थिन्मरीचयः रस्मालावत्पराकारारन्तेतकुलमातर इ
ति प्रमाणवचनो मरीत्यादिन्मरीच्यावरणदेवताः साध्याः स
मस्तं त्रिकोणादिषोडशदलान्तचक्रपदगताश्चत्वरश्चत्रय।
पदगताश्च देवताः सृष्टिक्रमरूपत्वात् साध्याः तदुक्तमत्रैव सृ
ष्टिं संस्थं नवधन्यादिश्चांतं संहृतिपुनः इत्यादि नवयोन्यंत
मिति प्रत्रसिद्धिसंहारः तदुक्तं श्रीप्रतिभिन्ताहृदये विन्तिः स्व
तंत्राविश्वसिद्धिहेतुरिति एवं सृष्टिसंहारक्रमेणानुसंधीयमा
नानां साध्यसिद्धावरणदेवतानामासने स्थिता विद्या साध्यसि
द्धासनाषष्ठी सर्वारत्नाकरनामधेयषष्ठचक्रेश्वरी विद्येत्यर्थः
मायालक्ष्मीमयी पराम्मूर्तिविद्या च सा देवि सप्तमी परिकीर्तिते
ति अस्या विद्याया वक्त्यतीशाष्टे प्रवृत्तत्वादत्रोद्धारः क्रिय
ते माया भुवनेश्वरीबीजं लक्ष्मी श्रीबीजं तन्मयी तत्प्रत्राता हृद्यो
र्ध्वगता पराचत्वरंशायुतं भद्रेति त्र्यक्षीशांतसमन्वितं तृतीयं ब्रह्म
सत्रोणिहृदये भैरवात्मनः इतिपराविंशकोक्तबीजं परावाच
कत्वात् तद्बीजत्रयात्मिका मूर्त्तिविद्या च सा सप्तमी सर्वरोगहरा
भिधानचक्रेश्वरी विद्येत्यर्थः अष्टम्यावाहनी विद्या अंतरस्य नि
जं संविदात्मनो मातृरत्नाकरणात्मनावहिर्देयं संविदिसमर्प्प।
णं सदावाहनं समरसत्वमोक्षणमित्यस्मडकरीत्या हृदयकम

यो· लकर्णिकामध्यस्फुरत्त्वाः सविकल्पायाः आत्मा मनसा संयुज्यते
हृ·टी· मन इन्द्रियेणेन्द्रियमर्थेनेति तेजोऽन्तो रक्तपरिणामस्य बहिः प्रसार
३४ लक्षणवाहनविहिताष्टमी सर्वसिद्धिप्रदाभिधानाष्टचक्रेश्वरीवि
34 द्येत्यर्थः नवमी भैरवी परा भैरवी विश्वस्य भरणान्नियति हेतुत
या रक्षणात्परिचिन्मात्रपर्यवसानलक्षणसंहारकारणतया
वमनात्सृष्टिहेतुतया च नवभैरवी वतः शास्त्रेणोक्ता किमित्य
त्रनोक्ता समस्तचक्रेश्वरीविद्या चोद्धृतेत्यत आह ॥

मूलविद्या तथा प्रोक्ता त्रैलोक्यवशकारिणीति

मूलं विश्वस्य शिवादेर्भूम्यन्तस्य षट्त्रिंशत्तत्त्वात्मनः प्रकाशवि।
मर्शसामरस्यरूपं तेजो वेदयतीति मूलविद्या तथा प्रोक्ता भैर
वी कथिता नाम्ना अस्यास्त्रैलोक्येत्यनेनाद्याद्योद्धारः अस्यथा स
नवचक्रेश्वरीवदत्रोद्धरेत् वक्ष्यति मूलेन व्यापकन्यासः कर्तव्यः
परमेश्वरीति त्रैलोक्यमुक्तलक्षणं वशीकरोति सर्जनसंहारैः
स्वायत्तं करोतीति वक्ष्यमाणसृष्टासंकेतचक्रयोगपमपिन्या
संनवचक्रेश्वरीविद्यानां प्रसंगात्मोद्धृकस्तिन्यायेनाह

एवं चक्रप्रकारास्तु संज्ञा कालेप्ययत्नतः एताः
क्रमेणान्यस्तव्याः साधकेन कुलेश्वरीति ॥

एवमुक्तप्रकारेण नवप्रकारात्मना चक्रेश्वरीविद्याः साधकेनैत
द्विद्याभ्यासकेन मोक्षमात्मनः साधयितुमिच्छता कुलेश्वरि कुल
मेयमाननमात्ररूपं तदुक्तं चिद्गगनचन्द्रिकायां मेयमाननमितिल
क्षणं कुलशोभनतो भजति यत्र विश्रममिति तस्य सर्जने संहारे च
श्वरी प्रवृत्तिः यथोर्णनाभः सृजते ग्रसते चेति आज्ञावतारे
ऽप्युक्तं स्वेच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपि इति एताकाल
वक्ष्यमाणसंकेतेन क्रमः पर्यायप्रयत्नात् प्रयत्नस्तदभिव्याप्तो।
व्यापारो तिनवात्मिका इति तं ज्ञातरोक्तरीत्या प्रस्तावेशितया क्र
मेण न्यस्तव्याः तन्न्यासानाह ॥

पादाग्रे जानुजान्वूरुगुह्यलिंगाग्रकेषु च आ
धारे बिन्दौ सेन्मूर्तिं तस्यामावाहनीं न्यसेत् मू
लेन व्यापकन्यासः कर्तव्यः परमेश्वरीति ॥

पादाग्रे जानुजान्वूरु इति स्पष्टः आधारे बिन्दौ सेन्मूर्तिपादादीनां
वाह्यत्वेन प्रसिद्धत्वात् पृथक्करणमाधारमूर्त्योरान्तरत्वं द्योत
नार्थं आधारपद्मे चक्रे चतुर्दले मूर्तिं मूर्तिविद्यां न्यसेत्स्मरेत् प्र
संगात् तत्रैव वाहनीं न्यसेत् मूलेन व्यापकन्यासः कर्तव्यः परमे
श्वरि मूलेन नवचक्रेश्वरीविद्यया सौभाग्यविद्ययेति यावत् स
र्वमन्यत् नवचक्रेश्वरीविद्यानां सङ्केतादाधारनवचक्राणां।

चिंतालत्तणमोंतरन्यासमाह ॥

अकुलादिषुपूर्वोक्तस्थानेषुपरिचिंतयेत् चक्रे
श्वरीसमायुक्तंनवचक्रंपरोहितमिति ॥

अकुलादिषुअकुलेषुविषुसंज्ञेचेमत्रपूर्वोक्तस्थानेषु आदि
शब्देनाष्टौवह्निशक्रनाभिनाहतविशुद्धलंबिकाग्रभ्रूवोंतर
बिंदवोगृह्यंते पूर्वोदितंचक्रमेकैकेनोदितंनवचक्रंचक्रेश्वरीस
मायुक्तं नवचक्रेश्वर्यधिष्ठितंपरिचिंतयेत् अकुलेसुषुम्णा
मूलभागसहस्रदलकमलेत्रिपुराधिष्ठितंत्रैलोक्यमोहनंच
क्रं वज्राख्याधारेचतुर्दलकमलेत्रिपुरेश्वरीयुक्तं सर्वाशापरि
पूरणंचक्रंशाक्तेस्वाधिष्ठानस्थितषट्दलकमलेत्रिपुरसुंद
र्यधिष्ठितंसर्वसंक्षोभकंचक्रं नाभौदशदलकमलेत्रिपुर
वासिन्यधिष्ठितंसर्वसौभाग्यदायकंचक्रं अनाहतेहृदिद्वा
दशदलकमलेत्रिपुराश्रीममधिष्ठितंसर्वार्थसाधकंचक्रं वि
शुद्धेषोडशदलकमलेत्रिपुरमालिन्यधिष्ठितंसर्वरक्षाक
रंचक्रं लंबिकाग्रेअष्टदलकमलेत्रिपुरासिद्धाधिष्ठितंसर्व
रोगहरंचक्रं भ्रूवोंतरेद्विदलकमलेत्रिपुरांबिकाधिष्ठितं
सर्वसिद्धिप्रदायकंचक्रं इंदौललाटेबिंदौमहात्रिपुरसुंद
र्यधिष्ठितंसर्वानंदकरंचक्रंभावयेदित्यर्थः पूर्वोक्तविधा

तांनवचक्रेश्वरीणांन्यासमाह ॥

तत्राद्यात्रिपुरादेवी द्वितीयात्रिपुरेश्वरी तृतीया
चतथाप्रोक्तादेवीत्रिपुरसुंदरी चतुर्थीचमहा।
देविदेवीत्रिपुरवासिनी पंचमीत्रिपुराश्रीःस्या
त्षष्ठीत्रिपुरमालिनी सप्तमीत्रिपुरासिद्धिरष्ट
मीत्रिपुरांबिका नवमीतुमहादेविमहात्रिपुरसुं
दरीति ॥

स्पष्टम् नवैताश्चविद्यानवचक्रेश्वर्यपादादिषुकुलस्थानेषुरू
पेणभावनारूपेणचक्रेन्यस्तव्याएवनेत्याह ॥

एतत्त्रयेषुक्रमादेतानवचक्रेषूदितइति ॥

एतास्त्रिपुराविद्यानवचक्रेश्वरीःपुरोदितेत्रैलोक्यमोहनेचक्र
मित्यादि सर्वोक्तेनवचक्रइत्येकवचनम् अन्योन्याविश्लेषक
थनार्थंश्रकुलादिनवस्थानेषु अन्योन्यसंयुक्ततयैवविभावि
तेषुनवचक्रेष्वित्यर्थः क्रमात्त्रयेषु त्रैलोक्यमोहनेचक्र।
मारभ्यप्रतिचक्रमेकैकशःजयेदित्यर्थः नतुकिमासांनव।
धात्वंस्वाभाविकंनेत्याह ॥

एवंनवप्रकाराद्याप्रजाकालेतुपार्वति एककाला

यो॰
हृ॰ टी॰
३६
36

ह्यादिशक्तिराजरामृत्युकारिणीति ॥

आद्याशिवादित्रिंशत्तत्त्वजगतोनिदानत्वात् आद्यशक्तिः आ
द्यस्य सकलवर्णादिभूतस्य प्रकाशात्मनः परशिवस्य शक्ति
विमर्शिनीएकाकारा तेन निरंतरसामरस्यसमापन्नापरासृजा
कालेनतथानभवति एवमुक्तप्रकारेणनवप्रकारनवधा
भिन्ना एवंविधस्य जनकस्याजरामरकारिणी अजरामरत्वल
क्षणः शिवः तत्त्वमस्य करोति अत्रैव वक्ष्यति नवनित्योदिता
सृजा त्रिभिर्भेदैर्व्यवस्थितेति प्रासंगिकमुपसंहृत्यप्रकृतमा
मेवप्रधानंमंत्रसंकेतमुद्दिशति ॥

मंत्रसंकेतकस्यास्य नानाकारो व्यवस्थितः ना
नामंत्रक्रमेणैव पारम्पर्येण लभ्यते इति ॥

तस्याःपरमशिवसामरस्यरूपायाःपरायायोमंत्रः सौभाग्य
विद्यारूपाः तस्यसंकेतोरहस्यार्थप्रदर्शनंनानाकारोनंतरवा
लक्षणषट्विधरूपः नानामंत्रक्रमेणैवनंतरंह्स्वीं ककरा
आद्यादिनानाप्रपंचपरिपाट्यैवपारंपर्येणलभ्यते सोपानव
रोहरीत्याशिवादितत्त्वरूपपर्यंतंपरंपरोपदेशक्रमेणलभ्यते
नान्यथापारंपर्यविहीनानामसंप्रदायवतांतुवुनहृत्याचौर्य

गतान्तरपारम्पर्योपस्थितानामनर्थायैवकेवलमिमर्थः
अत्रैववक्ष्यति पारंपर्यविहीनायेज्ञानमात्रेणगर्विताः तेषां
समवलोपेनविकुर्वंतिमरीचयइति उद्दिष्टसमंत्रसंकेतस्य
विभागंप्रतिजानीते ॥

षड्विधस्तत्तदेवेशिकथयामितवानघेइति

षड्विधअनेनवक्ष्यमाणभावार्थादिप्रकारेण षड्विधः अ
नघेपरशिष्यत्वादिदोषरहिते तेनतवमदंशरूपायाविमर्श
शक्तेःप्रकाशात्मकोहंकथयामितद्विभागमाह ॥

भावार्थःसंप्रदायार्थोनिगर्भार्थश्चकौलिकः
तथासर्वरहस्यार्थोमहातत्त्वार्थएवचेति ॥

वक्ष्यमाणलक्षणानामप्यर्थः षोढादित्यासक्रमेणलक्ष
णानिकथयिष्यन्नादौभावार्थमाह ॥

अक्षरार्थोहिभावार्थःकेवलःपरमेश्वरि

नक्षरंतीत्यक्षराणिनित्यपरशिववाचकत्वात् किंचतात्वे

यो॰ शक्त्यापारोभिव्यंजकस्तेषां अंतपवर्त्तराण्यवान्तराणितेषाम
हृ॰ टी॰ र्थेभिधेयः श्रीसौभाग्यविद्यावयवपंचदशान्तराणामर्थोभा
३२ वार्थः अन्तरार्थमेवाह ॥

37

योगिनीभिस्तथावीरैर्वीरेन्द्रैः सर्वदाप्रिये शि
वशक्तिसमायोगाज्जनितो मंत्रराजक इति ॥

योगिन्यः योगः शिवसंबंधनित्यं विद्यते आसामिति योगिन्य
विमर्शशक्तेश्च भूतेच्छाज्ञानक्रियात्मकभागापृथिवीरुद्राण्यः
वीराः उत्कार्थाः न योगिनीनित्यसंबंधभूताः प्रकाशांशभूताः
वामाज्येष्ठारौद्र्यात्मकब्रह्मविष्णुरुद्राः सृष्टिस्थितिसंहारकर्त्ता
रवीरेंद्राः सृष्टिस्थितिसंहारकर्त्तारो वीरेंद्राः सृष्टिस्थितिसं
हारयादीनानाख्याकारिणः शांतोविकात्मानः शिवशक्ति
मिथुनत्रयसमष्टिरूपात्रिबीजशिखरवर्त्तिकामकलात्रयाभि
धेयाघतैर्विद्यान्तराभिधेयमर्थैर्मिथुनवत्तदृष्टैः शिवशक्ति
समायोगाच्छिवशक्त्योः समागमः संपर्कस्तन्मिथुनीकृत्य
मंत्रराजकः सौभाग्यविद्यारूपः सकलमंत्रोत्तमत्वाज्जनितः
कालाग्न्यादिकर्मिणिकः जाताः भावितयन्ति यावत् तस्यार्थ
स्यनित्यत्वात् अयमेवार्थो मायासौभाग्यसपोदयेप्रपंचितः
यथामेवमहाविद्यात्मामातावत्तरत्वयेकविश्रांतिः वत्तरा

ननादिजननीजाताचतुरात्मवर्गफलदात्रीअन्तरविमर्शरूपो
सोंशोभिन्ना चतुष्कलीमेवंवामादीक्षादिमयात्मकोहंहृदात्म
मूनिचवर्णश्रवामांशोब्रह्मास्यादिक्षेवैतस्यभारतीशक्तिः अन
योरेतन्मिथुनंसृष्टिःप्रागवाग्भवात्मकंवीजंजज्ञेप्शोशोविष्णुःस्या
त्तानाविश्वंभरातयोर्मिथुनं इदमेवदक्षिणायत्वयारूपं श्रीका
मराजमध्यात्तैत्तीरूपात्मकस्तुरुद्रः क्रियामयीशक्तिरस्यरुद्रा
णीयुगलमिदंतार्त्तीयंवीजंजनयति पश्चिमाम्नायःस्यादेवि।
कास्वरूपः शंभुःशांतात्मिकास्यशक्तिःस्यात् मिथुनमिदंशिव
शक्त्योरुत्तरसमयात्मत्रयमपितिष्ठेत् एवमत्तुत्तरशक्त्योस्तत
र्शहंहरूपिणी पराजाताचत्वरत्वात्मिकेयं पश्यंतीमातृकाम
यीविद्यासृष्टिःपूर्वाम्नायोवाग्भववीजंतदात्मकंत्रिविधं सृ
ष्टिस्थितिसंहारैर्भिन्नासृष्टिस्त्रिमूर्तिमूर्तिःस्यात् ब्रह्मात्रसृष्टि
सृष्टावधिपतिरेतस्यभारतीशक्तिः सोयंहस्यार्थस्यात्मएव।
शिवशक्तिवाचिकस्यापिमस्यार्थः स्यादत्रशक्तिमयरूपमाणि
संयोगात् सृष्टिस्थितौतत्रविष्णुःकर्ताविश्वंभरास्यशक्तिःस्यात्
विष्णुःकालपरार्थोललितेरेतस्यशक्तिःस्यात् रुद्रोधिपतिः
शक्तिरौद्रीस्यात् तत्रसृष्टिःसंहारेहरवर्णयुगलमनयोवाच
मर्थोत्रस्यरुद्रस्यात् रुद्राहारंसंपर्काद्दैर्णतश्छक्तिरत्रहस्यात्
अत्रैतशानवर्णस्यप्राधान्यंशक्तिवीजभूतत्वात् अथिवमतःशि
वशक्तीसर्गांनात्यंतयोः स्वमयीकामकलाकलयित्रीत्वयम

यो॰ धीरकण्ठक्रमिश्चनतुः रक्तोविंदुः शुक्लः शंभुपरस्त्वेकार्थेन्
हृ॰ टी॰ एवं द्वितीयवीजं स्थितिरूपं दर्शितमन्वयात्मत्वात् सृष्टिस्थिसा
३८ दिद्विभेदा इवसंतित्ता एवदेवतास्त्र्यक्षरकस्वर्णाम मध्यस्थितो
38 यकारः स्थितिस्वरूपत्वमस्य द्योतयति परधनिरूपः संविदव
ग्रकारः संहारात्मकपश्चिममय्ये तत्तद्देवतानीये संहृतिस
ष्ट्यादिवशात्तापवाद्यपि देवतान्यवसन् सृष्टौ शक्तेर्नियतत्वा
यान्तास्य शक्तिवीजवत्वात् साक्षात्संहृत्य सृष्टौ शिवमंतभावभा
सते शक्तिः त्रिमयेतद्वीजेनाख्यारूपेतरान्वयात्मनितो शक्ति
शिवावपि वसतो निरंतरं सामरस्यमापन्नौ सृष्ट्यादिभेदभिन्न
श्रीविद्यावर्णयुगलनवकात्मनवनादवर्गरूपामातसामध्य
माभियाविततः शब्दस्पर्शरूपरसगंधोचेति भूतस्त्वाण्यवा
प्यव्यापकभावात्संचदशास्तुः क्रमेणानत्संख्यातिवयस्यकला
नित्यास्तदात्मिकाः स्तत्थैव तत्संख्याः वर्णाः समष्टिरेषा वि
द्या व्याप्नोति तानि सर्वाणि सर्गादिस्थितिरूपः स्वांशैरेण्डभि
स्तदात्मना विततः सर्गेणकादिवर्णैरपि षट्त्रिंशद्धात्मनो
वयवैः पुनरव्यंजनविंदुप्रभेदभिन्नो स्तदत्तरवयवान् षट्त्रिं
शत्संख्याकास्तत्त्वन्नुते हि सामाता व्यष्टिसमष्टिभेदस्त्वत्रा
त्मातत्ववीजपीठमयीवत्तरन्वयात्मनापिचमातात्ष्टकमात्र
कामयीविद्येति तृतीयमंत्रस्यार्थमाह ॥

तन्मयींपरमानंदनंदितांस्पंदरूपिणीं नि
सर्गसुंदरींदेवींज्ञात्वास्वैरमुपासते इति ।

तन्मयीभारत्यादिब्रह्मादिवर्णमिथुनवाचकबीजत्रयसम
ष्टिरूपवाच्यांपरमानंदनंदितांपरमशिवसामरस्यपरिस्फुर
त्परमानंदविभेदिनीं स्पंदरूपिणींशिवादितत्त्वषट्त्रिंश
तत्त्वस्पंदरूपिणींनिसर्गसुंदरीं सर्वप्राणिष्वात्मतया प्रेमा
स्पदीभूतांमहात्रिपुरसुंदरीं प्रकाशविमर्शसामरस्यरूपा
पन्नांज्ञात्वाज्ञानात्मतयास्वैरमुपासतेस्वेच्छयाविहरंति स
दाचारंविहरंतीत्यर्थः अत्रैववक्ष्यति स्वैराचारेणसंपूज्या
वहंतेदंतयोस्समेति मंत्रशास्त्रार्थमाह ॥

शिवशक्त्यात्मसंघट्टरूपेबलिनिशाम्यते न
न्यथाप्रसराशेषभुविविघ्नोपलक्षिते ज्ञात्वैनां
नमयाकारकारणात्मत्रयरूपिणीमिति ।

शिवशक्त्यात्मसंघट्टशिवशक्त्यात्मनोःप्रकाशविमर्शयोः
संघट्टःसामरस्यं तद्रूपेबलिनिहृदिहृद्वाविमर्शनाद्वातोः
हृत्त्वादात्मतत्त्वस्यात्मैव बलिर्मिवैयात्मिकतंग्रोकरीत्या
सर्वप्राणिष्वात्मनिशाम्यतेभूतभविष्यत्कालशालिनितत्त्व

यो॰
हृ॰ टी॰
३९
39

याप्रसराशेषभुवितत्त्वेन प्रकाशात्मापरास्फुरणे तदुक्तंभ
गवद्गीतासु ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति
शिवस्य प्रकाशस्य प्रथा विमर्शशक्तिः यथा दीपस्य तत्प्रथायाः
प्रसरः षट्त्रिंशत्तत्त्वात्मना परिणामः तस्याशेषाशिवतावस्था
वनतया पर्यवसानं तस्य भुवि विश्रामस्थाने अत्र श्रुतिः सर्वं खल्वि
दं ब्रह्मेति तज्जलानीति शान्त उपासीतेति परमेश्वर्यवानिन्द्रः अ
त्र श्रुतिः इन्द्रो मायाभिः पुरुरूप ईयत इति तत्सर्वं इदं कमित्येतो
पलक्षितैकाक्षरवदेवदत्तगृहमितिवदित्थं सर्जनादिव्यवहारः
अस्योपलक्षणं ततस्तद्रूपं परमेश्वरेति यावत् प्रकाशविमर्शसाम
रस्यरूपे नित्ये विश्वसृष्टिस्थितिसंहारकारिणि तत्स्वरूपात्म
कमहेश्वर्यपरामृष्टे परमात्मनि विषये तात्पर्यादरनैरन्तर्यपा
टवाभ्याससद्भावनत्प्रकर्षलक्षणं मननं ततस्तन्मायाकारका
रणलक्षणत्राणात्मन्त्ररूपिणी कोऽर्थः उक्तविशेषणपरप्रका
शविषयमननात्मसाधकं तन्मयरूपताप्रतिपादनेन त्रायते३।
तिनिरुक्तान्तरीयलक्षणमहामन्त्ररूपिणीमित्यर्थः तदुक्तलक्ष
णविमर्शविशेषिकान्तरीयमन्त्ररूपिणी किल लक्षणीयेत्यतस्तत्राह

तेषां समष्टिरूपेण पराशक्तिस्तु मातृकेति।

तत्सर्वमिति पूर्वोक्तमेव तेषां ब्रह्मादीनां भारत्यादीनां च समष्टि

दिसमष्टिरूपेणालत्तणेनलत्तितापराशक्तिः तत्रवथारणेप
राशक्तिरेवनतस्यकार्यंकरणंचविद्यतेनतत्समश्चाभ्यधिक
श्चदृश्यते परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकेज्ञानवलक्रि
याचेति इतिश्रुतिप्रतिपादितापरैवमातृकाप्रखिलमना
हतमूर्तिर्मातृवर्णस्वरूपिणीभवति कायतिनानानामरूपे
चरूपेणमातृकादेवी इत्यस्मद्गुरुरीत्यामातृकापश्यंतीमध्य
मावैखरीरूपेणग्राहतात्रश्रुतिः चत्वारिवाक्परिमितापदा
नितानिविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंग
यंतितुरीयवाचोमनुष्यावदंतीतिकोर्थः ब्रह्मादिसर्वविश्वर
समष्टिरूपतालत्तणपश्यंतीमध्यमावैखरीविस्तारप्रकाश।
विमर्शसामरस्यरूपात्तुरीयपदमंत्रवाक्यस्मकम् तद्दर्णाहृदयमं
त्रेऽत्रनिवसतिनवेदेतत्त्वंत्रस्यतद्दर्णाहृदयवाच्यस्यकःसेवे
यस्मान्नत्राह॥

मध्यविंदुविसर्गांतःसमास्थानमयेपरे कूटि
लारूपकैतस्याः प्रतिरूपेवियत्कलेइति ॥

तस्याःपरायाःमध्यविंदुविसर्गांतःसमास्थानमयेमध्यविंदु
रूर्ध्वविंदुःअकारहकारसामरस्यरूपः कामाख्यः तदुक्तंकामक
लाविलासे विंदुरहंकारात्मारविरेतन्मिथुनसमरसाकारःका
मःकमनीयतीतिविसर्गश्चविंदुद्वयासमरूपंहिंहद्वयासमरूपंविंदु

यो॰ हृ॰ टी॰ ५॰ 40

हृदयं न त्वकारः तदुक्तं तत्रैव कलावदहनेन्दुविग्रहो विंदुरस्तित।
योरंतः कामाख्यकलयोर्द्वयोरपि मध्ये समास्थानमये निवास
रूपे परे अहान्तरे वर्णानामाद्यंतत्वात् अन्यायेतया आदेरकार
स्यपरत्वमाद्यपेतयांतस्य हकारस्यपरत्वं तेन परेतरेव्यापिना
माद्यंतेकारहकाररूपेअन्तरेकथ्यते कुटिलारूपिके कुटिले
अकुल अकुलकुंडलिन्यौ कुटिलरूपत्वात्तत्तद्रूपे तयोः प्रतिविं
वरूपे वियत्कले वियच्छब्देन श्रूयंलसते तेन वियद्विंदुःकला
विंदुरर्धहृदयमात्रावती हकारलिपिः कोर्थः शिवशक्तिसामर।
स्यरूपमयोर्धविंदंतर्गतो निवसति हकारः तस्य व्याप्तरूपक
लात्तरावयवविंदुहृदयान्तर्गतमात्रारूपेनिवसतो हे हृद्याद्या।
तेरअकुलकुलकुंडलिनीरूपेपरापररूपेतदवयवत्वात्तयोः
परारूपयोः प्रतिविंवरूपे विंदुहकारान्तरे अकारहकारयोः स्म
रणसस्फुरितत्वादित्यर्थः मंत्रनिगमभूतकामकलाया अकार
हकारयोः स्थितमुत्पाद्येवंनी मंत्रेतद्वर्णद्वयस्थितिक्रमेणाह

मध्यप्राणप्रथारूपस्पर्शाद्योम्निस्थिता ।
पुनः मध्यमे मंत्रपिंडे त्विति ॥

मध्यमे मंत्रपिंडे वाग्भवशक्तिबीजयोर्मध्यगते कामराजाख्ये पर
तरपिंडे मध्यप्राणप्रथारूपस्पंदव्योम्निस्थितो मध्यमप्राणः का

सकलायोगतबिंदुद्वयमध्यगतप्राणोहकारस्तस्यप्रथ्याप्र।
युतेनप्रतीतिः स्मृतिगोचरत्वात्तद्रूपसंदृष्योमहकारः तस्मि
न्व्योम्निभुवनस्थिताहकारस्यविमर्शशक्तिस्फूर्तिमयत्वात् तदु
क्तंसंकेतपद्धत्यां हकारैस्तःकलारूपोविमर्शाख्यःप्रकीर्तित।
इति ॥

तृतीयपिंडकेपुनः राङ्कूटद्वयस्फूर्जेदिति

तृतीयपिंडकेशक्तिबीजेचतुरक्षरपिंडेपुनस्थार्थः द्वितीयबीज
वत्स्फुटभावेनस्फुरतिकिंतु राङ्कूटद्वयस्फूर्जेत् राङ्कूटं
शषसहानांवर्णानांवर्गः तथाच पंचकूटंषट्कूटमिति राङ्।
कूटद्वयोवर्णः द्वितीयादन्यस्तृतीयःसकारःतद्वर्गस्तृतीयव
र्णत्वात् षोडशान्यासशषसहाराङ्वर्गः अत्रैववक्ष्यति वक्रेशा
दिचतुर्वर्णैःसहितंराङ्मेवचेति पुनःराङ्कूटद्वयस्फूर्जेदि
तिराङ्कूटेतृतीयसकारोपरि अविभागेनस्फूर्जेत्प्रकाशस
मानंसकलवर्णौघमतुनरान्तरं तदुक्तंसंकेतपद्धत्यां अकारः
सर्ववर्णाग्र्यप्रकाशःपरमःशिवइति परावयवभूताकारह
काराववकामकलोर्ध्वबिंदोमात्रायांचेति स्थिताप्युनःस्थूल।
भावमासाद्यपृथग्भूतोकामराजबीजांतर्गतककारलकारमध्य
गतहकारे शक्तिबीजादिगतसकारोगतासकारेचनिवसतइ
त्यर्थः तत्रमध्यपिंडेतृतीयपिंडेचपरावयवभूतयोरकारयो

यो॰ रेखास्थानमुक्तं प्रथमबीजे किमिति नोक्तं उच्यते दक्षिणस्रोतः
हृ॰ टी॰ प्रतिपादिन्याः सौभाग्यदेवतायाः परापरशक्तिस्वरूपत्वात्
४१ स्थितेश्च परापरशक्तिचितत्वात् मध्यबीजस्य स्थितिरूपत्वात्
41 तत्र विमर्शशक्तौ रेखास्थानमुक्तं शिवस्य संहाररूपत्वाच्छक्ति-
बीजस्य च संहारात्मकत्वात् प्रकाशस्य च तत्रावस्थानमुक्तं वि-
शेषेण सामान्यतस्तु वाग्भवे अत एव तदक्षरद्वयसंभवात्
तद्विश्वमयत्वे परायाः कथितमित्याह ॥

वलतासंस्थितस्यात्र धर्माधर्मस्य वाच्यस्य
विषामृतमयस्य च वाचकत्वरसंपुटैः
कथिता विश्वरूपिणीति ।

चलतो भावश्चलता अस्यां संस्थितस्य चलत्वेन नाम नश्वर-
त्वमत्र विशिष्टक्रियाविद्यावत्त्वादि सकलप्रपंचस्थितस्य
धर्माधर्मस्य पूर्वोक्तधर्माधर्मनिर्वचनधर्माधर्मपदवाच्यशिव-
शक्तिद्वयस्य विषामृतमयस्य विषं संसारो मोहहेतुत्वात्
अमृतं मृतं मरणं तद्रहितत्वान्मुक्तिः अत्र श्रुतिः तमेवं वि-
द्वानमृत इह भवतीति तन्मयस्य तदुभयहेतुत्वात् तयोर्वा-
च्यस्याभिधेयस्य वाचकाक्षरसंपुटैस्तदुभयात्मकशिवश-
क्तिमयवाच्यवाचकाकारहकारसंयोगाद्विश्वरूपिणी विद्या

चक्रतत्वादिमयरूपिणी अत एव ॥

तेषां समष्टिरूपेण परां शक्तिं तु मातृकाम्

तेषां सर्वेषां समष्टिरूपेण त्रित्रिमयेन सर्वेण परां विश्वो
त्तीर्णस्य परशिवस्य मातृकाशक्तिनिर्वचनाम् ॥

कूटत्रयात्मिकां देवीं समष्टिव्यष्टिरूपिणीमिति

वाग्भवकामराजशक्तिबीजात्मिकां देवीं प्रकाशविमर्श
सामरस्यरूपामत एव समष्टिव्यष्टिरूपिणीं कूटत्रयात्म
नाव्यष्टिरूपिणीम् ॥

आद्यां शक्तिं भावयन्तो भावार्थ इति मन्वत इति

आद्यां शक्तिं सकलजगदादिभूततया इति पूर्वोक्तक्रमेण
भावयन्तो योगिनो भावार्थं मन्वते भावार्थमुक्त्वेदानीं संप्र
दायार्थमाह

संप्रदायो महाबोधरूपो गुरुमुखे स्थितः वि
द्याकौलप्रधानायात्ममहत्त्वे च यदाश्रयमिति ॥

यो॰
हृ॰ टी॰
४२
42

सम्यग्व्याख्यानकर्त्रे शिष्यस्य प्रदीयत इति संप्रदायः महाबो
धरूपः महतो देशकालाकारैरनवच्छिन्नप्रकाशस्य बोधः प
रिज्ञानं रूपमस्य गुरुमुखे स्थितः शृणोति तत्त्वमात्मीयमात्मीकृ
तजगत्त्रयं उपायोपेयरूपाय शिवाय गुरवे नमः इत्यभिज्ञ
क्तवचनोक्तरीत्यात्मपरमात्मप्रकटनपरगुरुमूर्त्तस्यैव मुखे
स्थितः नानास्थानाकलितागमशास्त्रस्यानधिगताखिलवेद
वेदांगस्यानवधारितपरमार्थस्य मुखे स्थितः अनुप्रमाणवा
चनं सर्वतो हि शिवो वेत्ति सर्वमस्य हितं तत्त्वं तेनासौ नात्र रू
रूपेणाति किंचिज्ञस्य गुरोर्गिरा इत्यत्र गुरोरिति गुरुमानिनः
किंचिज्ञस्य गुरुत्वाभावात् विश्वशिवादितिमंते षट्त्रिंशत्त
त्त्वात्मकं तदाकारप्रथाविच्छित्तिः अनुस्मृतिः स्मरतोलो
कानिति स्मरतेति तस्या महत्त्वं तदाकारत्वं तदाश्रयं कोर्थः
परशिवसामरस्यरूपायाः परायाबीजत्रयरूपेण परिणताया
विश्वमयतावासनागुरुमुखेनैव लभ्यत इत्यर्थः विश्वाकार
प्रथायास्तन्महत्त्वं च यदाश्रयमित्यस्यैवार्थे विश्व एव तत्कथ्या
थीस्य महत्त्वादनंतस्यावधानतयाख्यातव्यमित्याह ॥

शिवशक्त्यात्मयामूलविद्यया परमेश्वरि जग
त्कृत्स्नं यथा व्याप्तं पूर्णया व्याहृतः प्रिये
इति ॥

शिवो कारः शक्तिरीकारः ताभ्यामीहितं भूतं यस्याः सा तथा विधया पूर्वोक्तरीत्या प्रथमया मूलविद्यया कृत्स्नं जगदेव भूतं तथा आत्मस्वरूपप्रकाशेनेति अतएव तां सावहितां मन्तस्वा वधानचूर्णे विद्यां विधामात्मनमेव प्रतिजानीते ॥

पंचभूतमयं विश्वं तन्मयी सा सनातनी तन्म यी मूलविद्या च तथा च कथयामि ते इति ॥

पंचभूतमयं विश्वं भूतानि पृथिव्यप्तेजो वाय्वाकाशः विश्व मुकलतत्त्वं सा परा सौभाग्यदेवता तन्मयी पंचभूतात्मिका मूलविद्यापि तन्मयी तद्वाचिका देवता वाचिका पंचभूतवा चिका अतएव तदुभयमयीं तत्प्रकारं कथयामीत्यर्थः त द्वैतस्मादात्मन आकाशः संभूत आकाशाद्वायुः वायोरग्नि रग्नेरापः अद्भ्यः पृथिवीत्युपनिषद्क्तरीत्या प्रकाशात्मका त्परमशिवात्पंचभूतानामुत्पत्तिः विमर्शात्मिकायाः शक्ते स्तद्वाचकानां विद्यावर्णानामुत्पत्तिरिति हि स्थितिः एवं स्थिते स्याः किं वाच्यं किं वाचकमिति शंकां परिहरन्वर्णभू तसृष्टिप्रतिपादनप्रसंगं विश्वमयतामेवाह ॥

हकाराद्व्योमसंभूतं ककारात्तु प्रभंजनः रेफा

दग्निः सकाराच्च जलतत्त्वस्य संभवः लका
रात्पृथिवी जातस्तस्माद्विश्वमयी च मेति ।

हकाराद्व्योमसंभूतं प्रथमं विमर्शशक्तेराकाशवाचको हका
रो जातस्तदनंतरं तद्धाद्व्योमप्रकाशात्मनः परमशिवात्संभू
तं पश्चाद्वायुवाचकः ककारो जातः ककारानंतरं ककारवा
युः प्रभंजनो जातः पश्चादग्निवाचको रेफः संजातस्तदनंतरं
रेफवाचकोग्निः संभूतः पुनर्जलतत्त्ववाचकः सकारः संजातः
सकाराज्जलतत्त्वं संभूतं तदनंतरं पृथिवीवाचको लकारो ।
जातः लकारात्पृथिवी जातेत्यर्थः यस्माच्छिवशक्तिसामर
स्यरूपपरावयवरूपप्रकाशविमर्शाभ्यां पंचभूतानि तदक्ष
राणि च जातानि तस्मादुभयसामरस्यरूपा मा परावय
वभूतभूतवर्णमयविश्वमयीत्यर्थः तदुक्तं कामकलावि
लासे स्फुरन्नादकलाबिंदोर्नादब्रह्माह्वयोरवो व्योमकः तस्मा
द्गगनसमीरणदहनोदकभूमिवर्णसंभूतिः शृणु विषदा
दपि बिंदोर्गगनानिलवह्निवारिभूमिजनिः पततंचकवि
क्षतिर्जगदिदमणव घनोऽयं पर्यंतम् पातामानमेये बिंदुत्र
यविलसद्बीजरूपाणि धामत्रय पीठत्रय शक्तित्रयभेदादम्बा ।
विताम्यपि चैते पुनक्रमेणालिंगत्रितयं तद्वच्च मातृकात्रितयं
इत्थं त्रिमयतरीये बीजे पीठादिभेदिनी विधेति तत्त्वं च वि ।

यत्क्रमेण विद्यायां वर्णाः किमिति न स्थिताः उच्यते सत्यमेवं
विपक्रमो भवति तथापि पूर्वोक्तसृष्टिस्थितिसंहाराख्यावा
भासनार्थम् विद्यायामक्रमेण वर्णाः पठ्यन्ते तेन भूतवर्ण
क्रमो वासनाक्रमं बाधित्वेनोत्सहते वासनार्थतात्पर्येणा
ननु तर्हि भूतसंख्ययैवाक्षराणि किमिति न संभवन्ति अ
न्यान्यपि बहूनि श्रूयन्ते इत्याह

गुणाः पंचदशाख्याता भूतानां तन्मयी शिवेति

भूतानां पंचानां व्याप्यव्यापकभावेन पंचदश गुणाः स्युः तत्
तन्मयी तदात्मिका तत्संख्यावद्वर्णवतीयं विद्या शिवा
शोकमोहमयसंसाररूपामंगलपरिपंथिपरमाद्वैतप्रथात्म
पापरममंगलत्वात् ननु विद्यान्तरसंख्या यावन्तः परि
गणिताः किं तन्मयता वासनावक्रेणाक्रान्त इत्याह ॥

यस्य यस्य पदार्थस्य या या शक्तिरुदीरिता सा
सा सर्वेश्वरी देवी स स सर्वो महेश्वर इति ।

लोके यस्य यस्य पदार्थस्य या या शक्तिः किंचित्कारणसामर्थ्य
लक्षणा विद्यते सा सा शक्तिः सर्वेश्वरी देवी सर्वस्य शिवादि

त्रितयं तस्य यमेवेश्वरीनियामिकादेवीपरासम्मसर्वः पदार्थः
महेश्वरः विश्वजगन्नियामकः परमशिवः सर्वलोकेयहल्ल
यत्किंचित्करणसामर्थ्यरूपेणपरैवपरिणता तत्सामर्थ्यव
हल्लरूपेणपरशिवः परिणतइतिवक्रेशकाते किंवक्रत्वं
तदुभयमयविद्यावर्णसमानसंख्यावन्त्यदार्थरूपेणतावेवप
रिणताविन्यर्थः तदुक्तमभियुक्तैः त्वंचन्द्रिकाशशिनिति।
ग्मरुचिरुचिस्त्वंत्वंचेतनासिपुरुषेपवनेबलंत्वं त्वंस्वादुतासि
सलिलेशिखिनित्वमूष्मानिःसारमेवनिखिलंत्वदृतेजगत्स्या
दिति तत्रभूतगुणमयीशिवेस्वकेशिवायास्तत्संख्याकृत
त्वमाह ॥

यास्मापंचदशार्णैःसाविद्याभूतगुणात्मिका
पंचभिस्तथाषड्भिश्चतुर्भिःशिवात्तैरिति

साशिवापरैवांबिकावाच्यवाचकयोरभेदिनी पंचभिस्त
रैर्वाग्भवबीजस्यावयवैःषड्भिस्तैःकामबीजस्यावयवैः
चतुर्भिस्तैःशक्तिबीजस्यावयवैः तत्तदंतीत्यक्षराणां
तेषांनिरूपणात् एवंविधासंपूर्णाशारहितः पंचदशा
र्णैर्व्याप्तातएवभूतात्मिकाबीजत्रयमन्त्रांशोविभक्तभू
तगुणात्मकतावासनाख्या इदानीमक्षराणामवयवशोवि
भक्तषट्त्रिंशत्तत्त्वात्मकवासनामाह ॥

स्वरव्यंजनभेदेन सप्तत्रिंशत्प्रभेदिनी स
प्तत्रिंशत्प्रभेदेन षट्त्रिंशतत्त्वरूपिणी तत्वा
तीतस्वभावा च विधेया भाव्यते सदेति ।

स्वरव्यंजनभेदेन प्रथमबीजे ककारचतुष्टयं ईकारश्चेति ।
पंच स्वराः षष्ठानि षड्व्यंजनानि एवमेकादश द्वितीयबी
जे अकारपंचकमीकारश्चेति षट् स्वराः शिष्टानि व्यंजना
नि सप्तैवेति त्रयोदश तृतीयबीजे अकारत्रयमीकारश्चे
ति चत्वारः स्वराः शिष्टानि व्यंजनानि पंच एवं नवेति ए
वं विभागे त्रयस्त्रिंशद्बीजयोनेर्विंदवस्त्रय इति षट्त्रिंश
त् एतत्समष्टिरेका एवं सप्तत्रिंशत्प्रभेदिनी विद्या सम
ष्टिरूपा एवं सप्तत्रिंशत्प्रभेद षट्त्रिंशतत्त्वरूपिणी तत्त्वा
तीतस्वभावा च विधेया व्यष्टिसमष्टिभेदेन षट्त्रिंशतत्वा
त्मिका उदतीते ये षट्त्रिंशतत्त्वात्मावयवभूतानि ते रूप
वती सप्तत्रिंशत्प्रभेदेन तत्त्वातीतस्वभावा यस्य स्वभावः
स्वभावः शिवस्य पारूप्यो भावस्तादृशाः स्वभाव इति भा
वयितव्यमित्यर्थः तत्त्वानां लक्षणानि मयैव सौभाग्यसु
धोदये निरूपितानि यथा यदयमनुत्तरमूर्तिर्निजेच्छया
निखिलमपि जगत्स्रष्टुम् पस्पंदे स स्पंदः प्रथमः शिवतत्त्व
मुच्यते तत्रैः इच्छामेव स्वेच्छां संततसमवायिनीमतीष्य ।

श्री· यो·हृ· टी· ४५

45

कि:सचराचरस्य जगतोवीजंनिखिलस्यनिजनिलीनस्य
स्वेच्छाशक्त्या:गीर्णजगदात्मतयासमासाद्यनिवसत्स्यएव
निखिलानुग्रहनिरत:सदाशिवोभिहित: विश्वस्यायंवप
श्चात्मशंपति इंतयानिखिलमीश्वरोजात:साभवति शुद्ध
विद्यायेदंताहंतयोरभेदमति: मायाविभेदबुद्धिर्निजांस
जातेषुनिखिलजीवेषुनिसंतस्यनिरंकुशविभवंवेलेववारि
येरुद्धेसतयापरिमितमूर्ति: संकुचितसमस्तशक्तिरेषपु
मान् रविरिवसंध्यारक्त:संहृतशक्ति:स्वभासनेपिअपटु:
संहृणीकर्तृत्वेनाद्या:सेत्यस्यशक्तयस्तस्यसंकोचात्संकुचिता:
कलारूपेणाद्दृष्यसंवं नतस्यैवकर्तृत्वेनासंकुचिता कतिपया
र्थमात्रकिंचित्कर्तृतारमनुकलयंतीकीर्त्यते कलनामसर्वे
ज्ञतास्यशक्ति:परिमिततनुरल्पवेद्यमात्रपराज्ञानस्वरूपा।
दयंती विद्येतिनिगद्यतेत्र्यपेराद्यै:नित्यपरिपूर्णत्वमि: शक्ति
स्तैसैवपरिमितातत्सतीभोगेषुरंजयंती सततमनुरागतत्व
तांयातानासानित्यतास्यशक्तिनिश्चयानियतोदये प्रयानेनिय
तपरिच्छेदकरीत्क्रमास्यात् कालतत्वरूपेणायास्यत्वंतत्रव्या
शक्ति: संकोचशालिनीसैवकृत्याकृत्येष्ववशंनियतमंत्रनि
यमयंतस्यनियति: इच्छादित्रिसमष्टि:शक्ति:शांतास्यसंकु
चद्रूपासंकलितेच्छाद्यात्मकसत्वादिसाम्यरूपिणीत्वमती
त्रयादिसामरस्यविलात्मिकामनाप्रकृति: इच्छास्यरजोर

पाहंकृतिनाम्नीदंहंप्रतीतिकरीजानाति मेतद्रूपानिर्णि
यवोधस्यकारणंबुद्धिःतस्याःक्रियाग्रहोदेवः तमोमयमू
र्त्तिःमनउच्यतेविकल्पकरीवामादि पंचभेदःसएवसं
कल्पितविग्रहोदेवः ज्ञानक्रियोपरागप्राधान्यादिविषयवि
षयरूपोभूत् श्रोत्रंचक्षुःस्पर्शनजिह्वाघ्राणानिबोधकर
णानि शब्दस्पर्शौरूपंरसंगंधौचेति भूतसूक्ष्माणिप्रथ
मेवाक्तिनिकृष्टोजातोभूतात्मनापिभूतेशः गगनमनिल
स्तेजः सलिलंभूमिश्चपंचभूतानिश्रोत्रादिकरणवेद्याः
शब्दाद्यास्तानिवेदकान्येषाम् वेदनकरीवागास्मीमाणिः
स्यात्करणभूत आदानेगगनविसर्गानंदत्रितयपादादिकं
करणं गंधवतीभूमिःस्यादापः सांसिद्धिकद्रवास्तेजःउ
ष्णस्पर्शमद्रूपस्पर्शोवायुरंबरंसशब्दमिति पुनरपिसिंहा।
वलोकनन्यायेनभूतगुणानांपंचदशानांविधायास्तन्मयरू
पतांविवृणोति।

पृथिव्यादिषुभूतेषुव्यापकंचोत्तरो
त्तरम् भूतंतत्पयस्तंनव्याप्यमिति

पृथिव्यादिष्वादिशब्दादम्भस्तेजोवाय्वाकाशागृह्यंते पृथिव्या
दिषुभूतेषु उत्तरंभूतंव्यापकंअधिकवृत्तिअथपस्तंनभूतेव्या
प्तमनवृत्तिकोर्थः आकाशंस्वाधस्तनानांभूतानांव्यापकम

यो. यिकवृत्तित्वात् अस्मात्सपि चत्वारि भूतानि व्याप्यानि न्यूनवृ-
सि. टी. त्तित्वात् एवं वायुरग्न्यादीनां त्रयाणां व्यापकत्वानि त्रीणि व्या-
४९ प्यानि एवं तेजोप्यप्स्थानयोर्व्यापकं भूतेपि व्याप्ये एवमा-
48 पः पृथिव्याः व्यापकः पृथिवी व्याप्येत्यर्थः तेन व्यापकगु-
णा व्याप्येष्ववस्थिता इत्याह ॥

तेद्गुणा व्यापकाश्रयः व्याप्येष्ववस्थि-
ता देविस्थूलसूक्ष्मविभेदत इति ॥

व्यापकाश्रयास्तद्गुणा व्यापकगुणा व्याप्येष्ववस्थिताः स्थूलसू-
क्ष्मविभेदतः स्थूलमधिकवृत्ति व्यापकं सूक्ष्ममल्पवृत्ति व्या-
प्यं व्यापकव्याप्ययोः स्थूलसूक्ष्मविभेदाद्व्यापकगुणा व्याप्ये-
ष्वतिष्ठंतीत्यर्थः तत्र कस्यकस्य भूतस्य गुणाः केषुकेषु भू-
तेषु स्थिता विद्यायां कानिकान्यक्षराणि कस्यकस्य भूत-
स्य गुणान् लक्षयंतीत्यत आह ॥

तस्माद्व्योमगुणः शब्दो वाय्वादीन्व्याप्य संस्थितः
व्योमबीजैस्तु विद्यस्थैर्लक्षयेच्छब्दपंचकमिति

तस्माद्व्योम्नः सेतरभूतेभ्यः स्थूलत्वाद्व्यापकत्वं तेन तद्गुणः शब्दो

वाय्वादीन् वायुतेजःसलिलपृथिव्यात्मकानिव्याप्यस्थितः
विद्यास्थैर्व्योमबीजैः पंचभिः पंचभूतेषु स्थितानां शब्दानां पंच
कं लक्षयेत् व्योमवाचकत्वात् हकारपंचकेन तद्गुणशब्दपंचकं
लक्षयतीत्यर्थः ननु विद्यायां षट् हकाराणि वसंति अन्यस्य
हकारस्य किं प्रयोजनमित्यत आह ॥

तेषां कारणरूपेण स्थितं ध्वनिमयं परम् इति

तेषां शब्दानां कारणरूपेण स्थितः कारणात्मना स्थितो ध्वनि
नादः शब्दानां कारणं तदुक्तमभियुक्तैः पिंडं वाचकविस्तर
स्य महतः संस्कारदोषस्थितिर्नादोसौ तव देवि मूर्ध्निसमान
मीमानमुद्वंचयन् ब्रह्माणीरवक्रमेण विरमन्नेतामणी
यस्तनीमाजिघ्रन्नपि विद्दशामनुभवन्मूर्तिपुनीयान्ममेति
तन्मयं तद्रूपत्वात् परं कामराजबीजस्थितककारलकार
मध्यगतहकारस्तरं कोर्थः कामराजमध्यस्थितः षष्ठो हका
रः आकाशादिपंचभूतसूक्ष्मगतशब्दपंचककारणनाद
रूपः कामराजबीजस्थितिः रूपतां लक्षयतीत्यर्थः ननु ह
कारादिवर्णा आकाशादिभूतवाचका इत्युक्तं कथं।
शब्दादि पंचभूतगुणानामपि वाचका इत्युच्यते
इत्यत आह ॥

यो॰
हृ॰ टी॰
४२
47

भवेद्गुणवतां बीजं गुणानामपि वाचकम्

गुणवतां गुणाः शब्दादयोः पंचतद्वतामाकाशादीनां भूता
नां बीजं जातावेकवचनं अत्र विद्यायां हकारादीनि पंचभूता
क्षराणि बीजनानि अत्रैवोक्तं हकाराद्व्योमसंभूतमित्यादि
अतो बीजानीत्युच्यते ककारादिक्षकारांतानां व्यंजनानां बी
जत्वमुक्तं तदुक्तं चिद्गगनचंद्रिकायां षड्विसर्गसहितमष्ट।
तेः कलाबिंदुसर्गरहिताश्च येऽष्टचे सर्वपर्वशशिनः कलाश्च ये
यान्ययोर्विदुतबीजतत्पराः इति परापंचाशिकायामप्युक्तं हि
येयं मातृकादेवी बीजयोन्यात्मना स्थितेति तानि तद्गुणानां
शब्दादीनां वाचकानि लक्षणानि हकाराद्यक्षराणि आका
शाद्यैर्भूतैः संकेतितत्वात् तद्गुणेषु शब्दादिषु लक्षणात्वेव
तदुक्तमभियुक्तैः साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचक
इति कोऽर्थः शब्दादिगुणवतामाकाशादिभूतानां यानि बीजा
नि वाचकानि हकारादीनि तानि तद्गुणानां शब्दादीनां लक्ष
कानीत्युक्तं लक्षणीयं निमित्तमाह ॥

कार्यकारणभावेन तयोरैक्यविवक्षयेति

तयोर्गुणगुणिनोः गुणी कार्यं गुणः कारणं अत कार्यकार

णभावेनपकत्वविवक्षयाविवर्तितमेकत्वं नतुतात्विकंगुण
गुणिनोः कार्यकारणभावादेकत्वमारोप्यतस्मेवंयत्नेनिमित्ती
कृतिलक्षणयागुणशब्दाग्गुणिष्वयोज्यंतरस्मर्थः नतुक्तंसंक्षेद
संग्रहे शाकशांतत्वघोरत्वविशेषापन्नरूपतः शाब्दत्वशब्दतन्मा
त्रमस्त्वकठिनत्वतः विशिष्टस्पर्शरूपस्य स्पर्शतन्मात्रसंज्ञकः
नीलपीतत्वशुक्लत्वविशिष्टरूपमेवच रूपतन्मात्रमित्युक्तंम
धुराम्लत्वसंज्ञयुते रसतन्मात्रसंज्ञस्तुसौरभ्यादिविशेषतः
गंधाख्यंरूपतन्मात्रंतेभ्योवैभूतपंचकं आकाशाशब्दतन्मा
त्रान्निःशब्दगुणमहत् व्यापकंनिर्मलंतत्त्वमवकाशप्रदान
कं स्पर्शतन्मात्रतोवायुस्थूलरूपोभवन्नभः जगत्प्राणोनिलो
वहूप्रेरणंचलनुर्भवेत् शब्दस्पर्शगुणःप्रोक्तोतेजस्तत्त्वंचभा
स्वरं शब्दस्पर्शगुणःप्रोक्तोगमागमनकर्मकृत् रूपतन्मात्र।
कारेवपाककर्मकरंशिवे रसतन्मात्रतोजातंवारितत्वंद्रवा
त्मकं शब्दस्पर्शरूपरसगुणसंग्राहकर्मकृत् गंधतन्मात्र।
तोजातंपृथ्वीत्वकठिनामला शब्दस्पर्शरूपरसगंधपंचगुण
त्मकं पृथिवीतत्त्वमाख्यातंकठिनंसर्वधारणं पृथ्व्यादिव्योम
नत्वांतंपंचकंपूर्वपूर्वकं कार्यंहृस्मासमाहृत्यवर्ततेपंचकं
क्रमादिति एवंविविधास्यहूकारपंचकस्यपंचभूतस्थि।
ति शब्दपंचकलक्षणमुक्त्वेदानींवाय्वादिभूतवतष्टय।
स्थितस्पर्शचतुष्टयवायुवाचकेरत्तैसत्तद्गुणस्पर्शचतुष्ट

यो॰ चि॰ टी॰ ४८ ५८

यवायुवाचकैरक्तैरस्त्वग्गुणंस्पर्शंचलक्षण्यंलक्षयति

**महामायात्रयेणापिकारणेनचबिंदुना वा
युग्निजलभूमीनांस्पर्शानांवचलक्ष्यम् उत्र
त्रंभावयेद्देविस्थूलसूक्ष्मविभेदत इति**

महामायाईकारस्तेषांत्रयंबीजशिखरवर्तिनामीकाराणांबि
दुद्वयहार्धमात्रामायाणांत्रयंकारणेनचबिंदुनानदत्तरस्य
कारणेनाकारहकारमकारस्यरूपेणकामाख्येनार्धबिंदुना
वायुग्निजलभूमीनांस्पर्शानांवचलक्ष्यमुत्रत्रेलक्ष्यंभावये
त् स्थूलसूक्ष्मविभेदतइति सूक्ष्माणिपृथिव्यादीनांमि स्थू
लोवायुरग्नीबीनेभ्यः अतएवंविधेनईकारत्रयेणबिंदवः
षट्संतिकारणबिंदुःसमष्टिःवृत्तेह्रियतःषट्बिंदुलांछितं
वृत्तात्मकत्वाद्वायुमंडलस्य तदुक्तमभियुक्तैः कंठादिता
लवंतवृत्तंषट्भिर्बिंदुलांछितं श्वसमिति तद्वायुमंडलावा
चकेनईकारत्रयेणसमष्टिबिंदुनाचस्थूलसूक्ष्मविभेदतः
वायुरभूतसूक्ष्मत्वभेदतः वाय्वादितत्त्वचतुष्टयंस्थितंस्प
र्शंचलक्षणंभावयेदित्यर्थः वायुवाचकैर्वायुगुणंस्पर्शंच
लक्षण्यंलक्षयित्वा इदानींतेजोवाचकैरक्तैरस्त्वग्गुणंरूपंत्रयं
चलक्षयति ॥

रूपाणांत्रितयंतद्वत्त्रिभीरेफैर्विभावितमिति

रूपाणांत्रितयंवह्निवारिभूमिस्थानांरूपाणांत्रितयंत्रिभीरे
फैर्विभावितंलक्षितं ननुरूपंपृथिव्यम्भेजसोसाधारणंक
थंतेजोवीजेन रेफैर्नलक्षित मित्याह ॥

प्रधानंतेजसोरूपंतद्वीजेनहिजन्यतइति ।

ननुत्रिष्वपिभूतेषुविद्यतेरूपंतथापिवाय्वाकाशयोरभावा
त्प्रथमंतेजसोरूपंप्रधानंपश्चादितरयोः भूतयोस्तस्यवीजेन
रेफेनजन्यते प्रकाश्यतेजननेप्रादुर्भावः एवंतेजोवाचकै
रत्नैरस्तद्वर्णंरसद्वयंलक्षयति ॥

विद्यास्थैवंद्रुवीजैस्तस्थूलःसूक्ष्मोरसःस्मृतइति

विद्यास्थैस्त्रिवीजैस्थितैः वंद्रुवीजैःसकारैरभिधानमात्रमेतत्
नतुक्तमभियुक्तैः ओमैंद्रुवक्रतुण्डविंदुभिरेकमन्यदितिस्थू
लसूक्ष्मः स्थूलरसोभवगतोव्यापकत्वात् सूक्ष्मोरसोभूतत्व
गतोव्याप्यत्वात् स्मृतोभावितःस्मृतिर्हिभावना ननुविद्याया
मपिसकारत्रयमस्ति अपृथिव्योस्तुरसद्वयमेवेतरेणसका

यो॰
ह्र॰ टी॰
५९
45

रेणकिमुच्यतइत्याह ॥

संबंधोविद्यतेलोकेरसस्याप्यमृतस्यचेति ॥

अमृतस्यसुधायाःरसस्यापिसंबंधोलोकेविदितः सुरासुरैर
पांनिधौ मथ्यमानेतत्सारभूतममृतमुदितमितिवि`` णाप्रसि
द्धालोकेपरिज्ञातं अतोमृतस्यसारभूतत्वाद्गुणोरसस्तृतीय
सकारेणलक्ष्यते कोर्थः अमृतंस्थूलममृतंतत्सारभूतसूक्ष्म
तद्यथापृथिवीचसूक्ष्मानेनसलिलामृतपृथिव्यंतरस्थितोर
सः विद्यास्थैस्त्रिभिःसकारैर्लक्ष्यतइत्यर्थः एवंमत्वाचकैरक्ष
रैरपगुणंचमध्येलक्षयित्वा इदानींपृथिवीवाचकैर्वर्णैः पृ
थिवीगुणंगंधंलक्षयति वसुंधरागुणोगंधस्तल्लिपिर्गंधवाचि
केति वसुंधरायाःपृथिव्यागुणोगंधस्तल्लिपिः पृथिवीवाच
कवर्णोलकारोगंधवाचकः ननुविद्यायांलकारत्रयमस्ति त
त्रैकेनलकारेणपृथिवीगुणोगंधोलक्षितः शिष्टाभ्यांकिंक्रिय
यतइत्याह ॥

भुवनत्रयसंबंधात्प्रियात्वंतमहेश्वरीति ।

भुवनत्रयंलोकत्रयंतत्संबंधात् लोकत्रयाधारत्वात् आधाराधे
यभावः संबंधस्तस्मात्संबंधाद्धेतोः पृथिव्यास्त्रिवंतेनपृथिवी

भागत्रयगतगंधत्रयलक्षकं लकारत्रयमित्यर्थः हकाराद्व्योम
संभूतं ककारात्प्रभंजन इत्येवं वाय्वाचकतयोक्तस्यापि कका
रस्य प्रमातृवाचकत्वेनापि वक्तुं शक्यमानात् प्रमेयैरेतैः स्पर्शावन्न
ष्टंयलक्षितिमिति इदानीं ककारत्रयेण प्रमातृत्रयं लक्षयति ॥

अशुद्धशुद्धमिश्राणां प्रमातॄणां परं वपुः क्रोधे
शत्रितयेनास्य विद्याङ्गेन प्रकाशितम् इति

अशुद्धाः प्रमातारो भेदधीपात्रसाराः शिवाहंभावभावनाः सक
लाः पशवः तदुक्तं स्वच्छंदसंग्रहे पशवस्त्रिप्रकाराः स्युस्तेष्वेके
सकलाः मताः प्रलयाकलनाम्नानस्तेषां किंचिन्महेश्वरि वि
ज्ञानकेवलास्त्वन्ये तेषां रूपं क्रमाच्छृणु अनादिमलसंछन्नो मा
याकर्मप्रभुतो विभुः शरीरी शिवतत्त्वज्ञो भेदैकरसिको लघुः स
र्वदा कर्मकर्ता च स्वकर्मफलभोजकः नित्यं विषयसंसक्तो भावाः
शोव्याप्रमानयमिति शुद्धाः प्रमातारः पंचमलविज्ञानाः शिव
तावन्मात्रसाराः ज्ञानकेवलाः पशवः तदुक्तं महास्वच्छंदसं
ग्रहे मलमात्रेण संछन्नाः पशुर्विज्ञानकेवलाः स्वपंचमलविज्ञा
नकेवलः समस्वयंप्रिये सतीव्रशक्तिपातेन कृतेनात्यकेवला
निति मिश्राः प्रमातारः पुर्यष्टकसूक्ष्मशरीरमात्रसंवृत्ताः प्रा
क् स्वस्वकर्मानुभावार्थमनेकयोनिषु संभूततत्कर्मानुभावेन

यो॰ कर्मद्वयसाम्ये सति स्वपक्वमलकर्माणः शुद्धं विनाशिवानुग्र
ए॰टी हशालिनः क्रियाज्ञानसाधारणाः प्रलयकलाः पशवः तदु
५० क्तं स्वच्छंदसंग्रहे प्रलयाकलसंज्ञकाः पुर्यष्टकशरीराश्च स्व
50 कर्मवशास्थिये सर्वयोनिषु संप्राप्य भोगाद्यर्थं स्वकर्मणां भु
क्ता भोगानि तेषां तु कर्मसाम्ये शिवः स्वयं स्वपक्वमलकर्मण
लो किंचिदनुगृह्य च जलतत्त्वादितत्त्वानां मध्ये लोकस्थास्थिये
ति एवं त्रिविधानां प्रमातॄणां वशुः स्वरूपं परमन्यत् क्रोधेश
त्रितयेन त्वनेन श्रीकंठनाम्ना सपरिपालाः क्रोधेशाः ककारस्ते
षां त्रितयेन विघस्थेन बीजत्रितयस्थेन प्रकाशयते व्यज्यते को
र्थः बीजत्रयगतककारत्रयेण सकलविज्ञानकेवल प्रलया
कलाख्यत्रिविधपशुस्वरूपं शुद्धाशुद्धमिश्रप्रमातृत्रयस्वरूपं व्य
ज्यत इत्यर्थः विद्यास्थानामन्तराणां वासनात्मका तदवयव
भूतानामक्षराणां द्वादशसंज्ञकानां वासनामाहात्म्यादर्शी
एवं विद्यास्य क्रोधेशत्रितयेन प्रमातृत्रयं लक्षयित्वेदानीं वि।
द्यास्य श्रीकंठद्वादशमध्ये प्राग्दिदशकेनाथ क्रमनेतरेण प्राणं
वरमणेशं वलक्षयति ॥

श्रीकंठदशकं तद्वदव्यक्तं स्यादिहवाचकम् प्राणो
भूतः स्थितो देवि तद्वदेकः दशः पर इति

श्रीकंठदशकंह्रहोवोत्रयवर्जित हकारादिद्वादशाक्षरो
परिगतानामकाराणां मध्येश्रीकंठदशकं श्रीकंठप्रका
रक्षेषांदशकंअथकोजीवोनादिसंछन्नतयासमलशिव
त्वा परिज्ञानकारणेंद्रियादिजडवर्गैनः पातितयाकेवल
चिन्मात्रतयाविमलः तदुक्तं अनादिमलसंछन्नोमायाक
र्मरतोविभुः शरीरीशिवतत्त्वज्ञोभेदैकरसिकोलघुलस्य
वाचकं अकारःसर्ववर्णाग्रःप्रकाशःपरमाशिवइति संकेत
पदस्मकरीत्या अकारवाच्यःपरमशिवःपरमशिवांशत्वात्
तद्वत्परमशिववत् यथापरमशिवोकारवाच्यस्तथातदंश
भूतोजीवोप्यकारेणाप्यतइत्यर्थः तद्वज्जीववत् यथाशिवांशो
जीवः परमशिववाचकः श्रीकंठेनलक्ष्यते तद्वज्जीवदेकाद
शस्त्रश्रीकंठोजीवाधारभूतः प्राणरूपः प्राणस्यनिरूपकः।
स्थितः प्राणोहिजीवस्याधारः प्राणेनविनाजीवस्यानवस्था
नात् परःपरोद्वादशःश्रीकंठःपुरुषस्यवाचकःविश्वस्येश्व
रात्परमशिवः तदुक्तंविज्ञानचंद्रिकायां विश्वस्यापिशिवा
त्मनीश्वरेश्वरणात्पुरुषतास्यपि पुषियेमनःप्रणितदुर्मेरुद्धेयः
स्तान्पतेजसिम्स्वोत्रपास्महे इतिपुरुषएवेदंसर्वमितिश्रु
तिः ननुश्रीकंठद्वादशकंविद्यायांविद्यते एकेनशिवःक
थ्यते एकेनजीवः एकेनप्राणइति त्रिभिरेवालंकिमन्यै
रित्यतआह ॥

यो॰
वा॰ टी॰
५१

51

एकस्तत्रैव पुरुषो बहुधा जायते हि स इति

सत्यमेकेन पुरुषः कथ्यते ह्याभ्यां जीवप्राणौ तथापि स एकः
सन्नेव एकमेवाद्वितीयं ब्रह्म सत्यमभवदित्युपनिषद्भक्तरीत्या
तद्रूप एकोपि पुरुषः बहुधा जायते हि शब्दः प्रसिद्धौ अस्मिन्न
र्थे प्रमाणं इन्द्रो मायाभिः पुरुरूप ईयत एक एव हि भूतात्मा भूते
भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति
सत्यमेक एव शिवो भवति जीवप्राणात्मना बहुधा विभिन्न
इत्युत्तमर्थं यो नयिते विद्या या बहवः श्रीकंठस्थिता इत्यर्थः
अन्तराणां हि वामनाष्टकाविंदुनादादीनां च वामनामारु

रुद्रेश्वरसदेशाख्यो देवतामिति वि
ग्रहाः पिंडत्रयेण कथिता इति

रुद्रस्तेजोधिपतिस्तेजस्तत्वस्यान्तर्भूते पुरुषरागविद्यानियति
कालकलामायान्ते तदुक्तं स्वच्छंदसंग्रहे पुरुषादिकमायान्ते
तेजस्तत्वं महेश्वरीति ईश्वरसदाशिवौ वायुतत्वात्मकौ तदु
क्तमेव विद्या चेश्वरसदाख्यौ वायुतत्वं समीरितमिति अतो
रुद्रेश्वरसदेशाख्या देवतामिति विग्रहाः परिच्छिन्नरूपाः त
दुक्तमेव यत्सदाशिवपर्यंतं विनाशोत्पत्तिसंयुतमिति

10

विंदुत्रयेणकथिताविंदुत्रयंबीजेशिखरवर्तिकामकालो
र्ध्वगतोविंदुस्तंत्रितयम्

अमितामितविग्रहाः शांतिशक्तिश्च
भुक्तश्चनादत्रितयबोधनादिति ॥

शांतिरव्यक्तध्वनिलक्षणोनादोविलंजगदपरीकृत्ययत्रल
यमेति सांप्रब्रह्मावसानभूमिः ऊर्ध्वशक्तीनांप्रशांतिस्थान
हेतुत्वात् तदुक्तंस्वच्छंदसंग्रहे नाभ्याधारस्तुनादांतेभिन्ना
सर्वमिदंजगत् अधःशक्त्याविनिर्भिद्यऊर्ध्वशक्त्यवसानकः
नाडाब्रह्मविलेलीनस्त्वव्यक्तध्वनिलक्षणःइति शक्तिऊर्ध्वश।
क्तिरूपरिगतेशक्तितत्त्वे तदुक्तमत्रैव ब्रह्माणीवपराशक्तिः
ब्रह्मणोन्तंगगामिनी हारंसामोक्षमार्गस्यरोपयित्वाअवस्थि
ता तांभित्त्वातत्त्वरोहेतूर्ध्वशक्तिंपरांशिवां शक्तितत्त्वात्मि।
कांदेवीप्रसन्नभुजगाकृतिं शक्तितत्त्वसमाख्यातंभुवनैराश्रि
तेमहदिति शंभुःशिवःशिवतत्त्वेशक्तितत्त्वेपरेस्थितं तदुक्त
मत्रैव शिवतत्त्वंसमाख्यातंतदूर्ध्वशक्तितत्त्वतःइति अमिता
मितविग्रहाअनंतव्यानंताः अपरिच्छिन्नरूपाःव्योमतत्त्वांतर्गत
त्वात् तदुक्तंतत्रैव शिवतत्त्वेशिवोव्योमनादत्रितयबोधना
वाग्भवकामराजशक्तिबीजोपरिगतविंदुत्रयोपरिगतरोपि

यो० नीति त्रितयोर्ध्वभागगतानां नादानां त्रयमेषां क्रमेण बोधकं
वृ० टी० लक्षकं तेन नादत्रितयबोधनाः वाग्भवबीजोपरिगतबिंदूप
५२ रिवर्तिनादेन शक्तिः तार्तीयबीजशिखरवर्तिना नादेन शि।
82 वोध्यस्तत्रायमर्थः एवं बिंदुनादवासनात्मके दानीं सर्वमंत्रम
यवासनामपि सोदाहरणामाह ॥

वाग्भवमूलवलये सूत्राद्याः कवलीकृताः त
थामंत्राः समस्ताश्च विद्यायामत्र संस्थिता इति

वाग्भवसर्गवेधिनी अत्र वाग्भवशब्देन मत्स्यग्रहणहेतुर्जा।
लं लक्ष्यते प्राणिग्रहणसाम्यात् अस्या मूलवलयः सूत्रप्रप
ञ्चस्यात् सृगंवेधिन्या मूलवलयस्याभावात् रज्जुनिर्मितत्वात्
सूत्रादीनामप्यभावात् सूत्राद्याः सूत्राणि तंतवः अत्राद्यशब्दा
ज्जालग्रंथे प्रावसगुलिकाः प्रोताः गृह्यंते यथा लोहादिमये व।
लयजालावयवानां तंतूनां मूलं कलितं तथा समस्तमंत्राणां
मूलभूतायां वैखरीविद्यायामस्यां विश्रांताः अतो विद्यायामत्र
समस्तमंत्राः स्थिता इत्याहुः गुरूपदेशक्रमेणायमर्थः संप्राप्य
त इत्याह ॥

गुरुक्रमेण संप्राप्तः संप्रदायार्थ ईरित इति ।

गुरुक्रमः पारंपर्यक्रमः तदुपदेशक्रमेणैव शिवादिविग्रहात्स्व
र्णान्सर्वकारणकारणात् ध्वनिरूपं परं सूक्ष्मं शुद्धं धवलतेजसम्
वायुरूपं प्रसृतं तेनोन्मनाशक्तिकेवलं अव्यक्तं व्यक्तरूपेण निष्क
लं कर्मकारणात् परानंदस्वरूपेन तत्स्वच्छंदादिप्रभेदतः अतः स्वच्छं
दस्वाभाव्याः श्रीमत्स्वच्छंदभैरवः तदिच्छाप्रपंचेन शैवाचानाधि
नेश्वरः तत्सर्वशास्त्रतीतांशे कथितं बहुविस्तरं तदेतत्सारूपेण
सदाख्येन शिवेन तत्त्व मंत्रसिंहासनस्थेन पंचमंत्रशरीरिणा कौलि
कादिषु सिद्धांतपूर्णाद्यखिलमागमे साधनं पुरुषार्थस्य कौलि
कं वाति कौलिके अस्मिन्कमप्रमेयं च शिवेन कथितं पुरा तज्ज्ञानमी
श्वरे दत्तमीश्वरेण शिवेच्छया विद्यायास्मादितो दत्तं विघेशाय च तत
स्तः विघेश्वरेण दत्तं तज्ज्ञानं नियमिके क्रमात् दत्तरुद्रेभ्य एत
श्वराणां तन्नेश्वराय च श्रीकंठायेश्वरेणैव दत्तं तेन ततः परं श्री।
कंठेन प्रदाय दिदशरुद्रांतिकं क्रमात् दत्तयित्वा विधानेन वेद
नेत्तानमे विके दीक्षायेन्नाभिषिषणाथ श्रीकंठेन ममापि च दत्तं श्री
दक्षिणांसर्वं सर्वकामार्थसाधनमिति स्वच्छंदभैरवोक्त गीता म
योदितः विषमपदैः संप्रदायविद्भिरपरितत्तानार्थैः श्लोकैः स्वैर्वीक
रीत्या कथितः संप्रदायार्थः विना गुरूपदेशं श्रुतमपि तिवलेन पुरा
णादिश्लोकैर्बहु व्हीतमशक्य इत्यर्थः अथ क्रमप्राप्तं निर्गर्भा
र्थमाह ॥

निर्गर्भोपि महादेवि शिवश्चैवात्मगोचर इति ।

निगर्भोपि निगर्भार्थः शिवो वाङ्मनगोचरः सकलनिष्कलत्वादि
गुणरहितस्तादृशः स्वात्मतया वत्समाणो विदिताखिलगमार्थो
गुरुस्तादृशगुरुकरुणालाभविगलितसकलशविशदस्थिरूपा
उभवत्यात्माशिष्यः तदुक्तं स्वच्छन्दसंग्रहे तत्त्वातीतं वरारोहेवा
ङ्मनोतीतगोचरं सनिष्कलं वा सकलं नीरूपं निर्विकल्पकं निर्द्वं
द्वं परमं तत्त्वं शिवाख्यं परमं पदमिति सर्वविद्याचार्यमोत्तर्थमप
रायणः गुरुर्वेक्रमप्रयोगेन पशुं तत्रैव योजयेदिति गुरुः शृणोते
तत्त्वमात्मीकृतजगत्त्रयं उपायोपेययोगेन शिवाय गुरवे नम
इति एवंविधशिवगुर्वात्मगोचरानुसंधानात्मको लौकिकोनि
गर्भार्थ इत्यर्थः नन्वेकेन शिवगुर्वात्मनाप्रकारेणैकमनुसंधी
यत इत्याह ॥

तत्प्रकारं वदे देवेशि दिङ्मात्रेण वदामि ते इति

तत्प्रकारं शिवगुर्वात्मनामैक्यानुसंधानात्मको दिङ्मात्रेण
निर्देशमात्रेण वदामि नाशेषविशेषप्रतिपादनप्रपंचेनेत्य
र्थः तत्प्रकारमाह ॥

निष्कलत्वं शिवे बुद्ध्वा तद्रूपत्वं गुरोरपि तच्छिष्येत
णामामर्श्याद्वात्मनस्त्वशिवात्मतां भावयेद्गति
नत्रः संघट्टकोन्मेषाकलं कितइति ॥

कलाअवयवा निष्कलत्वं निरवयवत्वं शिवोऽखर्वोकलत्तणोपु
ध्यातृणाते तत्त्वमात्मीयमित्याद्भियुक्तवचनोदीत्या निष्कलं
निखिलात्मकं शिवं स्वात्मतया वीक्षमाणस्यैव गुरुत्वाङ्कुरो
ऽपि तद्रूपत्वं शिवात्मकत्वं ध्यानत्रिवीक्षमाणसामर्थ्यात्कु
गेरात्तपालनेन केवलं निष्प्रपंचमेव निरीक्ष्य तादृशाद्वैतवि
दंभोऽपि स्वयाद्रवीभूतो नया विशुद्धाः शिष्यस्तु लीयते आनं
दविह्वलस्मादि वाक्योक्तरीत्या गुरोर्निरीक्षणं निखिलपाश
छेदनमार्गोऽ सामर्थ्यवशात्सामर्थ्यादिशुद्धिः शिष्योभक्ति
रसः प्रस्फुरत्परशिवाहंभावनावेशः प्रत्यहमानंदमैरं
तर्यपदस्फुरत्तासर्वशात् पंकोन्मेषाकलंकितः शंकसंकोचः
संसारित्वाभिमानः तस्योन्मेषः प्रत्यभायोदिवाद्यार्थाभिनि
वेशः तेनाकलंकितः विगताहंममताभिमानः आत्मनश्च
शिवात्मतां भावयेत् जपाकुसुमसामीप्यविगमात्स्फटिक
स्यैव नैर्मल्यमिवाद्वैतभावनाभावितगुरुकटाक्षपातपाटित
पाशपटलः परिपूर्णाहंकं पश्येदित्यर्थः अनंतरं क्रमप्राप्तं कौ
लिकमाह ॥

कौलिकं कथयिष्यामि चक्रदेवतयो
ऽपि विद्यागर्वात्मना सैन्यमिति

कौलिकं कौलिकान्तमर्थं कथयिष्यामि चक्रदेवतागुरु।

यो॰ विद्यासाधकानामैक्यात्तु संधाने कौलिकोर्थ इत्यर्थः
ह॰टी॰ अक्षरार्थः स्पष्टः तत्प्रकारमाह ॥
५५
54

तत्प्रकारः प्रदर्श्यते ॥

इत्यादिरित्येवं कौलिकार्थस्तु कथितो वीरवंदितः इत्यंते
न आदौ विद्याचक्रयोरैक्यमाह ॥

लकारैः स्वरस्थानीति

लकारैर्विद्याबीजत्रयगतैः स्वरस्थानि भूरूहाणि पृथिवी
मंडलपीतचतुरस्रप्रशोभनमिति स्वच्छंदसंग्रहोक्तरीत्या
भूमंडलस्य चतुरस्ररूपत्वाद्भूतत्ववाचके लकारैः स्वरस्रत्रयं
जातमित्यर्थः ॥
हृत्त्रितयसंयुक्तं सरोरुहद्वयेशा
कैः स्त्रीषोमात्मकं प्रियेइति ॥

तदुक्तं चतुःशतीशास्त्रे माद्यंतं तदयशक्तिरिति हं सपास्ये
स्येरप्युक्तं शिवो हकार इत्युक्तं सकारः शक्तिरव्ययेति शाकैल
कारैर्हत्रयसंयुक्तं सरोरुहद्वयं चतुरस्रांतरे पंकवंतं तह

न्तः षोडशदलं सोमात्मकं पद्मं तदंतस्थद्वितीयवृत्तं त
दंतस्थमष्टदलं पद्मं सूर्यात्मकं एवं वृत्तत्रयसमन्वितमग्नि
मात्मकं सरोरुहद्वयं जातमित्यर्थः ॥

त्रिलेखात्रयसंभूतैरस्त्रैर्नवसंख्यकैः विं
दुत्रययुतं जातं नवयोन्यात्मकं प्रियेति

जलबिंबं सवृत्तं वै वृत्तं च पद्मलांछितमिति स्वच्छंदसंग्रहो
क्तरीत्या जलबिंबस्य पद्मद्वयं पद्मकलांछितवृत्तद्वयरूपत्वात्
जलतत्त्ववाचकैः सकारैर्वृत्तत्रयसंयुक्त पद्मद्वयं जातं अ।
धुना त्रिलेखात्रयसंभूतैर्बीजत्रयगतत्रिलेखात्रयावयव
गतैरस्त्रैर्हकाररेफाकाराख्यैः विंदुत्रययुतैर्नवसंख्यात्म
कैर्नवयोन्यात्मकं चक्रं जातमित्यर्थः ननुपद्मद्वयानंतरं
चतुर्दशारदशारद्वयात्मकचक्रत्रयस्य कथनेयुक्ते कि
मिति तद्धंस्य नवयोनिचक्रं कथितं उच्यते नवयोनिच
क्रस्योपरिष्टात्प्रस्तारकृतैस्तिसृभिः शक्तिभिः वह्निभिश्च
द्विदशचतुर्दशकोणात्मकं जातं ततो नवयोनिचक्रानंतर
मेतस्मचक्रत्रयमुच्यते इत्येतत्सर्वं मनसि निधाय ।

मंडलत्रययुक्तेन चक्रेशाम्नला

यो·
हृ·दी·
५५
55

त्मकं व्योमबीजत्रयेणैवेति ॥

मंडलत्रयप्रकं वृत्तत्रयांतर्गतं शाकानलात्मकं चक्रं नवयो-
निचक्रस्योपरिष्टात्प्रस्तारे कृते सति तिसृभिस्तिसृभिः श-
क्तिभिरनलैश्च त्रिभिर्निष्पन्नत्वात् द्विदशारचतुर्दशारको-
णात्मकं चक्रत्रयं व्योमबीजत्रयेणैव हकारत्रयेणैव हका-
रस्य व्योमवाचकत्वात् लिहोरवात्रये हकारत्रयं शिष्टेन हका-
रत्रयेण चतुर्दशारादि चक्रत्रितयं जातमित्यर्थः ॥

प्रमातृत्रितयात्मत्वे इच्छाज्ञानक्रिया-
रूपं मादनत्रयसंयुतम् सदाशिवा-
स्तं देवि महाबिंदुत्रयं परमिति ॥

प्रमातारस्त्रिविधा उक्तरूपा अणुद्व्यणुद्व्यमिश्रात्मानस्तेषां त्र-
येणात्वितं पश्चाच्छिवानुग्रहतो मलकर्मविपाकात् पृथि-
व्यप्तेजोवाय्वधिपति तामादनेन तत्समष्टितयाहृतं प्राग्वे त-
दुक्तं स्वच्छंदसंग्रहे मलादीनामपाकेन सामान्यानुग्रहो भवे-
त् आधिकारिकमेवं शिवानुग्रहमात्रतः पशवस्त्रिप्रका-
रास्तत्राग्रहि परमेश्वरि अपक्वमलकर्माणस्तान्किंविदत्र
रहाव नलतत्वादितत्वानां मध्ये लोकेश्वरास्त्रियेति इच्छाज्ञा-

नक्रियारूपंमादनत्रयंसंयुतं इच्छाज्ञानक्रियाशक्तिप्रधानप्र
माणत्रयनिरूपकानांमदनानांककाराणांत्रयेणसंयुतंमि।
श्रितसदाशिवासनेपृथिव्यादिवायुतत्त्वानाधिपतिभिर्ब्रह्म
विष्णुरुद्रेश्वरैश्चतुर्भिः पादरूपेणयुतेपंचभूतात्मकेशाधि
पतिसदाशिवरूपपंचमासने महाबिंदुमयंपरंपरशिवरवि
करेप्रतिफलति विमर्शदर्पणेविशदेप्रतिरुचिरुचिरेकुड्ये
चित्तमयेनिवशतेमहाबिंदुरिति कामकलाविलासोक्त।
रीत्या परशिवप्रतिबिंबमहाबिंद्वात्मकंपरशक्त्योःशिव।
शक्त्योरधिवासयोग्यत्वात् तदुक्तंज्ञानदीपविमर्शिन्यां
उड्डियानपीठकदेववर्तानः श्रीमंजादेवताचक्रष्यादेवेन
श्रीमदर्धचक्रश्चादयः स्येनलपृथिव्याधिपतयेब्रह्मणेन
मः वांअवधिपतयेविष्णवेनमः रांतेजोधिपतयेरुद्राय
नमः वांवाय्वधिपतयेईशानायनमः पतानभर्हींह्रीं आ
काशाधिपतयेपंचवक्त्रसदाशिवमहाप्रेतपद्मासनाय
नमः इतिमंचिकाशिवमभ्यर्च्य।

इतिमंत्रमयंचक्रंदेवतायाःपरंवपुरिति

इत्थमुक्तप्रकारेणमंत्रात्मकंचक्रं इदानींचक्रेणदेवताया
ऐक्यमाह देवतायाःपरंवपुःचक्रदेवतायाःपरमन्यद्वपुः

ततः पश्यन्ति भां देवीमित्यत्र देवतायाः करचरणादिमद्रूपत्वं
देवत्रिकोणादिरूहं ततः श्रीचक्रपदनिर्वाच्यावरणदेवतारू
पेणावयवयोर्विभक्ता बैंदवासनात्मसंविद्देवता श्रीचक्रप
रावपुषास्थितेत्यर्थः तदुक्तमत्रैव। एवंरूपं परं तेजः श्रीचक्र
वपुषास्थितं तदीयशक्तिनिकरस्फुरदूर्मिसमावृतमिति ए
तदेवोपपादयति एकादशाधिकशतदेवतात्मतयापुनरि
ति एता एकादशोत्तरशतदेवताः त्रिकोणाग्रदक्षवामकोणे
षु कामेश्वर्यादिकास्तिस्रः तद्बहिरष्टकोणान्तराले त्रिकोणा
न्तिकवर्तिन्यष्टौ कामेश्वरकामेश्वर्याद्युपदेवताष्टको
णेष्टौ वशिन्याद्याः अष्टदेवताष्टकोणान्तराले षडङ्गदेवता
षडं तद्दशारकोणे सर्वज्ञाद्या दशदेवता द्वितीयदशारे सर्व
सिद्धिप्रदाद्या दशदेवता चतुर्दशारे सर्वसंक्षोभिण्याद्याश्च
तुर्दशाष्टदले ष्वनङ्गकुसुमाद्याः षोडशदले कामाकर्षिण्या
द्याः षोडश अन्तश्चतुरश्रे मुद्रादेवता दश मध्यचतुरश्रे ब्राह्म्या
द्या अष्टौ बाह्यचतुरश्रे अणिमाद्या दश एवमेकादशोत्तरश
तदेवतात्मतया समाकारभूता श्रीचक्ररूपिणी श्रीचक्रदे
वतेत्यर्थः तत्रायं कौलिकार्थो वामकेश्वरतन्त्रोक्ते सूचितस्त
स्याशंकां परिहरन् देवतारूपिण्यावरणमेवगणेत्यत्र
सूचितकौलिकार्थं विवृणोति ॥

एकादशाधिकशतदेवतात्मतयापुनरिति

पुनः शब्दादेकादशाधिकाशतदेवतात्मतयैतस्य गणेशत्वं
महादेव्या इत्यनेनाधिकाकात्विवदन्वयः पूर्वोक्तत्रिकोणादि
चतुरस्रांतश्रीचक्रपदनिवास्यैकादशाधिकशतदेवतात्म
तया

गणेशत्वं महादेव्याः ससोमरविपावकैः इच्छाज्ञान
क्रियाभिस्त्रगुणत्रयपुतैः पुनः ग्रहरूपात्वसादेवीति

महादेव्यास्त्वत्तत्संख्याकदेवतासमूहो गणः देव्याः सोमरवि
पावकनेत्ररूपेणस्थिताः इच्छाशिरःप्रदेशज्ञानं चतद्योगत
म् क्रियापादगतातस्या इतिसंकेतपद्धत्युक्तरीत्या इच्छादि
कामूर्ध्याद्यवयवागुणाः सत्वरजस्तमांसि स्वावयवैस्त्रैतेनै
वभिः ग्रहरूपा च सा देवी ॥

ज्ञानकर्मेंद्रियैरपि न दर्शैरेवदेवेशीकरणेशंत्नैः पु
नः प्रकृत्या च गुणेनाथपुंस्त्वं येन चात्मना नक्षत्रवि
ग्रहाजातेति

ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि बोधकरणानि कर्मे
द्रियाणि वाक्पाणिपादपायूपस्थानि तेषामर्थः शब्दस्पर्शरस

यो॰
वृ॰टी॰
५१

रूपगंधाः वचनादानगमनविसर्गानंदाख्यकरणानि मनो
हंकारबुद्धिचित्ताख्यांतःकरणानि प्रकृतिर्गुणसाम्यव्यक्तंगुणो
गुणतत्त्वंसुखदुःखमोहानां मूलंपुंस्त्वबंधग्रात्मापुरुषतत्त्वं
तदुक्तंस्वच्छंदसंग्रहे एभिर्मायादिभिः षड्भिः परिपूर्णः पशुः
पुमान् भुंक्तेभोगानसौदेवीतथापुरुषसंज्ञकः सैवमाया
थीभोगार्थंपशोरव्यक्तसंज्ञकं मूलप्रकृतिविख्यातगुणत्रित
यरूपकं अप्रभूतसंप्रक्षुब्धात्गुणतत्त्वंबभूवह तदुःखसुख
मोहानांमूलंसत्त्वंरजस्तमः बुद्धिव्यापारनियतरूपंव्यक्तगु
णात्मकं विषयात्मात्तबुद्धिःस्याद्गुणास्तत्प्रयोजकाः गुण
त्रयानुसारेणत्रियाकर्मानुसारतः तयाद्यासमुद्भूतोहंका
रस्त्रिप्रकारकः सर्वजीवनसंरंभरूपेणाकमलासने शिवत
त्त्वभेदेनत्रियाकर्मानुसारतः सोयंतैजससंवैकारिभौतिका
ख्यासरूपतः विकाराश्चस्वभेदाश्चवाद्यादींद्रियसंभवैः वा
विकार्थाःस्फरीशानितत्रतत्रनियंतृभिः प्राप्नोतिस्मात्तविद्या
भिरवस्थाभिर्नेगात्मजे संकल्पकारणंवक्षे ज्ञानकर्मेंद्रियाणि
व भूततन्मात्रशब्दस्पर्शरसरूपगंधका ज्ञानाद्दगादींद्रियाणि
व्यापारः परमेश्वरि श्रोत्रत्वक्चक्षूरसनाघ्राणानामेतानि पंचवै बु
द्धींद्रियाणि व्यापारस्तेषामेकैकतः क्रमात् शब्दस्पर्शरूपरस
गंधानांग्रहणंविदुः कर्मेंद्रियाणांवाक्पाणिपादपायूपस्थितः
वचनादानगमनोत्सर्गानंदनंक्रमात् कर्मेंद्रियाणांव्यापा

रःपंचानामपिकीर्तितः एतानिदशबाह्यानिकरणान्यंत
रंत्रयं मनोबुद्धिरहंकारमंतःकरणमेककमिति एतैःस्वा
वयवैः संभूतैः सप्तविंशतितत्त्वविग्रहा एतादेवी स्वयं गृहीतवि
ग्रहा ॥

योगिनीनामधेयाख्ये त्वगादियान्तनाम्नीभिःशाकि
न्यादिभिरष्टाभिः वर्गाष्टकनिविष्टाभिर्योगिनीभि
स्संयुता योगिनीरूपमास्थाय राजते विश्वविग्रहेति

योगिनीरूपेणविहरति अत्रैववसति ग्रहाष्टककलत्रवि
नष्टाब्धिविवर्जितं त्वमेव तामेरूपेणक्रीडसे विश्वमोहिनीति

प्राणापानौसमानोऽथोदानव्यानौतथापरः ना
गःकूर्मोऽथकृकरोदेवदत्तोधनंजयः जीवा
त्मापरमात्माचरैतेराशिस्वरूपिणीति

प्राणादिधनंजयांतादशवायवोजीवात्माकुललक्षणःएष
परमात्मा एषउआत्मांतर्याम्यमृत इत्युपनिषद्वाक्यः सर्वभू
तानामंतर्यामी एतैर्हिदशभिराशिस्वरूपिणीति गणेशना
दिपदंविद्यापदेवियोजयति ॥

यो॰
हृ॰ टी॰
५८

58

अकथादित्रिरेखात्मनानीयादिक्रमेण च सा
गणेशो महाविद्या परावागादिवाङ्मयीति ।

अकारहकारसामरस्यरूपा परावागादिवाच्यास्ताः पश्यं
ती मध्यमा वैखरी वाचश्चान्यत्ताः परावागादिवाचः तदुक्तं संके
तपद्धत्यां अकारः सर्ववर्णाग्र्यः प्रकाशः परमशिवः हकारो
ऽन्त्यकलारूपो विमर्शाख्यः प्रकीर्तितः अनयोः सामरस्यं यत्पर
स्मिन्नहमिति स्फुटं वामाद्यैः पिण्डितो योऽसाववर्णः परिकीर्तितः
आदौ वस्य शिरो रौद्री वक्त्रे वामा प्रकीर्तिताः अम्बिकावाङ्गिरस्या
कारस्येष्टैव नत्व्याग्रता अरेखार्धकलारूपः पंचधा यो व्यवस्थि
तः अवर्णः सर्ववर्णानां नष्टथग्भासते वहिः रेखाशिरःप्रदेशः
स्यात् क्रिया च तदधोगता ज्ञानपाटगते तस्य शान्ता हार्यार्धमध्य
गाः अष्टधानहतः प्रोक्तः सून्यादिप्रतिभेदतः सून्यस्पर्शास्तथाना
दो ध्वनिर्विन्दुस्तथैव च शक्तिबीजं तथैवेति अष्टधानहतः स्मृतः
चत्वारिंशत्समं संख्यो हतः स परिकीर्तितः तकारः कथितो योऽसौ
संयोगाद्द्विविधः स्मृतः समस्तानामेव हि मातृकापीठमुत्तमं अ
नाहतं हतं मन्त्रैस्त्रिभिर्भेदैः समन्ततः स्थितो योऽसौ महीपीठमा
कारात्रेन यत्र सा विति एवमेतत्परादिवत्त्रैविध्यतया वाङ्मयी
अस्या विमर्शरूपो सा शोभिता च वत्कलो मैव सा दिसौभाग्यस्य
योऽरचप्रतिपादिते तोस्या परापश्यन्ती मध्यमा वैखरीमयत्वाद्विद्या

याअकथादित्रिपंक्त्यात्मतार्तीयादिक्रमेणैव अकथा` सा
दिशब्देन अकारककारथकारैस्त्रिभिः संबध्यते अादयः षोड
षोडशविसर्गांतः कादयस्तांतः थादयः सांताः षोडशएव।
मकथादिवर्णात्मकतार्तीयादिकामराजवाग्भवक्रमेण अ
कारादिपंक्तिमध्ये वाग्भवइतिक्रमेणपंक्तिशब्दोगणपरः
चतुर्विधमातृकामयत्वात् अकथादिवैखर्यादिगणत्रय।
वीजत्रयत्वाच्चमोयंमहाविद्यागणोशोभूदित्यर्थः

वीजविंदुध्वनीनांचत्रिकूटेषुग्रहात्मिकेति

कूटशब्दोत्रान्तरपिंडपरः यथोक्तमभियुक्तैः कूटेषुत्रिषुकार्ये
गौरववशादीकारस्त्रुगात् क्रमादिति सौभाग्यविद्यान्तरीयं
तेषुवीजविंदुध्वनीनांचवीजमीकारान्तरांतं विद्यान्तरस्थाने विं
दुरुक्तलक्षणः ध्वनिर्नादः वीजविंदुः ध्वनीनांचेति तृतीया
र्थोक्षांदसः प्रयोगकूटत्रयेवीजानित्रीणिविंदवस्त्रयोनादा
स्त्रयइति नवभिर्ग्रहात्मिकाविद्येत्यर्थः ॥

हृल्लेखात्रयसंभूतैस्तिथिसंख्यैस्तथान्तरैः
अन्यैर्द्वादशभिर्वर्णैरेकनक्षत्ररूपिणीति

यो. हृ. टी. ५९

59

बीजत्रयमित्यस्य वर्णितैर्ह्रीकारत्रयं तत्संभूतैस्तथा तैरेहकारेफा
कारेविंदुनादात्मकैस्तिथिसंख्याकैः पंचभिर्दशभिरन्यैर्हल्लेखा
त्रयवर्जितैर्द्वादशभिर्वर्णैः कूटत्रयावयवैः पंचपंचदशभिः
द्वादशवर्णैः सर्वैर्नवत्रयरूपिणीत्यर्थः

विद्यांतर्भूतशक्त्याद्यैः शाक्तैः षड्भिरथा
न्तैः योगिनीत्वं च विद्याया इति ॥

विद्यायाः पंचदशाक्षर्यां अंतर्भूताः शक्तयो हल्लेखास्तिस्र
द्राद्याश्च लकारास्त्रयः एतैः षड्भिरन्तैर्विद्याया योगिनीत्वं
योगिन्यश्च डाकिन्याद्याश्च षट्

राशित्वं चान्यवर्जितैरिति ॥

विद्याया इत्यर्थः विद्यायाः पंचदशाक्षर्यां अंत्या हल्लेखा ति
स्रः तद्वर्जितैर्द्वादशभिर्वर्णैः राशित्वं भवदित्यर्थः राश
योपि द्वादश मेषादयः उक्तमर्थं वक्ष्ये निर्दिशति ॥

एवं विश्वप्रकारा चक्ररूपा महेश्वरीति

एवमुक्तरीत्या योजितगणेशादिविश्वप्रकारा महेश्वरीति

पुरसुंदरीचक्ररूपा भवेदित्यर्थः देवतामंत्रविद्यापत्तदेवच
क्रपत्तेन गणेशत्वादिकं योज्यमित्यर्थः योजनप्रकारस्तत्र।
कथादिमयमध्यत्रिकोणरेखया गणेशत्वं नवचक्रग्रहरूपत्वं
वृत्तत्रयचतुर्दशकोणबहिर्दशारद्वयेण नक्षत्ररूपत्वं अष्टको
णे ब्राह्म्यादियोगिनीत्वं पंचशक्तिचतुर्वह्निपद्मद्वयभूगृहे रा
शित्वं चेति पुनश्च पूर्वोक्तलक्षणमेवार्थं गुरुशिष्ययोरप्यतिदि
शति॥

देव्या देहो यथा प्रोक्तो गुरुदेहस्तथैव च । त
त्प्रसादाच्च शिष्योपि तद्रूपः संप्रकाशत इति

देव्यास्त्रिपुरसुंदर्या देहः स्वेच्छागृहीतविग्रहो यथा प्रोक्तः प
कादशाधिकशते देवतात्मतया पुनर्गणेशत्वं महादेव्याः ।
त्वादिना रूपेण तत्त्वमात्मीयमित्याद्यभिप्रायकवचनोक्तरीत्या
देवतारूपस्यैव गुरुत्वाद्गुरुदेहेपि यथा देव्या देहे गणेशत्वा
दिकं योजितं तद्रूपो गुरुदेहोपि तथैवेत्यर्थः तत्प्रसादात्स्व
प्रकाशवपुषः गुरुः शिवयः प्रसीदति पदार्थसक्तके तत्प्र
सादमिह तत्त्वशोधनं प्राप्तमभेदमुपयाति भावतः स्वमस्तु।
क्तरीत्या प्राप्तगुरुप्रसादः शिष्यस्तद्रूपो देवतारूप एव संप्र
काशयति यथा देव्या देहे गणेशत्वादिकं योजितं तथैव शि
ष्यदेहेपि योजनीयमित्यर्थः कौलिकार्थमुपसंहरति ॥

यो॰
ह्न॰ टी॰
९०
60

इत्येवं कौलिकार्थस्तु कथितो वीरवंदित इति

इतिशब्दः प्रसंगपरिसमाप्तिपरः एवंशब्दात्पूर्वोक्तात्तु वा
ऽपरः शेषं स्पष्टम् क्रमप्राप्तं सर्वरहस्यार्थमाह ॥

तथा सर्वरहस्यार्थं कथयामि तवानघे इति ॥

तथाशब्दः पूर्वोक्तार्थप्रकारपरामर्शार्थः सर्वरहस्यार्थं पूर्वो
क्तसर्वेभ्यो रहस्यं परप्राप्तिरूपत्वात् सर्वरहस्यार्थमेवाह ॥

मूलाधारे तडिद्रूपे वाग्भवाकारतां गते अष्ट
विंशत्कलापूर्णरूपवाग्राहणीविग्रहा विधाकुं
डलिनीरूपा मंडलत्रयभेदिनी तडित्कोटिनि
भाप्रख्या विसतंतुनिभाकृतिः व्योमेंदुमंडला
मृतास्रवधास्रोतःस्वरूपिणी सदाव्याप्तजगत्
कृत्स्नं सदानंदस्वरूपिणी एषा स्यात्सेति बुद्धि
स्त्वरहस्यार्थं महेश्वरीति ॥

मूलाधारे पूर्वोक्तलक्षणे तडिद्रूपे विद्युत्सवर्णे वर्णे वाग्भवा
कारतां गते वाचा परा पश्यंती मध्यमा वैखर्यः नाभिकी।

भिभवतीति वाग्भवं त्रिकोणं तडकमध्येव आत्मनः स्फुरणात्मि
त्मादिक्रियाशक्तिरूप रौद्रीयं वैखरी विग्रहे तेन तदाकारतां
गतेन तद्रूपेण परिणते अष्टात्रिंशत्कला वह्नेश्चाद्याद्दश सूर्यस्य
तापिन्याद्या द्वादश सोमस्यामृताद्याः षोडश कला एवमेता।
अष्टात्रिंशत्कलास्ताभिर्युक्ताः पंचाशद्वर्णा रकारादिलकारांते
वह्निकलाभिर्दशभिर्युक्ता मायादयो दश वर्णाः सूर्यकला
भिर्द्वादशभिर्युक्ताः क्रमोत्क्रमात्कभाद्याश्चतुर्विंशतिवर्णाः
सोमकलाभिः षोडशभिर्युक्ता अकारादयः षोडश स्वराः एवमे
ते पंचाशद्वर्णाः विग्रहोपस्थाः मातृकासौभाग्यविद्यायाश्च स्वर
व्यंजनभेदेन षट्त्रिंशत्तत्त्वरूपिणीति हर्वोक्तरीत्या षट्त्रिंशदव
यवं पंचदशाक्षरमयी वैखर्यात्मिका विद्या कुंडलिनी रूपा तस्या
मध्ये वह्निशिखात्मिका योर्ध्वमवस्थिता नीवारशूकवत्तन्वी पी।
ताभास्वत्तत्वापमा निलीना पदमध्यस्था विद्युल्लेखेव भास्वरा २
ज्यस्तडक्करीत्या भुजंगभोगसदृशी ज्योतिर्लता मंडलत्रयभेदि
नी मंडलत्रयमाधारहृदयभ्रूमध्यस्थितानां वह्निसोममंडला।
नां त्रयं तद्भेदिनी तत्त्रयं भित्वा तन्मध्यमार्गेण कुलं प्रवेष्टुमुद्य।
तेत्यर्थः तडित्कोटिनिभा प्रख्या तडित्तां कोटीनां निभा सदृशा प्र
ख्या प्रभा यस्याः सा बिसतंतुनिभाकृतिः बिसतंतुवत्सूक्ष्मरूपा
व्योमेंदुमंडलासक्ता ललाटोर्ध्वसमारभ्य कपालोर्ध्वावसानकं
त्र्यंगुलार्ध्वं शिरोदेशः परं व्योम प्रकीर्तितमिति स्वच्छंदसंग्रहो

यो॰ करीत्या परव्योम्नि यदिंदुमंडले चिच्चंद्रबिंबं तत्रासक्त्या स्वयास्थो
ह॰ टी॰ नः स्वरूपिणीति हि गलदमृतप्रवाहरूपा सदाप्याये जगत्कृत्स्नं
६१ सदा कालत्रयेपि जगत्कृत्स्नं षट्त्रिंशत्तत्त्वात्मकं आप्याययेति शेषः
61 सदानंदस्वरूपिणी सदानंदः परशिवः स्वरूपं यस्याः सास्तीति स
दानंदस्वरूपिणीति एषा चिन्मयी कुंडलिनीशक्तिः स्वात्मीति ब
हिस्तदात्मतया समावेशो रहस्यार्थस्त्वयम्ः तदुक्तं च ततः शांतीशा
स्ते यदुल्लसति शृंगाटपीठाकरिलरूपिणी शिवार्कमंडलेभित्वा
द्रावयंतींदुमंडली तदुद्भवामृतस्यंदपरमानंदनंदिता कुलयो।
षित्कुलं त्यक्त्वा परं पुरुषमेति सा निर्लक्षणा निर्गुणा चाकुलकुलविव
र्जिते ततः स्वच्छंदरूपात्परिशृह्य जगन्मयति तेन मार्गेण संतुष्टा
पुनरेकाकिनी सती रमते सेयमव्यक्ता त्रिपुरा व्यक्तिमागती।
ति क्रमप्राप्तं महातत्वार्थं वक्तुं प्रतिजानीति ॥

महातत्वार्थ इति यत्प्रेदेवि विवरामि ते

स्पष्टम् महातत्वार्थमाह ॥

निष्कले परमे सूक्ष्मे निर्मले भाववर्जिते व्योमा
तीते परे तत्त्वे प्रकाशानंदविग्रहे विश्वोत्तीर्णे
विश्वमये तत्त्वे स्वात्मनियोजनमिति ॥

निष्कले निरवयवे कलाद्यवयवामहत्त्वोपि महीयसि परमेसू
क्ष्मेणोरणीयमिति ईदृशे करणेंद्रियाद्यगोचरभाववर्जिते भाव
मागमामतींद्रियं वयमव्ययमक्रममिति चिद्गगनचंद्रकोक्तरीत्या
भावनातीते गम्ये व्योमातीते सर्वोत्कलनत्वेन तदतीते परे तत्त्वे स
लनत्वातीते सकलातत्त्वार्थे परमार्थे प्रकाशानंदविग्रहे प्रकाशो
ज्योतिषां ज्योतिरनुत्तरमानंदः तौ प्रकाशानंदौ विग्रहौ यस्य वि
श्वोत्तीर्णे विश्वसंकुलत्वेन तदुत्तीर्णे विश्वमये देशकालपदा
र्थात्मतया यद्यद्रूपं यथा तथा तत्तद्रूपतया भवति तत्त्वमसी
त्युपनिषद्वाक्यार्थे परमार्थपरविद्याप्रत्ययक परशिवरूपा
निजगुरुप्रतिबोधित निर्मलस्वभावे स्वात्मनियोजनं तदेक
तानप्रवेशो महातत्त्वार्थ इत्यर्थः ननु एवंविधिलक्षणं स्वात्म
तत्त्वं केन प्रमाणेनानुमीय इत्यत आह ॥

तदा प्रकाशमानं तेजसां तमसामपि अवि
नाभाविरूपत्वं तस्माद्विश्वस्य सर्वत इति ।

यदा सदाशिवः सर्वप्राणिनां चित्ते मन इंद्रियेणेंद्रियमर्थेन इति
तेजोंतरोक्तरीत्या तेजसां सूर्यादीनां तमसां घटादीनां ज्ञानानां प्र
काशमानत्वं चित्ते तदात्मनि शिवे प्रथमं परिस्फुरति सत्येव
तत्तदिंद्रियद्वारा तत्तदर्थानां परिस्फुरणं प्रवृत्तिः तमेवभांत

यो. मनुभाति सर्वमितितस्मात्सर्वतः सर्वस्यविश्वस्योक्तलक्षण।
वा.टी. स्याविनाभावरूपत्वमविनाभवतीत्यविनाभावः कोर्थः विश्व
६२ मिदंदृश्यमापेक्षप्रतीतिकिंदृश्यत्वात् यथासंप्रतिपन्नोघटः
62 यद्यदंदृश्यंतत्तत्स्वरूपसापेक्षप्रतीतिकंनभवति यथाशशविषा
णमित्यन्वयव्यतिरेकासिद्धेनानुमानेनप्रमाणेनानुमीयतइत्य
र्थः अथवालंप्रमाणचिंतयाजडप्रमाणानामपितदनुप्रवेशा
नैवप्रमाणत्वात्तेषामपि पतज्ञांवयत्नेनसाधयितुमलंतस्यस्व
प्रकाशत्वादित्याह ॥

प्रकाशतेमहानंतंदिव्याक्रीडारसोज्वलेइति

तत्वंदेशकालाकारैरनवच्छिन्नंस्वप्रकाशतेस्वतएवतेनविना
नकिमपिप्रकाशयितुमलं तस्यैवप्रकाशेनसर्वाणिप्रकाशं
तइति श्रुतिः नतत्रभासयतेसूर्योनशशांकोनपावकइति
तस्यभासासर्वमिदंविभातीतिच अभियुक्तवचोपि अथवालौ
कत्तानानांमतिरेवात्रसाक्षिणी किंप्रमाणवचोभिस्स्वप्रकाश
चिदात्मनि नहिवैकर्तनंज्योतिर्दीपालोकमपेक्षतेइति दिव्य
क्रीडारसोज्वलेदिविभवोदिव्यःपरशिवः तस्यक्रीडाविश्वस
र्जनादिव्यवहारक्रियाविच्छित्तिः तयोरसःसामरस्यंतेनोज्वले
नित्यनवशक्तिसामरस्यप्राणयनप्रतीत्यादेवीइत्यर्थः नतु
महानन्तत्वार्थज्ञानस्यफलंयागादिकरणमिवदेहांतरदेशं

तत्कालांतरभाविप्रमेयेनेत्याह

निरस्तसर्वसंकल्पविकल्पस्थितिरेव कः र
हस्यार्थो महात्मनः सद्यः प्रत्ययकारक इति

इदमहं करिष्यामीति मानसं कर्म संकल्पः एवं मायाक
तेयमेवं नेति कोटिद्वयावलंबनं विकल्पः शिवस्वातंत्र्य
भावेन भावितो निरस्तो विज्ञानमात्रतः तदुभयनिरा
साद्देवमनसः स्थैर्ये स्थितिर्जायते तस्यां को रहस्यार्थः
कर्मान ह्रीकर्णो नायोग्य अत एव महात्मनः न कस्यापि क
थितः अमंतयत्नेन रहितः सद्यः प्रत्ययकारकः एतदा
कर्णेन शिवोहमस्मीति प्रत्ययः सद्य एव समुदेतीत्यर्थः न
न्वयमर्थः अत्र स्थितः कुत्र वा दृष्टः किं वा तस्य फलमित्यत
आह ॥

महाज्ञानार्णवे दृष्टः श्रीकांततन्त्रपार्वति वि
द्यापीठनिबंधेषु संस्थिते दिव्यसिद्धिद इति

विद्यैव पीठं शिवयोर्विश्रांतिस्थानं तत्र निबध्यते येषु तानि
निबंधानि तद्वयोभ्रुतानि वाग्भवकामराजशक्त्याख्यानि
बीजानि तेषु विद्यापीठनिबंधेषु संस्थितो दिव्यसिद्धिदः

यो.
सू. टी.
६३
63

अत्रलेविशुमंतेयेनत्र्योंकारीणा बीजत्रयशिखरवर्त्तिवि
न्दर्धचंद्ररोदिनीनादनादांतशक्तिव्यापिकासमनोन्मना
नोक्रमेणांतसंधीयमानेषु उन्मनांतेदेशकालानवच्छि
न्नपरचिदात्मकमहातत्त्वार्थः संस्थितस्तदर्थः तदुक्तं स्व
च्छंदसंग्रहे यावोक्तासमनाशक्तिस्तदूर्द्ध्वेउन्मनास्मृता
नात्रकालकलाभानेनतत्त्वंवनदेवता स्वनिर्वाणपरंशुद्धं
रुद्रवक्त्रंतदुच्यते शिवशक्तिरितिख्याता निर्विकल्पानि
रंजना तत्त्वातीतंवरारोहे वाङ्मनेतीतगोचरं सनिष्कलं
चसकलंनीरूपंनिर्विकल्पकं निर्द्वंद्वंपरमंतत्त्वंशिवाख्यंप
रमंपदमित्यादि दिविंतन्मनांतेनिरस्तनिखिलक्रमेण
महाप्लवेभवतीतिदिव्यः परमेश्वरः एवोक्तस्यसिद्धिः
स्वाभेदेनपरिज्ञानंतल्लक्षणपरमप्रयोजनंददातीति दि।
व्यसिद्धिः महाज्ञानार्णवेदृष्टः तादृशः परमशिवमाधि
देवमहाज्ञानं तदेवार्णवः निरस्तरंगापारपरामृतपरिपू
र्णत्वात्तस्मिन्दृष्टः शिवोहंभावभावनयाभावितः कोर्थः
अयंपरमशिवप्राप्तिः लक्षणोमहातत्त्वार्थः सोभा।
गविद्याबीजत्रयशिखरवन्नुन्मन्यवसानेभूमावव।
स्थितः तथाविधफलदोमयानित्यं समाधिदशा।
यांनिरीक्ष्यते अत्रमन्त्रार्थेशंकातद्यानकार्यायथार्थ
दर्शीयथादृष्टार्थवादीचाह तत्त्वार्थोमहाज्ञमस्य

केनतर्हिकीदृशोलभ्यतइत्यतआह ॥

कौलाचारपरैर्देविपादुकाभावनापरैः यो
गिनीमीलनोद्युक्तैः प्राप्तदिव्याभिषेचनैः
शंकाकलंकविगतैस्सदाशुद्दितमानसैः पारं
पर्येणविज्ञानरहस्यार्थविशारदैः

लभ्यतइति कुलंशरीरंमहाप्रयोजनहेतुतयाज्ञेयंयेषां
तेकौलाः तदुक्तंस्वछंदसंग्रहे कुलज्ञानमतोवक्ष्येकौलि
कानांहितायवै यस्यविज्ञानमात्रेणयोगोपायाश्चयोगिनः
स्वगमाःसिद्धयःसर्वाभवंतिसुलभाःप्रिये शरीरंकुलमि
त्युक्तमितितेषामयमाचारः सर्वेषामपिशिष्याणांदीक्षिता
नामपिप्रिये सर्वावस्थागतानांचसाधारणमतःशृणु
गुरुभक्तिश्चशांतिश्चपूजाश्रद्धात्ममाहृतिः इतिस्वछंद
संग्रहोक्तरीत्या समयाचारपरैःपादुकाभावनापरैः स्व
प्रकाशशिवमूर्त्तिरेकिकातद्विमर्शतनुरेकिकानयोःसा
मरस्यवपुरिष्यते परापादुकापरशिवात्मनोगुरुरित्यःस
दुक्तरीत्या प्रकाशविमर्शतत्त्वसमष्टितयाश्रीगुरुपादुका
हंहभावनापरैःयोगिनीमेलनोद्युक्तैः यत्रयत्रमिलिता
मरीचयस्तत्रतत्रविभुरेवजृंभते तत्संनोहिनियमावलं

यो. हृ. टी. ६४

64

वनेध्यानपूजनकथाविद्रवेनेति प्रमाणवचनोक्तरीत्यात्मा
त्मानमेवसंविदोयोगिन्यस्तासांमलनाशंतत्स्वैभावे
नपरप्रमातृविश्रांतिरवेद्युक्तेः अथवाज्ञाम्नायघट्टका
वेनार्थसमर्थकशक्तिचक्रमलनेयोगिनीमलनंप्राप्त।
दिव्याभिषेचनैःलब्धपरशिवप्रायगुरुचरणाभिमंत्रितविद्र
समयकलशसलिलसेकैः ततःप्रक्षालितमलमयपा।
शैः अतएवसंकाकलंकविगतैः इत्थंभवन्नवेमनवधार
णंशंकासैवकलंकःमालिन्यहेतुत्वात्तस्माद्विगतैः अत
एवसदामुदितमानसैः मेघावरणविगमाद्यथारवेःस्वरू
पंपरिस्फुरति तथामलपाशविगमात्सद्वैषांमनसिप्र
मोदलक्षणंपरशिवरूपंप्रकाशतेतेरित्यर्थः पारंपर्येण
विज्ञानरहस्यार्थविशारदैःलभ्यते शिवादिगुरुपर्यंत।
परंपरयाविदितसकलरहस्यार्थपदालोचनवापटुभि
तिभिर्महानत्वार्थोलभ्यतइत्यर्थः कौलाचारपरैरित्याद्युक्त
गुणविहीनैरयमर्थोलभ्यतइतिशापयन्नेवमाह ॥

नास्याःदेविवेत्तांमर्त्यालभंतेरसमन्वीतिसंथे

ननुगुरुपारंपर्यक्रमः शुल्कपादादिनाप्युपत्तिवेलन
किंचिन्मात्रपरिज्ञानेनगविनास्तेषांसमयलोपेनसंके

न्तःपरिज्ञानंसंपादयितुमशक्तास्तत्रैतन्नत्राह ॥

पारंपर्यविहीनायेज्ञानमात्रेणगर्विताः ते
षांसमयलोपेनविकुर्वंतिमरीचयइति ॥

येपारंपर्यविहीनाःशास्त्रश्रुतमतिबलेनकिंचिन्मात्रपरिज्ञानग
र्विताःसमयःसादनंतदयःशाक्तिरितादिसमयाशास्त्रवि।
हितसकलमंत्रान्तरसंकेतपरिज्ञानाभ्युत्थारणादिक्रमणादि
क्रमलोपेनविकुर्वंति मरीचयःसर्वपीठनिवासिन्यःसर्वागा
चिन्मरीचयः भैरवोभविताकारास्तेतत्कुलमातरइतिप्रामा।
णिकवचनोक्तरीत्या ब्राह्म्याद्याडाकिन्याद्याश्चतगादियाश्चदे।
वता विकुर्वंतिविकारंकुर्वंति स्वस्वयाहृत्स्थेकविरूपजननेनते
षांदेहंनाशयंतीत्यर्थः नन्वकस्मिन्दिनेकस्मिन्नक्षत्रेकस्मिन्वारे
कौलाचारक्रमेणयोगिनीमेलनंकार्यमित्यतआह ॥

यस्त्वदिव्यरसास्वादमोदमानविमर्शनः देव
तातिथिनक्षत्रवारेष्विवविवस्वतः मरीचि।
श्रेणयस्यैवकारणानंदचूर्णितइति ॥

यस्तुकौलिकाचारपरोयोगिनीदिव्यरसास्वादमोदमानविमर्श

नः दिव्यपरेभ्योऽभिन्ना भवन्तीति दिव्यः परशिवस्तेन रसः सामरस्यं
तस्यास्वादोऽनुभवस्तेन मोदमानविमर्शनः विमर्शनमनोवृ
त्तिर्येषां ते: प्रथमं परशिवैकपरामर्शपरिस्फुरदतिभिमानंद
केवलः पश्चात्कारणानंदघूर्णितावस्यमाणार्थविशुद्धिवि
धाय परामृतभूतया मदिरया संपादितानंदा योगिनीदेवता
तिथीचतुर्दश्यष्टम्यो कृष्णेन तंत्रे देवतानन्तरं अत्रैव वसति
नित्यं कृष्णदिने वारे सौरे च परमेश्वरि गुरोर्दिने स्वनक्षत्रे चतुर्द-
श्यष्टमीषु च चक्रपूजां विशेषेण योगिनीनां समाचरेदिति
मरीचीक्रीणायान्येव एवकारो योगपद्मवच्छेदनपरः उक्तकालेषु
सर्वांशो योगिनीप्रीणनं कुर्यादन्यथा प्रतिवायो भवेदित्यर्थः

सर्वदा च विशेषेण लभते पूर्णबोधतमिति

कालविशेषकथनं नैमित्तिकपूजाद्योतनार्थं सर्वदा प्रत्यहं
मरीचिप्रीणनं कुर्यादेव एवकारेणाप्यन्वयः निमित्तेनाकरणे
प्रतिवायोस्तीति नात्स्पंदं निमार्चनायोल्लमायां मामनोसावृ
त्तिक्रमादिति स्वच्छंदसंग्रहोक्तरीत्या प्रायश्चित्तस्य कर्तव्यत्वावि
धानात् अकरणे प्रत्यवाय एव भवति कारणेन फलमस्तीत्या
ह लभते पूर्णबोधतामिति पूर्णबोधोऽत्र विषयबोधलक्षणः स्वा
त्मांशाश्रयवतिष्ठते निशामित्यम्भ्रकरीत्या निराकरणविद्भूपा स्वा

त्मशंभुत्वंप्राप्नोतीत्यर्थः नन्वहणोबोधभावःकेनकाकियताका
लेनकैकामंप्राप्यतइत्यतआह ॥

एवंभावस्तदेवेशिदैशिकेन्द्रप्रसादतः महा
ज्ञानमयोदेविसद्यःसंप्राप्यतेनरैरिति ।

एवंभावःस्मरणोबोधयन्त्वंदैशिकेन्द्रप्रसादतः यस्यगुरुणाकरु
णापातेनपाशजालंविच्छिद्यते सपरशिवःकेवलोदैशिकेन्द्रस्त
त्प्रसादतः स्वप्रकाशवपुषःगुरुःशिवोद्यःप्रसीदति एवार्थो
मल्लकैतत्प्रसादमिहतत्त्वबोधयन्तेप्राप्यमोदमुपयाति भाव
कःस्वस्मर्तुकरीमा तत्प्रसादग्रहणेनमहाज्ञानमयेनिराव
रणाचिन्मयःकौलाचारपरैरित्यादिसर्वोक्तविशेषणविशे
षितैः सद्योदैशिकेन्द्रप्रसादसमवाप्तिसमयएवसंप्राप्यतेम
न्त्रसंकेतमुपसंहरति ॥

एवमेतत्परंज्ञानंविद्याणागमगोचरं देवि
गुह्यंप्रियेणैवव्याख्यातंतुगोषड्विधं सद्योय
स्वप्रबोधेनवीरचक्रेश्वरोभवेदिति ॥

एवमुक्तप्रकारेणैतत्परंपरिस्फुरणोबोधलक्षणंपरशिवतत्त्वपरं

ज्ञातेनविज्ञाताः अर्णाः वर्णाः पंचदशात्मप्वागमानामहार्थबोधक
त्वात् तच्चोद्धारं तदर्थं तया आख्याते यदेतत्रिपुराकारो भवेदि
त्यारभ्यैतत्पर्यंतेन श्लोकपंचकेन षड्विधो भावार्थः संप्रदायार्थर
हस्यादिना प्रतिपादितषट्प्रकारः हे विप्रकाशविमर्शात्मसामरस्यरू
पे परशिवे दुर्गंदिशिकेन्द्रकटाक्षपातविहीनैरप्राप्य स्वरूपोसा
धो यस्य प्रबोधेन षड्विधार्थस्य बोधेन वीरचक्रेश्वरो भवेत्
इदंनारिपोरहमिरणंगेन प्रलयप्रतिपादनपरा वीरास्तेषां
चक्रं समूहस्तस्येश्वरः परशिवः एवं ज्ञातषड्विधार्थविज्ञान
समय एव परशिवो भवेदित्यर्थः ॥
इति श्रीपरमहंसपरिव्राजकाचार्य श्रीपूर्णानंदशिष्यामृतानं
दयोगिप्रवरविरचितायां योगिनीहृदयदीपिकायां मंत्रसंकेतो
नाम द्वितीयः पटलः २

क्रमप्राप्तं पूजासंकेतं वक्तुं प्रतिजानीते ॥

पूजासंकेतमधुना कथयामि तवानघे इति

एवम् श्रोतृप्रवृत्तये फलमाह ॥

यस्यबोधप्रमात्रेण जीवन्मुक्तः प्रमोदत इति

यस्य पूजासंकेतस्य प्रबोधमात्रेण परादित्रिविभेदतः के
वलपरिज्ञानेनैव जीवन्मुक्तः जीवन्नेव मुक्तः संशिवोहम
स्मीति प्रमोदते परशिवाहंतामिति रेव प्रमोदहेतुः पूजा
संकेतमारभते ॥

तव नित्योदिता पूजा त्रिभिर्भेदैर्व्यवस्थितेति

प्रकाशात्मनो मम विमर्शशक्तेः विमर्शरूपिण्याः स्तव।
नित्योदिता पूजा नित्यं प्रसरद्रूपादि विहिता त्रिभिर्भेदै
र्व्यवस्थिता पूजानामान्याह ॥

परा चाप्यपरा गारि तृतीया च परापरा इति

प्रथमा पूजा परा उत्तमा उच्यते परशिवाद्वैतप्रथाप्रापक
त्वात् इतरपूजाभ्यामुत्तमा तदुक्तं संकेतपद्धत्यां न पूजा
बाह्यपुष्पादिद्रव्यैर्या विहिता निशं स्वमहिम्न्यद्वये याम्बि
सा पूजा या परा स्थितिरिति अपरा द्वितीया पूजा भेदप्रध
ना बाह्यचक्रावरणार्चनरूपा तन्वयमान पूजा बाह्येत्यादिव
चनात् तृतीया पूजा परापरा बाह्यसंततेर्याम्बि प्रहृदय
विलयभावनामयी मध्यमा परापरात्मकत्वात् तासां

लक्षणानिक्रमेणाह ॥

प्रथमाद्वैतभावस्थासर्वप्रसरगोचरेति ।

आत्मामनसासंयुज्यतेमनइंद्रियेणेंद्रियमर्थेनेति एवं
क्रपरिपाट्या सर्वेषामिंद्रियाणांयोव्यापारस्तेषांगोचरी।
भूतकोर्थः यत्रयत्रमनोयातिबाह्येचाभ्यंतरेन्द्रिये तत्रत
त्रापरावस्थाव्यापकत्वात्क्रयात्मि तत्रतत्रात्ममार्गेणैवेत
त्संव्यज्यतेप्रभोः तस्यतन्मात्ररूपत्वाच्छिल्ह्याङ्गारितास्थि
तिरिति विज्ञानभट्टारकोक्तरीत्या बाह्यस्यचिल्लयलक्ष
णाद्वैतप्रथापराख्येत्यर्थः ॥

द्वितीयाचक्रपूजाचसदानिष्पाद्यतेमयेति

द्वितीयापरापराख्याचक्रस्यादिदेवतानः श्रीचक्रपदनिवा
सावरणदेवतानामतोपराख्येत्यर्थः सदानिष्पाद्यते
मयासदाप्रत्यहंसर्वज्ञेनापिमयानिष्पाद्यते क्रियतेवा
यकत्वात् अभेदप्रतीतेः तथापरापूजासदासर्वैरपि
तांनिभिःकार्येत्यर्थः अमन्याद्वैतप्रसक्तप्रतिषेधःस्यात्
नचतथापुक्तं तडक्तंतंत्रांतरे लब्धरूपक्वचित्किंचिन्नाद्ध

णेव निषिध्यते विधानमंतरेणातो निषेधस्यासंभव इ
ति परापरापूजामाह ॥

एवं ज्ञानमये देवि तृतीयास्वप्रथामयेति ।

एवं ज्ञानमये एवोक्ताद्वैतभावनामयेपि स्वप्रथामयी
वाह्यस्यार्थप्रथगावरणार्थेन ह्रासावज्ञाविवज्ञानमयता।
विश्रांतिस्तृतीयापरापरापूजा तदुक्तमभियुक्तैः प्रकाशै
कघनेयास्मिविकल्पाश्रयत्वादिकान् नितिपामर्थेनह्रासा
वज्ञाविवहनाहृतीरिति पूजाविधानमाह ॥

उक्तमामापराज्ञेयाविधानं शृणु सांप्रतमिति

परापूजा उक्तमत्वकथनादपरापरापरयोरधमत्वं मध्यमत्वं
चोपलक्षयति साज्ञेयाज्ञानेयथाज्ञानं कार्या अपरापूजा
पश्चाद्दत्त्वेन अप्रसक्तेयतान्यरत्वमत एवचोत्तमत्वं वेत्यर्थः
सांप्रतं ज्ञेयायाः पूजायाविधानं शृणु विधानमेवदूणोति

महापद्मावनांतस्थे वाग्भवे गुरुपादुकां
आप्यायनजगद्रूपापरमामृतवर्षिणीम्

यो॰
हृ॰ टी॰
९८
68

संविदेति।

महापद्मवनं प्रागुक्तममितसहस्रदलात्मककमलपद्म
वनैरात्मकत्वात्तद्वनमिति तदुक्तं स्वच्छन्दसंग्रहे यथोर्ध्वकमले
पद्मं सहस्रारमधोमुखं श्वेतं च निष्कलात्मकं मध्ये वा संस्थिता।
शक्तिकं व्यापिनी केवला शश्वदमृतौघप्रवर्षिणी महापद्म
वनं चैवं समन्तात्तस्य चोपरीति तस्यान्तःकर्णिकामध्यगत
स्थैव वाग्भवरूपिणी पूर्वोक्तरीत्या वाचः परापश्यन्ती मध्यमा
वैखरीभवं तस्मादिति वाग्भवत्रिकोणं तत्र गुरुपादुका
स्मरणेति तत्र मात्मीयमित्यादि पूर्वोक्ताभियुक्तवचनोक्त
रीत्या विश्वगुरोः परमशिवस्य स्वप्रकाशशिवमूर्तिरेकिको
त्रस्मदुक्तरीत्या त्रिभेदवती आप्यायनचराचरां परमामृतव
र्षिणीं निरन्तरनिबिडचिद्रसामृतवर्षिणी संविदात्मता।
या विचिंतितगुरुपादुकापरामर्शानन्तरमवश्यादस्वीकार।
माह ॥

परमाद्वैतभावनामदघूर्णितः इति

परमः शिवस्तेनाद्वैतभावना सोऽहमस्मीति समावेशरूपा सै
व मदः स्वच्छतेमदहेतुत्वात् तद्भूतेन मदेन घूर्णितः मदितः
स्वप्रकाशविघूर्णितरित्यादि अस्मदुक्तरीत्या परशिवाद्वैतभा

वनालक्षणागुरुप्रसादस्वीकारप्रोल्लासस्वरमानंदपरवश
इत्यर्थः प्रसादस्वीकारानंतरमांतरजपमेवाह ॥

दहरांतरसंस्पर्शाद्दालोकनतत्परइति

दहरंवियदंवरंवेश्मभूतंतत्पुंडरीकंपुरमध्यसंस्थितमिति
दहरोऽस्मिन्नंतराकाशइतिश्रुत्वा हृदयाब्जमध्यगतमाकाशंदह
रमित्युच्यते दहरमेवदहरांतरंतत्रसंस्पर्शादोदहरांतरसंस्
पर्शाद्दत्तस्यालोकनेविभावनेतत्परतत्परः तदुक्तमभियुक्तैः
आनंदलक्षणमनाहतनाम्निदेशे नादात्मनापरिणतंतवरू
पमीशे प्रत्यङ्मुखेनमनसापरिचीयमानं शंसंतिनेत्रसलि
लैःपुलकैश्चधन्याइति संयतेंद्रियसंचारंप्रोच्चरन्नादमंतरे
एवमेवजपःप्रोक्तोनतुवाह्यजपोजप इत्यभियुक्तवचनोक्तरी
त्या आत्मनादानुसंधानलक्षणंजपंकुर्यात् नतुनानाविधो
च्चारणलक्षणंवाह्यंजपंकुर्यादित्याह॥

विकल्परूपसंजल्पा विसर्ग इति ॥

विकल्परूपाणांनानाविधरूपाणामक्षराणांसंजल्प उच्चारस्त
ल्लक्षण जपविमुखजपात्तेंतः स्वयंनादोमंत्रात्माजपईरित

यो॰
सु॰ टी॰
६९

इति तादृशमपि ध्यानं कुर्यादित्याह ॥

ध्रुं तन्मुखमस्त्वेति ॥

तत्र प्रत्ययैकतानता ध्यानमिति योगशास्त्रोक्तरीत्या विजातीयप्रत्ययांतरितसजातीयप्रत्ययप्रवाहलक्षणध्यानेन सदाशाह्लानाः स्वचितेनानन्मुखः परशिवोपरो भूयादित्यर्थः तदुक्तं विज्ञानभैरवे ध्यानं या निष्कला चिंता निराकारा निराश्रया न तु ध्यानं शरीरस्य मुखहस्तादिकल्पनेति ॥

विकलोल्लासदलितसंकोचस्फूर्तिसुंदर इति

विदंत्रुपि महाभंगाभिन्नसंकोचसुंदर इत्यस्मदुक्तरीत्या परिकलितपूर्णभावः स्वतएवातिसुंदरः महात्रिपुरसुंदरीनामधेयपरविकलोल्लासंपदपरमसुंदरप्रेमास्पदपरशिवाभिन्न इत्यर्थः एतामप्येतादृशीं कुर्यादित्याह ॥

इंद्रियप्रीणनैर्द्रव्यैर्विहितस्वात्मपूजन इति

इंद्रियाणि घ्राणादीनि तेषां प्रीणनानि द्रव्याणि विशिष्टशाह्

स्पर्शाद्युपरमणं यद्वक्तितैः विहितं स्वात्मदेवतयाऽस्ज्जनयेन
सन्तर्पणाविधः तदुक्तं श्रुत्याम्नायरहस्य विधौ इंद्रियद्वारसं
गृहीतैर्गंधाद्यैरात्मदेवतां स्वभावेन समाराधयन्नान्तः सोयं महा
स्तव इति जगत्पियपापानकृतोल्लासमरसानंदविस्रंभणात्
भावयेद्दरितावश्यामहानंदस्ततो भवेदिति विस्तानमहा
रकोऽन्तरीत्या श्रोत्रादींद्रियविषयशब्दाद्यन्नभवजनिता
नेकानंमहानंदेन समीरसीकरणं परापश्येत्यर्थः अथप
दोष्जां वक्केनंदगभ्रनं वासंन्यासमाह ॥

न्यासं निवर्तयेद्देहे षोढान्यासश्चरः स्मृत इति

षोढान्यासश्चरः सरेणाम्यभिस्सविन्ने देहे निगद्यत इति शेषः
षोढः षट्प्रकारको न्यासः तत्प्रकारमाह

गणेशैः प्रथमो न्यासो द्वितीयस्तु ग्रहैर्मतः न
क्षत्रैस्तु तृतीयः स्याद्योगिनीभिश्चतुर्थकः राशि
भिः पंचमो न्यासः षष्ठः पीठैः निगद्यत इति

न्यासं न्यासनानि जानाना वेकवचनं निवर्तयेदिति शेषः षोढा
षट्प्रकारन्यासमाहात्म्यफलमाह ॥

षो॰
हृ॰ टी॰
८॰
70

षोडशनामसत्वंसप्रोक्ताः सर्वत्रैवापराजितः
एवंयोगस्तुगात्रस्तुसंस्तुताः सर्वयोगिभिः ना
स्यस्यस्तुत्योलोकेष्वपिस्मान्नस्तुतोजनः एए
वस्तुत्यः सर्वेषांसस्वयंपरमेश्वरः षोडशनामस
विहीनेयंप्रणमेदेशपार्वति सोविघ्नस्तु
माप्नोतिनरकेप्रतिपद्यतइति ॥

प्रोक्तोयंषोडशनामः सर्वत्रसर्वलोकेष्वपि अपराजितः अ
प्रतिहतसामर्थ्यम् छिन्नपाशत्वात्स्वयमेवपरमेश्वरः अ
तएवलोकेषुजनेषुसएवयोगिभिः स्तुत्यः किंबहुना सर्वे
षामपिस्तुत्यः नास्यस्यस्तुत्यः कोपिलोकेअस्ति यदिचेदेष
बलाद्नामस्यप्रणमयति सोमहस्रोभवेन्नरकंचप्रतिपद्यत
इत्यर्थः षोडशनामप्रकारंवक्ष्येप्रतिजानीते ॥

षोडशनामप्रकारंवकथयामितत्वानघइति

स्पष्टम् तत्प्रकारमाह

विघ्नेशोविघ्नराजश्चविनायकशिवात्मजो विघ्न
हृद्विघ्नकर्ताचगणनायकएवच एकदन्तोहिदे

तस्थगजवक्त्रो निरंजनः कपर्दवान्दीर्घमुखः शं
कुकर्णो वृषध्वजः गणनाथो गजेंद्रश्च शूर्पकर्णस्
त्रिलोचनः लंबोदरो महानादः चतुर्मूर्तिः सदा
शिवः आमोदो दुर्मुखश्चैव सुमुखश्च प्रमोदकः
एकपादो द्विजिह्वश्च शूरवीरश्च षण्मुखः वरदो
वामदेवश्च वक्रतुंडो द्विरंडकः सेनानीर्ग्रामणी
मत्तो विमत्तो मत्तवाहनः जटी मुंडी तथा खड्गी वर
एयो वृषकेतनः भक्तिप्रियो गणेशश्च मेघनादो ग

णाख्येतानि तावद्व्याख्येयानीति तेषां ध्यानमाह ॥

तरुणारुणसंकाशान्गजवक्त्रांस्त्रिलोचनान्
पाशांकुशवराभीतिहस्तांछक्तिसमन्वितानि
ति ॥

तरुणारुणसवर्णान् गजवक्त्रमिव वक्त्रं येषां ते गजवक्त्रा
स्तान् ऊर्ध्वकरयोः पाशांकुशौ अधःकरयोर्वराभये दधानान्
पुष्पादिभिः समन्वितान् अत्र सूचितानां नाम्नां मागमांतर
पद्धतिषु बोधकत्वान्न वदामः न्यासः स्यान्नान्यार ॥

एतां स्तु विन्यसेद्देहे विमातृकास्यात्स्वप्रिय इति

यो॰ प्रतानगणेशान् मातृकान्यासस्थानवन्मातृकाभैरवीन्यास
हृ॰ टी॰ स्थानेष्वन्यसेदित्यर्थः ग्रहन्यासमाह ॥
७१

71

सौरैस्तु सहितं सूर्यं हृदयाधः प्रविन्यसेत् विंदु
स्थाने तथा स्वतिं याद्दिवर्णावृतं ष्ठ्यैः भृगुं वैलोच
ने ह्ढ ह्ढे कवर्गाधिपतिं प्रिये हृदये विन्यसेत् कुजं कव
र्गादिपतिं गुरुः हृदयोपरि विन्यसेट् टवर्गाधि
पतिं बुधं बृहस्पतिं कंठदेशे नवर्गाधिपतिं प्रि
ये नाभौ शनैश्चरं वैवपवर्गेशां स्वरेणाहि वक्त्रेण
दिव्यैर्वर्णैः सहितेन शकमेवच लकारसहितं।
केतुं पादौ देवेशि विन्यसेदिति ॥

सौराकारादिविसर्गान्तैः षोडशभिः सहितं नाम्नादौ सूर्यं हृदया
धो विन्यस्य विंदुस्थाने ललाटस्थ्रैवेवोक्तं दीपाकारार्धमात्रश्चल
लाटे हूनरश्चित इत्यादिना स्वयास्त्रतिं चंद्रमसं यादिवर्णैर्वृतं ष्ठ
यैर्थैर्लववविन्यसेदित्यर्थः भृगुमंगारकं लोचनं ह्ढ ह्ढे कवर्ग
स्यपरिस्थितमधिपतिं विन्यसेद्हृदयेवत्तत्सि स्पष्टमन्यस्यादौ
देवेशि विन्यसेदित्यंतेन नक्षत्राणां स्थानानि न्यासं चाह ॥

ललाटे दक्षनेत्रे च वामकर्णे ह्यथ पुनः पुटयो

नासिकाग्राब्जकंठे स्कंदे हृदये च ततः पश्चात्कूर्पर
गुल्फेषु मणिबंधे हृदये तथा हृत्सरोजे नाभिदेशे
च कटिदेशे च ततः परं ऊरुगुल्फे तथा जानौ लिंग
देशे परहृदये ज्वालाकालानलप्रख्या वरदाभय
पाणयः नतिपाणिपाशिनी सर्वा सर्वाभरणभूषि
ता एतास्तु विन्यसेद्देवि न्यासेषु षोडशगाविन इति

कटिदेश इति कटिदेशयोरिति हृदये परं अन्यथा सप्तविंशति
संख्या नाघटते कर्णहृदय इति दक्षिणादितः दक्षिणेत्रे वामे चे
ति क्रमस्योपक्रांतत्वात् वरदाभयपाणयः नतिपाण इत्य
क्षावाक्षच न हृदयं गम्यते शेषं सुगमं योगिनीन्यासमाह

विशुद्धौ हृदये नाभौ स्वाधिष्ठाने च मूलके आ
ज्ञायां धातनाथाश्च स्वस्ताक्षाडादिदेवताः अमृ
तादियुताः सम्यग्धातवश्च स्वरेरयदीति ॥

विशुद्धौ तालमूले धातवस्तु गसंगां स्वमेदोह्यि मज्जाशुक्रा
णि तेषां नाथाः स्वामिन्यो डादिदेवताः डाकिनी शाकिनी ला
किनी काकिनी राकिनी डाकिन्यः अमृतादियुताः स्वच्छंदसं
ग्रहोक्ता यथा अमृता प्रथमा देवि द्वितीया कर्षिणी मता ६

यो॰ ऋाणीतृतीयास्यादीशानीचचतुर्थिका पंचमीस्यादुमा
हृ॰ टी॰ देविषष्ठीचैवोर्ध्वकेशिनी सप्तमीऋक्लिन्नघोषोक्ता ॠघाशा
७१ ष्टमिकीमता ऌकानवमिकाप्रोक्ता ॡघास्याद्दशमीमता
72 एकादशीतिसाचैकपादाद्वादशिकाशिवे ऐश्वर्याभिरताप
स्वादेंकारीत्रयोदशी चतुर्दशैषाघथात्मस्वा पंचधिकदशा
त्मिका षोडशीत्वत्तरादेविप्रोक्ताः षोडशकंठगाः कालरात्री
वखातीनागायत्रीचततःपरं ठकारीद्वादशास्येताद्वादशारेस
मर्चयेत् डामरीचैवफकारीणामिनीनामसीतथा थांनादा
तायणीधात्रीक्रियानादाचपार्वती हैकारीदशपत्रेषुसर्कादी
शांतिस्तयजेदिति वंधनीभद्रकालीतिमहामायायशस्वि
नी रक्तालंवोधिकाचैवपूजयेत्क्रमशः प्रियेइति चतुष्पत्रे
वदेवेशिवरदाचश्रियंतथा षष्ठांमरसंतीचैवपूजयेत्क्रम
शः शिवेइति तमांहंसवतीचैवपूजयेस्रहिपत्रकेइति ए
ताभिः शक्तिभिर्युक्ताध्यानयोगस्यसेश्वरीति न्यासेनिर्वेस्य
वंमातरोध्यानयोगपीसर्थः ध्यानंनिर्वस्याथततरोन्यासरू
र्थः ध्यानंतागमांतरादवगंतव्यं राशिन्यासमाह ॥

पादेलिंगेचकुक्षौचहृदयेबाहुमूलके इति
णापाश्चमार्गभावामपार्श्वावसानके मेषा
दिराशयोवीर्याःन्यस्तव्याःसरूपार्वतीति

पादादिस्थाने उ दक्षिणादितो वामांतं मेषादिराशयः वर्णै
र्मातृकान्तैः सह न्यस्तव्याः राशीनां वर्णा आगमोत्तरसंवादा
न्मयोच्यते आद्यैश्चतुर्भिः सहितो मेषो दक्षपदे तैः उकाराद्यै
स्त्रिभिर्वर्णैर्वृषभो लिंगदक्षिणे ऋकाराद्यैस्त्रिभिर्वर्णैर्मिथुनं
कुक्षिदक्षिणे ऐंओंभ्यां सहितः सिंहो दक्षिणे बाहुमूलके अंअः
शवर्गतः कन्या शिरो दक्षिणभागतः कवर्गेण तुला मूर्ध्नि वा
मे तथा बाहुमूलके वृश्चिकश्च चवर्गेण टवर्गेण धनुर्हृदि वामे
तवर्गसंयुक्तो मकरः कटिवामतः पवर्गेण घनः कुंभो वामे लि
गप्रदेशतः यवर्गात्तांतसंयुक्तो मीनः स्याद्वामपादके इति पीठ
न्यासमाह ॥

पीठानि विन्यसेद्देवि मातृकास्थानके प्रिये

मातृकास्थानक इति जातावेकवचनं तैरेव वर्गस्थानेषु विन्य
र्थः ॥

तेषां नामानि कथ्यंते शृणुष्वावहिता प्रिये इति

बहूनां पीठनाम्नां ध्यानमशक्यत्वात्सावधाना भवेत्यर्थः तन्न्या
सान्याह ॥

कामरूपं वाराणसीं नेपालं पौंड्रवर्धनः पुरस्थिरं
काश्मीरं कान्यकुब्जं पूर्णशैलं तथार्बुदं आम्रातकेश्वरं का

यो॰
हृ॰ टी॰
७३
73

षत्रिंसेत: कामकोट्टकं कैलासंभृगुनगरं केदारं
चंद्रपुष्करं श्रीपीठमेकवीरं च जालाध्रमालवंत
था कुलांतं देविकोटं च गोकर्णमारुतेस्वरं अट्टहा
संचविरजंराजगृहंमहापथं कोलापुरमेलापुरं
ॐकारंचजयंतिका उज्जयिन्यपिचित्राचक्षीरकंहस्ति
नापुरं उड्डीशंचप्रयागाख्यंषष्ठीमायापुरीतथा जले
शंमलयंशैलंमेरुंगिरिवरंतथा माहेन्द्रंवामनंचैव
हिरण्यपुरमेवच महालक्ष्मीपुरोड्याणंछायाछत्रम
त: परं एते पीठा: समुद्दिष्टा: मात्रकारूपका: स्थिताइ
ति

मात्रकारूपका: स्थिता: पीठा मात्रकारूपं येषां ते मात्रकारूप
का: क्रमेणादिक्षांतानां प्रत्येकं वर्णं प्रत्येकस्थानावस्थिता तत्त
स्थानेषु पीठानां न्यासं कुर्यादित्याह षोढान्यासानंतरमवश्यं भा
वितानत् श्रीचक्रन्यासस्य तदिदानीं श्रीचक्रन्यासमाह ॥

एवं षोढां पुराकृत्वा श्रीचक्रन्यासमाचरेदिति

एवमुक्तप्रकारेण षोढा षट्प्रकारंन्यासं पुराकृत्वा श्रीचक्रन्या
संसमाचरेदित्यर्थ: श्रीचक्रन्यासस्य महाप्रयोजनत्वादनस्य
कथितमपि श्रद्धप्रियायै कथयामीत्याह ॥

श्रीमत्त्रिपुरसुंदर्याश्चक्रन्यासं शृणु प्रिये यत्र
कस्यचिदाख्यातं तत्तु शुद्धिकरं परमिति ।

आनंदकणभिन्नार्थे शब्दस्पर्शादिपञ्चाणो प्ररतिविरतं येन तत्
हारिस्वविडम्बयाऽस्याभियुक्तवचनोक्तरीत्या संकोचलक्षणादा
रिक्तनिवर्तिनी परिणामपराह्वपा संविच्छ्रीरिच्यते तद्वतीत्रि
पुरसुंदरी त्रिपुरान्तरीयस्वरूपत्वात् संकुचितभेदलक्षणप्रपंचा
परपर्याय परमदौर्भाग्यपरिपंथिपरमाहंतसौभाग्यपदादि
रूपा सर्वप्राणिष्वात्मतया परप्रेमास्पदीभूता परिचिकला
तस्याश्चक्रे शिवादिक्षितिपर्यंत तत्त्वचक्रमयं तदविनाभाव
भूमिः तस्यान्यासं शृणु प्रिये मम प्रियायै ममैकरस्य लाल
स्यायै कथयामि यत्र कस्यचिदाख्यातमिति रहस्यत्वात् तत्तु
शुद्धिकरं परं तनोः षट्त्रिंशत्तत्त्वात्मनः शुद्धिं परचिन्मयैवस्या
न लक्षणं करोति अत एव परमुत्कृष्टमित्यस्यासंभवः श्रीचक्र
न्यासप्रकारमाह ॥

चतुरस्राद्विरेखायै नम इत्यादिना न्यसेत् द
क्षांसपृष्ठपाण्यग्रस्फिक्पादांगुलीषु च वा
मांगुलिषु स्फिक्पाण्यग्रे वामपृष्ठके मह
लिङ्गलपृष्ठे व्यापकत्वेन सुंदरीति ॥

यो. चतुरस्रादिरेखायै नम इत्यादिमंत्रेणादितो दत्तां समष्टादिह

सु. टी. लिप्तांतस्थानेषु दशस्वव्यापकत्वेन न्यसेत् दत्तां समष्ट

७४ ष्टं पश्चाद्भागः मलसिमूलेति मूलं शिरसः पुरस्ताद्भागः स्फि

74 क्सकं संधि समष्टमन्यत् पञ्चस्थानेषु न्यस्तव्याः शक्तीराह

अथैव स्थानदशके अणिमा
द्या दश न्यसेत् सिद्धीरिति

अणिमा लघिमा महिमेशित्व वशाकाम्य भुक्ती इच्छा प्राप्ति सर्व
कामाख्याः सिद्धयो दश चतुरस्रमध्यरेखायां व्यापकमाह

तदंतस्थतत्वव्यापकत्वेन संहरि चतुरस्र
मध्यरेखायै नम इति विन्यसेदिति

तदंतः सिद्धिस्थानानामंतर्देशो चतुर्दशो चतुरस्रमध्ये
रेखायै नम इत्यादिमंत्रेण तत्वव्यापकत्वेन विन्यसेदित्यर्थः
चतुरस्रमध्यरेखायां न्यस्तव्याः शक्तीराह ॥

तन्मध्यस्थानेषु देवेशि ब्रह्माण्याणास्तथाष्टकमिति

तस्याश्चतुरश्रमध्यरेखायामष्टसु स्थानेषु ब्रह्माण्याद्याः ब्रा
ह्मीमाहेश्वरीकौमारीवैष्णवीवाराहीइंद्राणीचामुंडामहा।
लक्ष्म्यः तथा विन्यसेदेवं चान्वयः तेषां स्थानाष्टकमाह

पादांगुष्ठद्वये पार्श्वे दक्षे मूर्धसपार्श्वके वा
मदक्षिणजान्वोश्च बहिरंसद्वये तथेति

सप्तमं चतुरस्रांतरेखाव्यापकमाह ॥

तस्याश्चतुरस्रांतरेखायां येन मरुत्स्यापि वि
न्यसेद्व्यापकत्वेन पूर्वोक्तात्स्वविग्रहे इति

चतुरस्रांतरेखायां येन मरुत्स्यादि मंत्रेण विग्रहे देहे पूर्वो
क्तात् स्व पूर्वोक्तानां ब्राह्म्यादिस्थानानां मंते देशेषु व्याप
कत्वेन अस्त्रव्याः शक्तीराह

तस्याः स्थानेषु दशमुद्राणां दशकं न्यसेदिति

तस्याश्चतुरस्रांतरेखायां दशसु स्थानेषु त्रिखंडमुद्रासहि
तानां संक्षोभिण्यादिमुद्राणां दशकं न्यसेत् तासां स्थानान्याह

यो॰
हृ॰टी॰
७५
75

ब्रह्माण्डपृष्ठस्थानांतः तासामष्टौ न्यसेद्यथः शि
खेहृद्द्वादशांते च पादांगुष्ठे च विन्यसेदिति ॥

तासां मुद्राणां मध्ये अष्टौ मुद्रा ब्रह्माण्डपृष्ठस्थानानामंतर्देशे
मुग्रष्टस्वविन्यस्य शिखे हृद्द्वादशांतपादांगुष्ठे च विन्यसेत् द्वा
दशांते षोडशांते मंडलादयः सूर्यमंडलस्थाने तदुक्तं स्वच्छं
दसंग्रहे षोडशांतमिति व्योमस्थाने चंद्रमंडलं तथात
स्थानकं सूर्यबिंबं द्वादशाशाक्तिकं द्वादशांते स्मृतं तेन स्थि
तं व्योमप्रदेशिकं इति तेन बिंदुतत्त्वे चन्द्रमसोपुंजं वतत् सू
र्यबिंदुमध्योर्ध्वमार्यकौण्डलिदेशात् इति शिरसा ललाट।
स्थानबिंदुतत्त्वोपरिस्थितं सूर्यमंडलस्थाने ललाटोर्ध्वद्वाद
शांतपदेन लक्ष्यते षोडशदलपद्मचक्रव्यापकमाह ॥

तदंतः षोडशदलपद्मायन
मइत्यथः विन्यसेत् ।

तेषां चतुरस्राणामंतर्देशाः शक्तीराह षोडशदलपद्माय
नम इत्यादिमंत्रेण षोडशदलं दत्त्वा ततः श्रोत्रपृष्ठादिस्था
नानि मंत्रस्वरूपव्यापकं विन्यसेदित्यर्थः ॥

तद्दलेकामाकर्षिण्याद्याश्चविन्यसेदि
ति।

तद्दलेज्ञानावेकत्वं तद्दलेषुकामबुद्ध्यहंकारशब्दस्पर्श
रूपरसगंधचित्तधैर्यस्मृतिनामबीजात्मामृतशरीराक।
र्षिण्यंतान्न्यसेत् तद्दलस्थानान्याह।

दलानिदक्षिणश्रोत्रपृष्ठमंसस्थकूर्परं कर
पृष्ठचौरजानुगुल्फपादतलंतथा वाम।
पादतलाद्येवंन्यसेद्व्यष्टकंमतमिति

दलानीत्यादितत्पृष्ठंतस्यपृष्ठम् एवमनेनप्रकारेणवामपा
दतलादिवामश्रोत्रपृष्ठंतमेतद्वाष्टकंमतंस्थानाष्टक।
द्वयषोडशदलान्यपीत्यर्थः अष्टदलव्यापकमाह

तदंतरेवाष्टदलपद्मायतन
मरुत्त्वापि विन्यसेदिति।

तदंतरेषोडशदलपद्मांतरे अष्टदलपद्मायतनमरुतिमं
त्रेणदक्षांसांसवादिस्थानानिसंस्पृश्यव्यापकंन्यसेदित्यर्थः
तद्दलान्याह

तद्दलेष्वष्टदत्तशंखेवजत्रुके ऊर्ध्वंनग
ल्फगुल्फान्तजत्रुशंखेचवामतइति ।

शंखजत्वादिशब्दानां शरीरावयवावच्छिन्नानामंगेषुप्र
सिद्धत्वादवगतिः तद्दलेष्वन्यस्तव्याः शक्तीराह ॥

अनंगकुसुमाद्यास्तु शक्तीरष्टौ च विन्यसेदिति

अनंगकुसुमानंगमेखलानंगमदनानंगमदनातुरानंग
रेखानंगवेगिनी अनंगांकुशानंगमालिन्यः शोषस्तग।
मम् चतुर्दशारव्यापकमाह ॥

तदंतश्चतुर्दशारचक्रायनमइत्यथ विन्यसेदिति

तदंतरष्टदलपद्मस्यांतश्चतुर्दशारचक्रायनमइतिमंत्रे।
ण चतुर्दशकोणस्थानानि ललाटादीनि संस्पृश्य व्याप
कं विन्यस्य चतुर्दशकोणेष्वन्यस्तव्याः शक्तीराह

तस्य कोणेषु न्यसेच्छक्तीश्चतुर्दश
सर्वसंक्षोभिकाद्यास्त्विति

सर्वसंक्षोभिण्याद्याः सर्वसंक्षोभिणी सर्वविद्राविणी सर्वा।
कर्षिणी आल्हादकारिणी संमोहनी सर्वस्तंभनी स्तंभनी
वशंकरी रंजनी उन्मादिनी अर्थसाधनी संपत्तिरूपिणी
मंत्रमयी द्वंद्वक्षयंकार्यः सर्वाशापूरक्षकोणानि प्रतिज्ञा
पूर्वकमाह॥

तस्य कोणानि वक्ष्यामि ललाटे दक्षभागे वरानने।
समग्रतः पार्श्वांतरुरुजंघांतं वाममंगेयादिपार्व
ति वामेरुवामपार्श्वे तु वामांसे वाममंगेरके लला
टवामभागे च तथा वैपूर्वेषु स्यापिरति॥

दक्षभागे ललाटस्यैव ललाटे इति प्रकृतत्वात् दक्षांगे दक्षां
समग्रतस्तथैः पार्श्वांतरुरुजंघांतं विति त्रिभिरपि दक्षश
द्वौ प्रयुज्यते वाममंगेयादीत्यादि शाद्दाशिष्टार्थो संबोधनकः वा
मांसरुत्स्त्रापि मध्य इति यो ज्येष्ठमिति शिरसः एवमन्यं
दक्षवामयोः प्रथमं ललाटे पादानात् ललाटं शिरसः पुर
स्ताद्भागः बहिर्दशारचक्रमापकमाह

ततो दशारचक्राय नमः स्वपिपार्वतीति

ततस्तद्दशकोणांतरं दशारचक्राय नमः इति मंत्रेण दत्वा

यो० भ्यादिदशकोणानि संस्पृश्य व्यापकमपि शाखादिन्यसेदिति यो-
हृ० टी० ऽयम् दशारचक्रस्य कोणान्याह ॥
७७

77

तस्य कोणानि दत्तानि नासिकामूलने त्रके क्र-
टीच वायुकोणेषु जानुद्वयप्रदेशेच कृत्तिने-
न्द्रेस्य च ज्ञारभ्य कोणायोज्येति ॥

तस्य दशारचक्रस्य कोणानि दशसु दत्तान्यादिस्थानेषु भाव-
नीयानीत्यर्थः कटीशावायुकोणेषु छंदस्त्वाहित्वेवक्र-
वचनं जानुद्वयमारभ्योरुद्वयपर्यंतं कृत्तिशब्देन लक्ष्यते ते-
न कृत्तेरुपरिभागः प्राचीअधोभागः प्रतीची दक्षिणवामपा-
र्श्वशादक्षिणोदीच्यौ वाहूलक्ष्यते तेन वामवाहुमूलमीशको-
णं वामोरुमूलं वायुकोणं दक्षिणोरुमूलं नैर्ऋतकोणं दक्षि-
णबाहुमूलं वह्निकोणं स्वगममयत् दशकोणेषु मत्स्याः

न्यसेत्तु नः सर्वसिद्धिप्रदाद्यानां
शक्तीनां दशकंप्रिय इति ।

सर्वसिद्धिप्रदाद्याः सर्वसिद्धिप्रदा सर्वसंपत्प्रदा प्रियंकरी मं-
गलकारिणी कामप्रदा दुःखविमोचिनी मृत्युप्रशमनी विघ्न

निवारिणी श्रीमसुंदरीसौभाग्यदायिन्यशेषस्यं श्रंतर्दशारव्या
पकमाह ॥

तदंतरन्यदशारादिचक्राय
नमस्तत्रापि विन्यसेत् ।

तदंतर्वाह्यदशारांतर्दशारचक्रायनमः इति मंत्रेणदक्षना
भ्यादिदशकोणनिसंस्थव्यापकं विन्यस्यदशकोणेषुसम्स
व्याःशक्तीराह

तस्यकोणेषुसर्वज्ञाद्याश्चविन्यसेदिति

सर्वज्ञाद्याः सर्वज्ञासर्वशक्तिसर्वैश्वर्यप्रदायिनीज्ञानमयी
व्याधिविनाशिनी आधारस्वरूपापापहरा आनंदमयीरक्षा
स्वरूपिणीसर्वेप्सितफलप्रदः स्पष्टमन्यत् तस्यकोणान्याह

दक्षनासासृक्किणीचस्तनेदक्षिणामेवच मेव
नीवामस्कंचस्तनसृक्किणीनासिकानासा
ग्रेचैवविज्ञेयकोणानांदशकंतथेति ॥

एवं दशकोणचक्रव्यापकमाह ॥

यो·
हृ·टी·
७८
78

तदंतस्याष्टकोणादिचक्राय
नमस्तस्यापि विन्यसेति ॥

तदंतदेशांतरष्टकोणादिचक्रायनमः इतिमंत्रेणचिबुका
द्याष्टकोणानि संस्पृश्यव्यापकं विन्यस्याष्टकोणचक्रस्यादित्वं
त्रिकोणादीतरचक्रेभ्यः प्रथमसृष्टत्वात् अष्टकोणेऽन्यस्य
न्यासः शक्तीराह

तस्य कोणेषु वशिन्याद्यष्टकं न्यसेदिति

तस्याष्टारचक्रस्य कोणेषु वशिन्याद्यष्टकं न्यसेदिति तस्याष्टा
रचक्रकोणेषु कामेश्वरीमोदिनीविमलारुणा जयिनी सर्वे
श्वरी कौलिन्यः तस्य कोणाष्टकमाह

चिबुकंकंठहृदयनाभीनांचैवदक्षिणे तथैवं
पार्श्वंचतुष्कंचमणिपूरादिवामकं चतुष्ट
यंचपार्श्वानामेतत्कोणाष्टकंभवतीति ॥

चिबुकादीनांपार्श्वचतुष्कंदक्षिणंमणिपूरादिमणिपूरकं
नाभिस्थानं नाभिहृदयकंठचिबुकानांपार्श्वचतुष्कंचैतत्को
णाष्टकम् अनंतरमायुधावरणन्यासमाह

हृदयस्यत्रिकोणस्यचतुर्दिक्षुवह्निन्य
सेत् शरचापोपाशसृणी इति ।

कामेश्वरी कामेश्वरयोः शरचापौशसृणी चेत्यष्टायुधचतुष्टयंमि।
लितंन्यसेत् शरचापेपाशसृणी इतिउभयीभेदेनप्रत्येकंद्वंद्वमित्य
र्थो अत्रैवंवक्ष्यति बाणान्नेत्रेषु चौचापौकर्णौपाशद्वयंमसेदिमादि

हृदयेमध्यकोणस्याइति ।

हृदयंमध्यस्थानंतेनित्रिकोणाकारोहृदयस्यत्रिकोणस्यचते
तस्यचतुर्दिक्षुशरादिकामेश्वरीबाणान्न्यसेत् ततस्त्रिकोणव्या
पकमुच्यते

त्रिकोणायनमस्तथा विन्यसेति

त्रिकोणायनमइतिमंत्रेणरेखात्रयंमस्तकप व्यापकंविन्यस्य
त्रिकोणेमस्तकादेवीरात्र ॥

तस्यकोणेषु अग्रदेवीनरेखच कामेश्वर्या
दिदेवींश्चमध्येदेवींचविन्यसेदिति ॥

यो॰ तस्यत्रिकोणस्याग्रदलेनोर्ध्वकामेश्वरीवज्रेश्वरीभगमालिन्यस्ता
हृ॰ टी॰ स्तांकामेश्वर्यादिदेवीनांमध्यदेवीचविन्यसेदिति मध्येबैंदवश्रीच
७६ क्रेदेवीप्रकाशविमर्शसामरस्यरूपांत्रिपुरसुंदरीविन्यसेदित्यर्थः
79 श्रीचक्रन्यासमुपसंहरति

एवंमयोदितेदेविन्यासोगुह्यतमक्रमः इति

स्पष्टम् अतस्त्वयागोप्यमित्याह

एतद्गुप्ततरंकार्यंत्वयावैवीरवंदिते इति

स्पष्टम् ननुकिमेतत्कस्मैचिदपिकथनीयमित्याह

समयस्यायदातव्यमिति

समयस्याकौलिकायसमयाचारनिष्ठायदेयंपरसमयाचारपरायनदेयमित्याह ननुकौलिकसमयस्यायसर्वस्मैदेयंनेत्याह ॥

नाशिष्टायकदाचनेति

समयस्यायाप्यशिष्टायानेननदेयम् मयाप्येतन्नदत्तोपि

नकस्यापिगुणाप्रकटीकृतमित्याह ॥

गुप्ताङ्गुमंतरं चैतत्तयाघप्रकटीकृतमिति

गुप्ताङ्गुमंतरं रहस्यादप्यतिरहस्यत्वात् एतत्तवमंदभाग्यत्ववि
मर्शात्मिकायाः प्रियतमायाअपियतोमायाघप्रकटीकृत।
गुणाम्यस्मैनप्रकटीकृतमितितात्पर्यं अथैवन्यासस्यगुनःप्रका
रांतरमाह ॥

मूलदेव्यादिकन्यासमणिमांतेपुनरप्यसेदि
ति।

एवंमणिमादिमूलेदेव्यंतेश्रीचक्रावरणदेवतान्यास कृत्वेदा
नीं मूलदेव्याअणिमांतेपुनःश्रीचक्रावरणदेवतान्यासंकु
र्यादित्यर्थः मूलदेवतान्यासमाह ॥

शिरस्त्रिकोणएवादिकामेश्वर्यादिकंन्यसेदिति

मूलदेव्यादिकमित्यनेनैवशिरस्त्रिकोणमध्येमूलदेव्याप्रथ
मंन्यासोज्ञेयः यस्माच्छिरस्त्रिकोणेशिरःकपालमध्येनिम्नत्रिको
णाकारमस्ति तहालेपरुडनर्वेदृष्यते तत्रएवादिकामेश्वर्यां।
दिकंन्यसेदिति आदिशब्दाद्भगमालिनीनरयोर्ग्रहणं आदिशब्दात्

यो॰ ष॰ टी॰ ८० 80

त्रेश्वरीभगमालिनीर्विन्यसेदित्यर्थः आद्यावरणन्यासमा
ह॥

वाणौ नेत्रे भ्रुवो श्चापौ कर्णे पाशद्वयं पुनः सृ
णिद्वयं तु नासाग्रे दक्षिणाद्यं तु विन्यसेदिति ।

वाणान्कामेश्वरकामेश्वर्योः नेत्रयोश्चापौ भ्रुवोः पाशद्वयं कर्ण
योः सृणिद्वयं तु नासाग्रे नासोभयपार्श्वयोः नेत्रकर्णनासाग्रे
इति चैकवचनं प्रयोगद्विवचनोपलक्षणं दक्षिणाद्यमिति
कथनादिश दक्षिणे कामेश्वरस्य वामे कामेश्वर्या श्चाद्यानि
विन्यसेदित्यर्थः वशिन्याद्यावरणन्यासमाह

मुंडमालाक्रमेणैव न्यसेद्वाग्देवताष्टकमिति

मुंडशिरस्तस्य मालाक्रमेण हृदि लपरितो वाग्देवताष्टका
धिष्ठात्रीणां वशिन्यादीनां देवतानामष्टकं न्यसेत् ननु वैंद
वचक्राद्युपरिस्थितं वैंदाद्यन्मन्त्रतानां तत्त्वमावयवानां न्यासः
किमिति नोक्त इत्याह

वैंदवादीनि चक्राणि न्यस्तव्यानि वरानन इति

वैंदवादीनि चक्राणि चतुरस्रान्तानि नव चक्राणि न्यस्तव्या

निस्थलत्वात् अर्थं चेद्राद्युक्तस्थानानि भवानीयानीत्यर्थः अतः
स्थलन्यासप्रसंगेन स्थूलानामेव न्यासो विधत इति भावः सर्व
ज्ञाद्यावरणन्यासमाह

नेत्रमूले त्वपांगे च कर्णे पृष्ठे त्वनंतरे पुनः चूडा
दिके च निश्रायेशेषार्थे कर्णपृष्ठयोरिति

कर्णांतरं कर्णस्य पश्चाद्भागः चूडादिके चूडायाः शुद्धिर्ललाटं त
दपि कर्णानंतरं न्यसेदिति संप्रदायः निश्शेषिरः पश्चात्त्रि
स्थलमवहारेवकोर्थः चूडादिनेत्रमूलापांगकर्णपृष्ठेषु
सर्वज्ञादीनां दशानामर्थं विन्यसेत् अथ तासामेवार्थं अवक्क
र्णपृष्ठस्वोन्यनेत्रापांगमूलेषु विन्यसेदित्यर्थः नत्र सर्वज्ञादी
नां नाम न कथितं कथमत्र ताप्यवन्यस्तव्या इति कथ्यंते उच्यते
र्ववक्रे वशिन्याद्याः न्यस्तव्याः कथिताः अनंतरोपरिवक्रे स
र्वसिद्ध्याद्यां न्यस्तव्याः कथ्यंते अतस्तयोरपि मध्यदेशस्थानेषु
पारिशेष्यात्सर्वज्ञाद्या एव न्यस्तव्या इति गृह्यंते सर्वसिद्ध्याद्या
वरणन्यासमाह

सर्वसिद्ध्यादिकं केशे प्रादक्षिण्येन विन्यसेदिति

स्पष्टम् सर्वसंक्षोभिण्याद्यावरणन्यासमाह ॥

हृदयमत्रकोणस्थाः शक्तयोपि च सर्वे वदिति

हृदये वक्षसि सर्वे वदेत् प्रादक्षिण्येन त्रकोणस्थाः शक्तयष्टत
दशकोणस्थाः सर्वसंक्षोभिण्याद्यास्तत्रायं विशेषः अनंगकु
सुमाद्यावरणन्यासमाह ॥

नाभौ तु षट्दलं तत्र वंशे वामे च पार्श्वके उदा
रे सव्यपार्श्वे च न्यसेदादि चतुष्टयम् वंश
वामान्तरालादि न्यसेदन्यच्चतुष्टयम् इति

नाभौ नाभिप्रदेशे अष्टदलं पद्मं तद्धि वंशं वंशपृष्ठस्थानि सव्यपा
र्श्वदक्षिणं वंशवामान्तरालादि वंशवामपार्श्वयोरन्तराले वामपार्श्व
पुरोभागयोरन्तराले पुरोभागदक्षपार्श्वयोरन्तराले दक्षपार्श्वपृष्ठ
वंशयोश्चान्तराले इत्येते अन्यच्चतुष्टयं अनंगरेखानंगवेगान्या
नंगांकुशानंगमालिनीनां चतुष्टयं नाभिदेशस्य पश्चिमादा।
दक्षिणमनंगकुसुमादीनां चतुष्टयं वाय्वादिनैर्ऋत्यान्तमनंगरे
खादीनां चतुष्टयं न्यसेदित्यर्थः कामाकर्षिण्याद्यावरणन्यास।
माह ॥

स्वाधिष्ठाने न्यसेत्सम्यक् सर्वाद्यावमानकमिति

स्वाधिष्ठानकमलप्रदेशे सम्यक् सर्वान्सर्वादिभागमारभ्य दक्षाव

सानंदं दक्षिणदिग्वस्तानकपर्यंतं चतुर्दिक्षु प्रतिदिशं चत
स्रस्रश्चतस्रः शक्तयः कामाकर्षिण्याद्याः क्रमेण मन्तव्याः न
नु कामाकर्षिण्याद्याः कथमत्र मीयंते इति चेदुच्यते पूर्ववदे
व पूर्वान्तरवक्रशक्तीनां नामग्रहणमविशेषात्रामास्तु काम
वमीयते सर्वसंक्षोभिण्यादिमुद्राशक्त्यावरणमासमाह

मूलाधारे समेतन्तु द्वादशाकं स्वायकोनमः इति

मूलाधारे मूलाधारप्रदेशे शिष्टं स्पष्टम् ननु किं मूलाधारे।
मुद्रादशकं ध्यानेन मन्तव्यमित्याशंकायामाह ॥

पुनः सव्ये च वंशे च वामे चैवांतरालके ऊर्ध्वा
धोदशमुद्राश्च ऊर्ध्वाधोवर्जितं पुनरिति

पुनः शाक्ताम्नाभौ तत्र षट्दलेतत्तत्राष्टदलमामोक्तस्थानानि
उच्यंते वंशे पृष्ठवंशे सव्ये च पार्श्वे चकारादुत्तरयोर्ग्रहणं वा
मे चैवांतरालके पृष्ठवंशवामपार्श्वान्तराले चकाराद्वामपा
र्श्वाद्यन्तरालानि गृह्यंते कोऽर्थः पृष्ठवंशादिदिशि वायवाम्यं
तराले चोर्ध्वाधस्ताश्च दशमुद्रा समेतम् नन्वूर्ध्वाय इति किमंत
रस्यानद्वयं तेनाह ऊर्ध्वाधोवर्जितं पुनरिति अनंतरोर्ध्वाधस्था

यो. नहृदयंरुद्रेशानदिशोर्मध्येस्थानमस्य प्रकीर्तितं नैरृतोत्तदिशो
ल. टी. र्मध्येस्थानमस्य प्रकीर्तितमिति ततविमर्शात्मामस्तोड्करीसा
८२ दशलोकपालार्चनरीत्यैव स्थानद्वयमित्यर्थः ब्रह्मण्याद्यावर
82 णन्यासमाह ॥

ब्रह्मण्याद्यष्टकं दक्षजंघायामिति

विन्यसेत्त्रयंगः शिष्टस्पष्टं ननु दक्षजंघायां न्यसेदित्यष्टके ता
न्यंकानि स्थानानीत्याह

ताश्च सर्वंवदिति ।

तात्र ब्रह्मण्याद्याः सर्वव्याप्तः सव्येचं वंशेचैत्यंकस्थानेष्व ग्रवए
ष्टवंशपाष्ठेन पश्चाद्भागोलक्ष्यते जंघायाः पश्चिमादिक्वत्तर्दिक्व
वायव्यांतरालेष्ववत्ता ब्रह्मण्याद्याः न्यसेत्यर्थः अणिमा
द्यावरणान्यासमाह

वामजंघासमारभ्य वामादिक्रमतोपिच सि
द्धाष्टकं न्यसेत्तेषु हृदयपादतलेन्यसेदिति

वामजंघासमारभ्य वामजंघायाः पश्चिमभागमारभ्य वामा
दिक्रमतोपिच वामान्तरान्नादिक्रमेणात्तेषु सर्वांगेषु स्थानेषु

सिद्धषट्कंन्यसेदिति शिष्टद्वयंपादतलेन्यसेदिति उक्तन्यासो
कर्षदर्शयत्स्वरूपसंहृत्यफलभूतांवासनांविदते ॥

**कारणात्मस्थितंन्यासंदीपाद्दीपमिवोदितं ए
वंविन्यस्यदेवेशीस्वात्मभेदेनचिंतयेदिति**

कारणात्मप्रकाशविमर्शसामरस्यरूपान्निखिलनिधानजगद्
पाद्दीपाद्दीपमिवप्रसृतंतंमहान्यासंकारणात्मरूपं एवमुक्तप्र
कारेणेतिकथितंन्यासंविन्यस्यस्वात्मनोभेदेनचिंतयेत् श्री
चक्रावयवात्मशक्तिकान् देहावयवैरैक्येनविभाव्य तद
धिष्ठात्र्याःपरायाश्चस्वात्मनोप्यभेदंभावयेदित्यर्थः उक्तैस्त्रिभिः
षोढादिभिर्न्यासैःपरारूपंचिदानंदलक्षणंभावयन्नविपक्कल
दयोवाह्यपूजाक्रियायोग्यतायैकरशुद्ध्यादिन्यासंकुर्यादित्याह

ततश्चकरशुद्ध्यादिन्यासंकुर्यात्समाहितइति

ततस्त्रिविधन्यासानंतरंकरशुद्ध्यादिन्यासंकारणात्मपराशुद्ध
कार्येरूपांगुलिस्थितां करोमिचिन्मयींशुद्धिंकरयोःस्पर्शशो
धिनीमितिमभियुक्तवचनोक्तरीत्या करशुद्धिन्यासप्रादिपस्या
त्मप्रजानावेकत्वंसमाहितःसावहितः करशुद्ध्यादिन्यासः च

यो.
ह. टी.
८३
83

न्तःशक्तीशास्तोक्तास्तेनाज्ञोच्यते केवलेनान्नेवागम्यते तत्रादौकंवि
द्यान्यासमाह ॥

मूर्ध्नि गुह्ये च हृदये नेत्रत्रितयपर्वत श्रोत्र
योर्युगले देवि मुखे च भुजयोः पुनः पृष्ठेजा
नुनि नाभौ च विद्यान्यासं समाचरेदिति

जानुनि नाभौ विद्याबीजत्रयेण न्यासो विद्यान्यासः मूर्ध्नि वाग्भ
वबीजं हृदये शक्तिबीजं गुह्ये कामराजबीजमित्येवं स्थानत्रये।
बीजत्रयस्योपरिन्यासो दिग्बन्धः करशुद्ध्यादीनां न्यासमाह ॥

करशुद्धिं पुनः श्रीवत्स्यासनानि षडं
गकं श्रीकण्ठादीन्स्वाग्देवीरिति

वाग्देव्योवशिन्याद्याः श्रीकण्ठन्यासः सकलदर्शग्रहोक्तः तत्रान्त
रप्रसिद्धत्वान्नात्रोक्तः शिवं सहंकामेश्वर्यादिदेवीन्यासमाह

आधारे हृदये पुनः शिखायां वैंदव
स्थाने श्रीचक्रादिकान्यसेत्

वैंदवस्थाने शिखायामिति समयेन क्रमोक्तेयः वैंदवस्थाने

रीपाकारोर्धमात्रश्चललाटेवृत्तमिष्यतइति सर्वोक्तेललाटेशिखा
नामकंउलिमात्रग्रंशिवस्यविश्रांतिस्थानं अत्रश्रुतिःतस्याःशिवः
शिखामध्येपरमात्माव्यवस्थितइति तेनतद्यामिस्थानंब्रह्मरंध्रल
क्षते अग्निचक्रात्मिकाः अग्निचक्रेकामगिर्यालयेमित्रेशनाथात्म
केकामेश्वरीदेवीरुद्रात्मशक्तिश्रीपादुकांपूजयामि सूर्यचक्रेजा
लंधरपीठेषष्ठीशनाथात्मकेवज्रेश्वरीदेवीविष्ण्वात्मशक्ति श्री
सोमचक्रेपूर्णागिरिपीठे उड्डीशनाथात्मकेभगमालिनीदेवीब्र
ह्मात्मशक्ति श्रीब्रह्मचक्रे उड्डियानपीठे श्रीचक्रनाथात्मकेश्रीम
हात्रिपुरसुंदरीदेवीपरब्रह्मात्मशक्ति श्रीइतिमेमेवंतत्वाः श
क्तयः अग्निसूर्यसोमब्रह्मचक्रादिकाःअग्निचक्रात्मिका १ कोर्थः
आधारहृदयभ्रूमध्यब्रह्मरंध्रेषुसूर्यवह्निसोमब्रह्मचक्रेषुकाम
गिरिजालंधरउड्डियानपूर्णागिरिपीठेषुरुद्रविष्णुब्रह्मपरब्रह्मच
क्रेषु कामेश्वरीवज्रेश्वरीभगमालिनीमहात्रिपुरसुंदरीत्येषेदिम
र्थः अयमेवार्थः संप्रदायविद्भिःदेशिकैः पद्धतिषुप्रपंचितः।
इत्यर्थः तत्वन्यासमाह ॥

तत्वत्रयसमस्तंचविद्यादीनत्रयात्मकं पादादिनाभि
पर्यंतमागलंशिरसस्तथा व्यापकंचेतिविन्यसेत

तत्वत्रयमात्मविद्याशिवाख्यतत्वानांत्रयंसमस्तंचतत्त्वत्रयसमष्टि
रूपंतुरीयतत्वं तदुक्तंस्वच्छंदसंग्रहे पादादिमायांतमात्मतत्वस्था

यो॰ तर्गतंस्वतंशुद्धविद्येश्वरसदाशिवविद्याख्यतत्त्वगणशिवशा-
ल॰ टी॰ क्तिद्वयंचैवशिवतत्त्वंप्रकीर्तितं प्रमातृमेयप्रमितित्रयमेतत्र-
८४ यात्मकं एतत्रयंशिवतत्त्वंसर्वतत्त्वमयंशुभमिति विद्याबीजत्र-
84 यान्वितं विद्याबीजानिवाग्भवकामराजशक्तिबीजानि एतद्बी-
जसमुदायरूपंतुरीयबीजंतत्त्रिभिर्बीजैरन्वितंपादादानाभि
पर्यंतपदसामर्थ्यात्नाभ्यादागलंलभ्यते शिरस इतिपंचमीसा-
मर्थ्यात्गलादितिलभ्यतेकोर्थः आत्मविद्याशिवशक्तितुरीयत-
त्त्वानि मूलविद्यावाग्भवकामराजशक्तितुरीयबीजादिकानि
चतुर्थीरसेंतानि उक्तार्थेपादादिनाभ्यंतनाभ्यादिगलांतंगला-
दिशिरोंतंसर्वशरीरव्यापकंन्यसेदित्यर्थः भूयोपिपरांहंताभाव-
नामाह ॥

स्वात्मीकरणपरंपुनरिति

परंविश्वोत्तीर्णंतेजःपुनःस्वात्मीकरणंएवंश्रीचक्रन्यासानंतरंस्वा-
भेदेनचिंतयेदितिपरेणोक्तमुक्तं इदानींकरशुद्धिन्यासानंतरम-
पिपुनःपरंतेजोमयंवर्णात्माभिन्नमिवप्रतीयमानंस्वाभेदेनचिं-
तयेदितिकरशुद्धिन्याससामर्थ्यात्आयातपरामर्शात्मतयाविभा-
वयेदित्यर्थः स्वात्मीकरणपुनःकरशुद्ध्यादिन्याससामर्थ्यान्मायोपरा-
गेस्वात्मतयाविभावयेदित्यर्थः अमृतप्लावनामाह ॥

संतर्पयेत्तु नैर्देवीं सौम्याग्नेयामृतैरिति

सौम्यं चन्द्रं अधोमुखसहस्रारकमलकर्णिकामध्यगतपूर्ण
सौम्यमंडल मध्यस्थितत्रिकोणान्तरस्थमद्धान्तरात्मकं अग्नेन्तरं
मूलाधारचतुर्दलकर्णिकामध्यगताग्निमंडलं मध्यस्त्रिकोण
न्तरस्थमनुच्छान्तरात्मसपरार्धकलारूपमाग्नेयं द्वयोरप्यसदा
नंडलिनीरूपयोरपि ऊर्ध्वप्रसरतोर्योनिलिंगाकारयोः साम
रस्यान्तरदमृतद्रवसारैः संतर्पयेदाप्लावयेत् अयमेव संप्रदा
यविभिर्देशिकैः पद्धतिरूपन्यासः स्मर्यते उक्तं चतुर्विध ॥
न्यासमनुवादद्वारः स्मरणोपसंहरति ॥

एवं चतुर्विधो न्यासः कर्तव्यो वीरवंदिते षोढा
न्यासो विणामाद्यस्य मूलदेव्यादिकः प्रिये करशु
द्ध्यादिकश्चैव साधकेन सुसिद्धये इति

एवमुक्तप्रकारेण षोढान्यासादिः सुसिद्धये सुखेन न्यासासामर्थ्यो
निराकृतप्रत्यूहतया परमनिःश्रेयसं प्राप्तये साधकेन सुष्ठु तु।
णाकर्तव्यः न तु सिद्धेन तस्य मुक्तत्वात् न ध्यानं तपः क्रिया न तु
क्तं विज्ञानभैरवभट्टारकैः यैरेव रज्यते द्वैमलर्प्यते वा परापरः
यश्चैवरञ्जकः सर्वमप्येकः कारञ्जनमिति न्यासचतुष्टयस्य

प्रातःकालेथवापूजाकालेवाहोमकर्मणि
जपकालेथवातेषांविनियोगःइत्थ्यकरथकृ
पूजाकालेसमस्तंवाकृत्वासाधकपुंगवइति

प्रातःषोढान्यासंपूजासमयेगणमादिन्यासंहोमकालेमूल
विद्यादिन्यासं जपकालेकरशुद्ध्यादिन्यासंकुर्यादित्ययंइत्थ
कथ्यविनियोगः अथवापूजाकालेसमस्तंचतुर्विधंन्यासं
कृत्वा साधकपुंगवःसाधकश्रेष्ठचतुर्विधन्यासकरणसाम
र्थ्या हिशीर्यमाणपाशजालत्वात् प्रमासर्वमोहनत्वात् अन
पव ॥

षट्त्रिंशत्तत्त्वपर्यंतमासनंपरिकल्प्य च गुप्ता
दियोगिनीनांचमंत्रेणाथबलिंददे इति ।

षट्त्रिंशत्तत्त्वपर्यंतंत्रिमादिशिवांततत्त्वसमुदायमासनंपरिक
ल्प्यचिन्मरीचीनामाधारत्वात् आसनंश्रीचक्रंपरिकल्प्य तदंके
श्रीपराक्रमोद्भवसरोजांतरेध्यायन् इत्यभिप्रायेशिवांतके सेव
णीजमक्रमस्तमनेनेयेणासनतानयेदिति गुप्तादियोगिनीनामिम
त्रसमस्तप्रकटपदमध्याहृतेत्यां आदिपदेनगुप्ततरसंप्रदायकु
लकौलनिगर्भरहस्यातिरहस्यपरापरातिरहस्ययोगिन्यःइत्येते
बलिपूजा तत्रनिर्देशः बलिपूजोपहारोपिदंडभेदकलोपिवेति

महाकविभिरप्युक्तं अविघ्नवलिपुष्येत्यादिनः कोर्थः भावि
नोवाहस्यज्ञाकरणात्सर्वे यद्वावास्ववस्यमाणं तत्तदांतरमाचरे
दितस्मउक्तरीमांतयोगार्थेस्वशरीरतन्त्रसम्प्रदायरूपंचक्रं वि
भाव्य समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलिनिगर्भरह
स्यातिरहस्यपरापरातिरहस्ययोगिनीश्रीचक्रपादुकाभ्यो नम
इतियोगिनीमूलमंत्रेणस्वशिरसिप्रज्ञां कुर्यादित्यर्थः एतेवाग्न
प्रज्ञां सर्वमाप्यादायेतेचकुर्यादिति सूचने ग्रंतरविघ्ननिरासमा
ह ॥

पिंडरूपपदं ग्रंथिभेदनादिघ्नभेदनम् ॥ ७
स्वाहान्मुखमूर्वस्वविद्याभ्यासेन संहरीति

गुह्यहृन्मुखमूर्वस्वचक्रचतुष्टयस्थानेषुविद्याभ्यासेन सौभाग्यविद्या
वाधीमचक्रचतुष्टयन्यासेन पिंडं कुंडलिनी पिंडशब्देन कुंडलिनीस्था
नेगुदमेढ्रांतरं कंदोलक्ष्यते रूपपदेति अनयोरुतेयः पदं हंसः प
दशब्देनहंसस्थानहृदयंलक्ष्यते रूपंबिंदुः रूपशब्देनबिंदुस्था
नेललाटंलक्ष्यते ग्रंथिशब्देनयत्रविष्णुस्त्रेमणिरिवग्रथ्यते त
हि मूलं ब्रह्मरंध्रं विन्मयंलक्ष्यते एतच्चतुष्टयभेदाविघ्नभेदनं
कोर्थः गुह्यादिस्थानचतुष्टयेविद्याभेदचतुष्टयन्यासेनपाता।
लादिषुलोकेषुयोविघ्नाभेदलक्षणः इत्यभियुक्तवचनोक्तरीत्या
पातालालक्षणनिभिन्ना तद्द्वंद्वंतदतीतविन्मयाद्वयानंदवि।

यो॰ श्रांति इत्रेपणपिंडपदरूपरूपातीतस्थानानि कंदहृदयल
ह॰ टी॰ लाटब्रह्मरंध्राणि भेदलक्षणानि भिन्ना ततः ऽर्धतदतीतचिन्म
८९ याहयानंदविश्रांतिर्निवासः इत्यर्थः एतेन सर्वमपि वाय्यए
86 ज्ञानंतरं कुर्यादित्युपलक्ष्यते अंतर्यागे देहस्यैव यागगृहत्वा
त् तदंतर्विज्ञानत्रिरस्यवहिर्यागगतानां विज्ञानानामनुसारणं कुर्या
दित्याह ॥

यागमंदिरगांश्चैव विज्ञानानुस्मार्यमेवविदिति

अपसर्पंतेभूतास्मादिक्रमस्तायफडितिमंत्रविन्यासको नि
गच्छंतो विज्ञानानि नवामांगसंकोचवान्मार्गेदृष्टोन्तार्यभूमिग
तानि भोगतान्द्विवाश्चविज्ञानानुसारयेदित्याह पार्ष्णिघातेनभौ
मान्तालेनच भोगतान् अस्त्रमंत्रेण हृष्टचदिव्यान्विज्ञाञ्चपो
हयेदितिव्यपोहयेत्त्रिःसारयेत् निर्गच्छतां विज्ञानानां पुनरप्र
वेशायवह्निप्राकारभावनामाह ॥ ॥

दिक्षयोर्ध्वततो वह्निप्राकारं परिभावयेदिति

संविदग्नौ महामारे विमर्शैकशरीरिणि भेदाभासमिदं सर्वं ज
होम्यपुनर्भवमित्यभियुक्तवचनात्कृतेन सर्वतः स्फुरित
परसंविदेव महावह्निः सएव प्रकारोदुर्लंघ्यत्वात्सर्वतो दिक्षु

परिस्फुरद्धृदयपरसंविदात्मकमहाबिन्दुप्रकाशपरिकल्प
नभावनयाभेदप्रतीतिलक्षणेनाविघ्नानामप्रवेशइत्यर्थः
सूर्यस्नामाह

सामान्यार्घ्येणदेवेशंमार्तंडंपरिपू
जयेत् प्रकाशशक्तिसहितमिति

सामान्यार्घ्यविशेषार्घ्येवलक्ष्यते प्रकाशशक्तिसहितः प्रका
शःपरमःशिवः शक्तिविमर्शाख्यातयासहितः नित्यसमवे
तः शिवएवभास्करः तद्विमर्शविभवोमरीचयोयैःसभास
यतिविश्वमंडलं तस्यस्नानमहंतायामतिरिमःसउकरीमास
र्वसामान्यार्घ्येणस्वात्माहंभावनालक्षणेनापूजयाभावयेदि
त्यर्थः वाह्यार्थःस्पष्टएवअग्रेसेवगणायिकामाह ॥

ग्रहणाकल्पमुज्वलं ग्रहादिपरिवा
रंचविश्वतेजोवभासक मिति

सवसंविद्विभ्राटदेवीलौहित्यंतद्विमर्शनमिति प्रमाणिकवच
नोक्तरीत्याविमर्शविदारणं उज्वलमुदयास्तमयरहितंग्रहा
दिपरिवारंचविषयान्गृह्णातीतिग्रहा इंद्रियाणितेषामादि
मनस्तत्परिवारंचविविधविषयग्रहणलक्षणसंकल्पप्रत्य

यो॰ प्रवाहप्रवर्तकमित्यर्थः अत्रोपनिषत् धियो यो नः प्रचोद
हृ॰ टी॰ यादिति विश्वतेजोवभासके तद्देवानां ज्योतिषां ज्योतिरिति
८७ श्रुतेः करीन्यायात्तेजो गुणप्रतीतिकारणानि जस्फुरणम्
87 वाग्यार्थस्तु सौभाग्यादयो ग्रहाः तस्य प्रधानत्वात् आदिशब्देन
षडंगानि गृह्यन्ते स्पष्टमन्यत् वाग्यचक्रोद्धारमाह ॥

सौम्याग्नेयघृतैर्दिव्यरोचनागुरुकुंकुमैः मू
लमुच्चारयन्सम्यगालिखेच्चक्रराजकमिति

सौम्यं कर्पूरं सौम्यनामवाचकत्वात् आग्नेयं काश्मीरं काश्मीर
जन्माग्निशिखेत्यमरः रोचना गोरोचना अगुरुः कालागुरुः
कुंकुमं प्रसिद्धं एतैः श्रीखंडं यावकीयावकीकृत्य तेन स्वर्णा
दिमये पट्टे हेमसूच्या विलिख्य मूलं सौभाग्यविद्यामुच्चारय
न्सेरेण वक्ष्यमाणं लेखयति स्वयं चोलिखतीति देशः तत् वक्रराजं
वत्सराज्ञायमयत्वात् तत्सर्वं रजाचकेभ्यपुत्रमं सम्यक्तमं
त्रिकोणशस्त्रायसमरेखमनोहरं मित्याभिषुक्तवचनोत्करी
त्याभावयेल्लिखेल्लेखयेच्च तद्भक्तमभियुक्तैः कस्तूरीकुंकु
मेंदुस्मराभिश्चक्रराजं लिखेदिति ॥ ॥

योगिनीमूलमंत्रेणातिपेत्सं ध्याजलिंमत इति

योगिनीनां प्रकटादीनां मूलमन्त्रेण समस्तप्रकटेत्यादिरूपेवै
क्येन पुष्पाञ्जलिं तत्तच्छ्रीचक्रे निक्षिपेत् पुष्पाणामभावे

मणिमुक्ताप्रवालैर्वा विलोममूल
विद्यया पूजनं सर्वं कुर्यादिति

विलोमं प्रतिलोमम् उच्चारितया सौभाग्यविद्यया वा शब्दः का
कान्तिवदभयत्वं संपद्यते पुष्पैः समरहितं सर्वं व्यापकेनापि
प्रकारेण कुर्यात् पुष्पाणामभावे मण्यादिभिर्वा योगिनीमू
लमन्त्रेण सौभाग्यविद्यया वा सर्वं पूजनं चक्रं पूजयेदिम
र्थः तथाकरणेन निष्फलमाह

पूजेसविघ्नाश्चनेकश इति

मण्यादिभिः पूजेसति श्रीचक्रेऽनेकशो विघ्नाः सम्पद्यन्त
न्यायाः सम्भवेयुः सामान्यार्घ्यविधानमाह ॥

श्रीचक्रस्यात्मनश्चैव मध्ये त्वर्घ्यं प्रतिष्ठापयेदि
ति ।

चक्रस्यैकीकरणो हृत्यतस्वसाधकस्य मध्ये अर्घ्यं वक्ष्यमाण
रीत्या प्रतिष्ठापयेत् अर्घ्यं प्रतिष्ठापनप्रकारमाह ॥

चतुरस्रांतरालस्थकोणषट्केषु
रेखयेति षडासनानि संपूज्येति

आनंदभैरवायेति वौषडंतेन तर्पयेदिमं तेन चतुरस्रांतराल
स्थकोणषट्के आदौ चतुरस्रं लिखित्वा तदंतर्वृत्तं तदंतः षट्कोण
तन्मध्ये त्रिकोणमिति मंडलं गोमयालिप्तभूतले मत्स्यमुद्र
याविलिखेदिति सामान्यमार्गेलक्ष्यं तदुक्तं श्रीपराक्रमेनोग्रे
मयं लिप्तो चतुरस्रे भुवः स्थले प्रवाहामार्थहस्तेन कृतया म
त्स्यमुद्रया दिव्यं गंधतत्त्वस्य युक्ते विलिखेदन्तो मंडले वेदास्रवृत्त
षट्कोणत्रिकोणमंतरांतरत इति चतुरस्रवृत्तांतरालस्थो कोण
षट्के षडासनानि संपूज्येति प्रमृतार्णवपोतांबुजसिंहासनं च।
क्रमसर्वमंत्रसाध्यसिद्धासनानि संपूज्य ॥

त्रिकोणस्यांतरे पुनः पीठानि चतुरो दे
वि कापूजाउ इति क्रमात् प्रचेयितेति

षट्कोणांतरस्थत्रिकोणमध्ये कामगिरिपीठं पूर्णगिरिपीठं
जालंधरपीठं उड्डियानपीठं च क्रमात् त्रिचतुरान् गीत्वा चतु
रो वा त्रिकोणकोणत्रयं मध्ये चैकमर्चयित्वा तत्राधारं प्र
तिष्ठाप्य ॥

अर्घ्यपादेतुवह्नेर्दशकलायजेदिति

अर्घ्यपादेआधारेतत्रपात्रंप्रतिष्ठाप्याभ्यर्च्याधारं तन्मध्येवह्निबिंबम
भ्यर्च्यतत्परितःकलाश्चाभ्यर्च्य तदुक्तंस्वच्छंदसंग्रहे षट्कोणान्त
त्रिकोणान्तवह्निबिंबंकलायुतं आवाह्याधारतोदेविपूजयेन्मंत्र
वित्तमइति वामाद्यादिक्षांतदशवर्णप्रयुक्तंतस्यैववह्नेर्दशकला
धूम्रार्चिराद्यायजेत् तदुक्तंस्वच्छंदे यादिक्षांतानिवर्णानिकला
वह्नेःमहेश्वरि एताःकलासमभ्यर्च्यस्वस्ववर्णैर्यथाविधिः स्व
बीजाद्यास्वनंत्यांतनाममध्यनमोंतिमाः प्रोक्तावह्निकलामंत्रा
नामानिशृणुसांप्रतं धूम्रार्चिनीलरक्ताचकपिलाविस्फुलिंगि
नी ज्वालामालिनविषघ्नीतन्हविर्हव्यवाहनी अष्टमीहव्यवाहा
चरौद्रीसंहारिणीततइति

ततःपात्रंप्रतिष्ठाप्यतत्रसूर्यकलायजेत् पात्रे
सूर्यकलाश्चैवकभादिद्वादशार्चयेदिति

पात्रमभ्यर्च्यतत्रमध्येसूर्यमभ्यर्च्य तदुक्तंस्वच्छंदे अस्त्रप्रक्षालि
तंशंखंस्थापयित्वाधारस्योपरि हृदयात्सूर्यबिंबंचसमावाह्यस्वमंत्र
तःअस्त्रसंपूजयेदिति अथसूर्यकलाः पूजयेत्कादिठांतंचवर्ण
जातंक्रमात्क्रमात् हंयंहंयंप्रयोक्तव्यंकलाश्चतदनंतरमिमास्सु
करीत्याकठादि ककारादिवकारांतवर्णयुग्मयुक्तद्वादशादिस

यो॰ कलाःक्रमात्तपिण्याद्यादशार्धयेत् तदुक्तंस्वच्छंदे कादिठांता
लि॰ टी॰ स्तपादेविमूर्तिनाम्नासमीरिताः तपिनीतापिनीचैवशोषिनीबो
८९ षिणीतथा भ्रामिणीक्लेदिनीचैववरेण्याकर्षिणीतथा सुषुम्णा
89 प्रष्टिवासाचमेघाचैवहिरण्यदा एताःसौरकलाश्चैवमुत्क्रमा।
द्रादिभांतिमाइति कठादिकथनाद्याकरादयोवह्निकलादशप्र
कारादयः षोडशकलासोमकलाइतिगम्यते तत्रपात्रेलवंगा।
दिभिःसुगंधिकुसुमैर्वासितेसलिलमापूर्यतस्मिन्त्रिंडमंडमध्य
र्चां तदुक्तंस्वच्छंदे एलालवंगकंकोलाजातीफलसमायुतात्
सुगंधिकुसुमैर्दिव्यैःसहितैःसिजलंकरोदिति नवयोनिसमा
लिख्यएवंजलमध्यतःविशुद्धिताःसमावाह्यचतत्रश्रेसमर्चये
दिति॥

विस्तृतेतत्पुनर्द्रव्येषोडशेंडुकलायजेदिति

तस्मिन्विस्तृतेतद्द्रव्येद्रव्यंविशेषात्मकंद्रव्यंचद्रव्यमयत्वमेवा
द्विविशेषार्घ्यस्य तदुक्तंस्वच्छंदे यतोहिविशेषार्घ्यस्यस्थापनंप्रो
च्यतेधुना आधारपात्रयोश्चैवतयोर्वक्ष्यामिपूजनं सामान्यार्घो
क्तमात्रेणकृतपूजितद्रव्यके पात्रेवामर्थमापूर्यशिरोमंत्रेणपू
र्ववदितिषोडशेंडुकलाःक्रमादाकारादिषोडशस्वरादिकाप्र
सृताद्याःषोडशेंडुकलामसेत् तदुक्तंस्वच्छंदे आदिकाद्यंतगाः
सौम्याःकलाषोडशकीर्तिताः तासांनामानिवक्ष्यामिशृणुस्व

वींगसुंदरि अमृतामानदापुष्टिस्तुष्टिः प्रीतिर्महेश्वरि रेवती
ह्रीमती देवि श्रीकांतिश्चस्वथा ततः ज्योत्स्ना हैमवती चैव छाया
संहरिणी तथा वामानामकलानां च नामान्येतानि वल्लभ इति

अमृतेशीं च तन्मध्ये भावयेच्च नवात्मनेति

अ १८ अमृतेशी समुद्भूतः भृगुः संवर्तकस्तथा पिनाकिनं च
खंडेशं भुजंगजालिनं तथा योजयित्वा क्रमेणैव कार्यकारण
मस्तके अर्धेंदुशं यजेदं तेन नवात्मायं समुद्भूत इति स्वच्छंदसंग्रहो
क्तो नवात्मानं तन्मध्ये नेन मंत्रेणामृतेशी प्रसृतामृतरश्म्याप्य
संतर्पित चराचरं भवानि भव शांतिं तां भावयाम्यहं तीव्ररीमि।
मभिप्रुक्तो मामृतस्राविणीं भावयेत् नवात्मना ततो गौरित।
र्पयेद्धातृदेवता इति यान्देवता डाकिन्याद्याः अत्रैवोक्त विशु
द्धो हृदयेनाभौ स्वाधिष्ठाने च मस्तके आज्ञायां याश्च नाथा अम
त्याद्याः आदि देवता इति नवात्मना स्वकीयेन भैरवाय तिष्ठं तेन
तर्पयेत्

आनंदभैरवं चैव वौषडं तेन तर्पयेदिति

आनंदभैरवं चैवेत्येवकारेण नवात्मनैवानंदभैरवं तर्पयेत्
नवात्मानमुच्चार्यानंदभैरवाय वौषडिति तर्पयेदित्यर्थः

ने॰ सामान्यार्थप्रकारंविशेषार्थेऽतिदिशति ॥

उ॰ टी॰

९०

तस्यैवार्थविशेषेणसाधयेत्साधकोत्तमइति

९०

सामान्यार्घप्रकारमेवविशेषार्घस्यसाधनमितिस्पष्टम्
एवमर्घशुद्धिंकृत्वानंतरम् ॥

गुरुपादालिमासाद्यभैरवायददेत्ततरिति

गुरूणांपरमशिवादिस्वगुरुपर्यन्तानांपादावलींपरंपरांदि
व्यसिद्धमानवौघत्रयवतीमासाद्य स्वशिरस्यर्घोदकान्तउ
कस्तैमेरसंपर्शशोधितमर्घमाललाटसमुद्गस्य महापद्मव
नांतस्यशृंगाटोदरवासिनो गुरुरूपिणोऽर्घोऽत्रनिवेदनाय
ददेन्निवेदयेत्ततस्तुनः

तदान्ताधरितेनतत्स्वगुरुपंक्तौनिवेदयेदिति

तस्यगुरुरूपिणोभैरवस्यान्तयाप्रेरितमर्घ्यं तत्तत्सदृशंगुरु
पंक्तौनिवेदयेत् प्रसादग्रहणमाह

तदेवंशेषमादायकामाग्नौविघ्नतःक्षि प

डुकांमूलविद्यांवजपहोमान्समाचरेदिति

तदीयंशेषगुरुदेवतायाःप्रतिशेषद्रव्यमादाय तत्त्वचतुष्टय
शोधनमंत्रैः कामोदेवःसकामयताहिमःसउत्करीमाविश्वच
स्मरकलापतौकामेश्वर्यांवप्राणिस्वात्मन्यग्नौविश्वतत्त्वावि
विश्वग्रसनशीलंतद्रूपंतेजोमयंततस्त्यात्तावतारोत्करीत्या
विश्वद्यस्मरकलाजालेपाडुकांस्वगुरुपादुकांसौभाग्यमूल
विद्यांजपहोमंभेदेंश्रमत्तेपण्णलत्तणंचसमाचरेत् तदुक्तंश्री
पराक्रमे निवेद्यामलंकल्पीयगुरोरग्रेतदात्तंय कल्पान्तद्भुत
शुक्लस्वविदग्नौविश्वद्यस्मरेत्तेयराशिमयंहव्यंवासनासोप
दशाकं पत्रेषांगणेशोज्वलंजपेदात्मानमाम्दशन्निति तदुक्तः
कामाग्निःसतत्रवनिवसति किंवाहविरस्यतत्राह ॥

महाप्रकाशेविश्वनोसंहाररवमनोद्यते मरी।
विहतीन्तेह्नयात्मनसाकुंडलीमुखेइति ॥

व्यवस्थितइतिशेषः अत्रश्रुतिः तस्याःशिखायामध्येतत्परमा
त्माव्यवस्थितइतिमहाप्रकाशे निरंयनदीमेनिर्वाणदीमप्र
मातरिवह्नौविश्वस्यसंहाररमनोद्यते विश्वादस्यशिवादेःप्र
मंतस्यसंहारेनिजकारणतावन्मात्राव्यस्थितौवमनेसर्जनेवी

यो. यते शिवस्यैवेच्छास्त्वेच्छयैव जगत्सर्वं निगिरत्यपि इति मनसा
ह. टी. सार्धं मरीचिविर्हृतीन्जुहुयात् अंतरस्य चिदनलस्य मरीचयो वृत्तिनि
९१ वहाः अर्थश्चतेषां संवादिकाहुतयः तदुक्तं विज्ञानभैरवे तत्र
91 नज्ञानमार्गेणैव तत्वं युज्यते प्रभो रितिकोर्थः कुंडलिन्याः शि
खायां महाशून्ये अवस्थिते सर्वप्राणिस्वात्मप्रकाशलक्षणे।
कामाग्नौ आत्मा मनसा संयुज्यते इत्यादि तेजांतरोक्तरीत्या वा
ह्निरर्थेषु प्रसृतचिन्मरीचिरूपान्तर्वृत्तिलक्षणां हविस्तेनैव मा
र्गेणांतर्मुखतया मनसा जुहुयादित्यर्थः तदुक्तं विज्ञानभैर
वभट्टारके: महाशून्यालये वह्नौ भूताक्षविषयादिकं हूयते
मनसा सार्धं सहोमश्चेतनास्रुचेति महामहिमशालीचाय
मेवांतरो होमः तदुक्तं पद्धतिषु धर्माधर्मैधनैर्दीप्ते आत्मा
ग्नौ मनसा स्रुचा सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यह
मिति अंतरामेव स्पष्टीकृतिमाह ॥

अहंतेदंतयोरैकात्म्यं नीडुचिकल्पितं म
ध्येनोरेकुसंप्रशंतेवस्तुरूपं महाहविः हुत्वा
हुत्वा स्वयमेव सहजानंदविग्रह इति ।

नोदनेस्वर्पणोः समप्रविश्रुहिरमृतात्मभिः समाहंताकरोसी
दविसंहरमवपुर्वैरमित्यभियुक्तवचनोक्तरीत्या अहंतेदंतयो

रेकं अहंताप्रमाता इदंताप्रमेयंतयोरैक्यंप्रमाणंतत्त्रितयसा
मरस्यरूपं विश्रांतिमवरप्रमेयस्तभगाच्चाल्लीमहाश्रमैव विश्वो
त्तीर्णमहाप्रमात्ववपुषः शक्तिस्तैर्नैसर्गिकी प्रामाण्यप्रणयेन
शक्तिरविचिंतामनुष्टुवन्तुर्दिशीसंविमर्शकसमिद्धस्तभरतोमया
स्मि मंत्रारणिमित्यभिप्रक्तवचनोक्तरीत्या मंत्रारणिमथनोद्भक
संभूतं तत्त्रितयसमष्टिरूपं वस्तुरूपं वस्तुमयं तदुक्तंशुख्याता
यज्ञमे स्त्रीऊर्यानस्ततंतंवस्तयदानंदमुखंभवेदिति महाहवि
र्हुते स्वप्रमेयलक्षणे हविर्यस्मिन्हुते स्वप्रमेयलक्षणे हविष्य
मात्मलक्षणे ज्योतिर्निरंतरंप्रज्वलति तन्महाहविरर्पणीकृति
र्होमे तन्मन्यासक्तविकल्पितं उन्मनीनामसर्वोक्तलक्षणासाक्ष
णिमुच्यते तत्संसक्तचित्तन्मयेनात्मस्तेन तर्पणीकृतिंतत्कृयात् प
वंरूपं हविर्हुत्वा आनंदब्रह्मणोरूपं तच्छदेहेप्रतिष्ठितं तस्या
भिव्यंजकं मद्यं योगिभिस्तेनपीयत इति प्रमाणवचनोक्तरीत्या
यावदानंदादिलयो भवति तावदितिवीप्सार्थः स्वयं चैव सह
जानंदविग्रहः तदुक्तं विज्ञानभैरवे जग्धिपानकृतोल्लास
रसानंदविजृंभणात् भावयेद्भरितावस्थां महानंदस्ततो भवे
त् मध्वाद्यास्वादभावेनकृत्रिमानंदजृंभणात् महानंदात्तुसं
धानात्तन्मयो भवेदिति कोर्थः मंत्रारणिमथनसंभूतमिदन्ता
हंतासामरस्यमयवस्तुरूपंचैतेस्तर्पणीकृतिंवकृशोकृत्वापरिस्फु
रत्परमानंदो भवेदिति इयमेवांतरतर्पणीकृतिः अतएवप्र

यो. विहृत्यं श्रीगुरुणि मे दनिर्देशणात्मिका स्थैर्यं मनसश्चमत्कार्यैरं विना
स्व. टी. विषयसंगमादिति ज्ञमोदयोत्करीत्या मनस्थैर्यं जायेत वाह्यवज्ञार्थ
९२ नेन्द्रियादिमाह

92

स्वप्रथाप्रसराकारं श्रीचक्रं पूजयेत्सुधीरिति

स्वरीः श्रीगुरुणानेन नानाविषयासक्ताः स्वसंविन्मात्रस्थितमनाः मन
सि स्थितै सति धीरपि स्थिरा तस्यां स्थिरायां तत्र प्रत्ययैकताननाः
ध्यानमिति योगशास्त्रलक्षणास्तोकरीत्या प्रत्ययैकताननतालक्ष
णं ध्यानं संभवति संभावनातिशयाय ध्यानपूजा विष्कृता भवति
अथ्याद्यावमृतीकृतं हृदं शिवादिभ्यो गुरुभ्यश्च निवेद्य स्वात्मानमे
कृत्वा प्रस्वलत्परमानंदस्वस्थिरा धीर्भूयादित्यर्थः स्वप्रथाप्रसरा
कारं स्वप्रथा स्वसंवित्सा बहिरर्थेषु इंद्रियद्वारप्रसरो व्यापारस्तद्
आत्मनः स्फुरणं ततस्तदाकारं श्रीचक्रं पूजयेत् नान्यत्किंचिदपि
वस्तुसंविद्देवतायाः प्रसारूपांतःकरणचतुष्टयात्मकमहदहंकृ
ति तन्मात्रदशेन्द्रियतद्विषयतत्त्वषट्कषोडशविकारं यावत्प्र
पंचमेव श्रीचक्रात्मना स्फुरतीति एतच्छ्रीचक्रपूजामाह ग
णेभिरित्यादि चक्रपूजां विधायोर्थमित्यर्थः ॥

गणेशं दस्मं वैव तैवेशं रतिकांतयेति

श्रीचक्रद्वाराग्रपार्श्वयोः गणेशं तत्क्षत्रिकिं हृतरीत्वेत्रेशावटुकाख्येन
क्षत्रिकिं हृतिकोचयेत् तदुक्तं संकेतपद्धत्यां हेताहेतमहामोह
शर्वरीतपणात्मः भास्वानिव जयत्येको गणेशो हृतरीपुतः प्र
तिभायाः परोल्हासो निशाकर इवापरः हृतिपुंकः सजयति वटुक
स्तोडवानिति इति ।

वाह्यद्वारयजेद्देवीश्च स्वस्तिकादिकाः इति

श्रीचक्रवाह्यद्वारप्रदेशे स्वस्तिकाद्या देव्यः सरस्वती श्रीदुर्गाभद्र
कालाश्वतस्रः स्वस्तिकादियासामिति समासः स्वाहाशुभंक।
रीगौरीवागीश्वर्यश्चपंचैतास्ताश्चदशदेवीनायिकायजेत् त
त्रसिद्धंपद्धतिषु

ततस्त्रांतस्त्रिकोणे त्रिगुरुपंक्तिस्त्रिधास्थितामि
ति ॥

ततस्तस्य श्रीचक्रस्यांतस्त्रिकोणे त्रिधास्थिता दिव्यसिद्धमानवौ
घत्रयवती गुरुपंक्तिः शिवादिस्वगुरुपर्यंतानां गुरूणां पंक्तिः प
रंपराणामपि शक्तायनेदिमत्रुंषगः गुरुपरंपरागुरुमुखादेव
ज्ञातव्या न लोकनौनचपुस्तकेषु लिखितामेतरहस्यत्वात्

तदंतश्च महादेवीनामावाहयनेत्सनः मह
पद्मवनांतस्याकरुणानंदविग्रहा मदंको

यो॰
ह्र॰टी॰
९२
93

पाश्रयांदेवीमिच्छाकामफलप्रदामिति

तदंतः श्रीचक्रमध्यत्रिकोणमध्यबिंदुवाख्यचक्रे तां महापद्मवनां
तःस्थां महापद्मवनांतस्थां वाग्भवेगुरुपादुका मित्युक्तोपाधित
द्वयकला योगसहस्रदलकमलमहापद्मवनमध्यस्थां मदंको
पाश्रयामनाश्रितेश्वरस्य प्रकाशात्मनो ममांकस्थां कारणानंद
विग्रहां कारणं हेतुरूपं ग्रैवेयवत्साति तेषां गणपतयमहंवलि
ङ्र्वैतहेतुनेति द्रव्यपानेन यत्रानंदः स एव विग्रहस्वरूपं कारो यस्य
स्त्री कोर्थः शोणितामृतीभूतद्रव्यपानापरिस्फुरत्परमानंदशरी
रामित्यर्थः भवतीमनाश्रितां देवीं विमर्शात्मिकां इच्छाकामफ
लप्रदां इच्छायत्काम्यते फलं स्वमेवकेनतस्याश्री महापद्मवनां
तस्थेकारणानंदविग्रहे सर्वभूतहितेमातरेह्येहि परमेश्वरेति मं
त्रेणावाहयेत् ननु महापद्मवनांतस्थमित्यनेनैवानाश्रितो दे
वोनाश्रितादेवी तत्र चक्रे समावाह्य कामेश्वरकामेश्वरीरूपेण ए
रूपावितिकथमेवमीयत इति चेत् उच्यते महापद्मवनस्थाः सकला
गमशास्त्राणां वक्ता देवो नाश्रित एव शक्तिरनाश्रिता न चान्यथा
महापद्मवनांतस्थां मदंकोपाश्रयां भवतीमिति वचनं न घटते
तथा शिवादीनां तयद्व्यागमशास्त्रवक्तृत्वमस्ति तथापि महा
पद्मवनांतस्थो वो नास्ति तदुक्तं स्वच्छंदसंग्रहे अनाश्रितस्य म।
ध्यस्थो मपद्मं सुविस्तरम् प्रसांख्ययोजनं तेजस्तत्र सिंहा।

सनस्थितं अनाश्रितसेश्वरस्य मध्यस्थः परमेश्वरः स्फटिकाभश्चे
यः प्रभुः शशांककृतशेखरः पंचवक्त्रो दशभुजस्त्रिपंचनय
नः प्रभुः सर्वावयवसंपूर्णो बृहन्मूर्तिः सनातनः सर्वज्ञः सर्व
कर्ता च सर्वानुग्रहणे रतः सर्वरत्नसमाकीर्णः सर्वाभरणभूषि
तः अनाश्रितकलादेवी तस्योत्संगे सदा स्थिता पंचवक्त्रा त्रिनेत्रा
च दशबाहिंदुशेखरा व्यापिण्यादि चतुष्कं च्याहंसं परिकीर्ति
तं सर्वोत्तरपर्यंतं दिग्गताः सर्वगाः शिवे रुद्रकोट्यस्तथानी
कैः स्वस्वरूपस्वशक्तिभिः संसेविता लोकपालैरष्टादीनिक
रोति सा अनाश्रितोयं भगवान्पंचवक्त्रस्त्रिरक्षया दशबाहुस्स
र्वार्थः ह्रिबाहुश्चैकबाहुकः कौलागमादिवक्तासीदेवमेव ।
सदाशिवः परापरविभागेन शिवा च संख्यमागमे उत्तरपदे ।
पुंके व्योमांबुजसहस्रारे सितकेसरमंडले तत्रासीनं मा
हादेवमष्टाकलनायिकेति ॥

भवंतीवन्मयैरेवनैवेद्यादिभिरर्चयेदिति

भवतीभिस्साधयेति भवंतीसंस्वित्तत्वाणां तन्मयैरेव पंचभू
तमयं विश्वं तन्मयी त्वं सदानंदे तन्मयी मूलविद्या च तस्या च क
थयामि तस्तत्र एवीकरीता पंचभूतानि भवदिच्छाविजृंभि ।
तानि पंचरूपिणमात्मानं देव्याः पंचोपचारैकैः अर्चयेत्सदंगं

यो. हृ. टी. ५५

94

येनपृथिवीक्रमेणनवं रूपेनवागंधदीपेनतेजोमयेरसेननैवेति
प्रामाणिकवचनोक्तरीत्या तैश्चनैवेद्यादिभिर्वियेत नैवेद्याद
योगंधपुष्पधूपदीपाः कोर्थः स्वगंधवत्पदार्थानुभवेनप्रमस्य
खतयाप्रमातरिविश्रांतिर्गंधसमर्पणं तेज्यात्मशब्दानुभवेनप्र
मस्यखतयाप्रमातरिविश्रांतिपुष्पसमर्पणं स्पर्शवत्पदार्थानु
भवेनप्रमस्यखतयाप्रमातरिविश्रांतिर्धूपसमर्पणं स्वरूपव
त्पदार्थानुभवेनप्रमस्यखतयाप्रमातरिविश्रांतिर्दीपसमर्पणं
स्वाद्रूपंदशवत्पदार्थानुभवेनप्रमस्यखतयाप्रमातरिविश्रांति
र्नैवेद्यसमर्पणमित्यर्थः तदुक्तंपुष्पाम्नायरहस्ये इंद्रियद्वारसंग्रा
ह्यैर्गंधाद्यैरात्मदेवतां स्वभावेनसमाराध्य ज्ञातासोयंमहामख इ
तिबहिरपिगंधपुष्पधूपदीपनैवेद्यानिपृथिवीवाय्वाकाशते
जःसलिलभवनयादेव्यैसमर्पयेदितिउपनिषन्नत्र ॥

त्रिकोणेत्वस्फुरत्तायाः प्रतिबिंबाकृतीपुनः त
त्तिथिमयीनित्याः काम्यकर्मानुरूपिणीरिति

त्रिकोणेश्रीचक्रस्यत्रिकोणेरेखात्रयेत्वस्फुरत्तायाः प्रतिबिंबाकृ
तीः गुणाः पंचदशप्रोक्ताभूतानांतन्मयीशिवाइत्येवंपृथ्वीकरी
त्या भूतगुणात्मिकायाः पंचदशाक्षरमालिनीश्रीविद्यायाः तत्व
स्फुरणांपंचदशप्रतिबिंबरूपास्तत्तिथिमयीस्तत्संख्याप्रति

पारिततिथ्यात्मिकाः काम्यकर्मानुरूपिणी नवचक्रमयो योऽसौ म
हावर्णादिसिद्धिद इति संकेतपद्धत्युक्तरीत्या बाह्यचक्रार्चनेका
म्यकर्मतदनुरूपकरवर्णादिसद्रूपधारिण्य उत्पत्तिर्विनाशरहि
तत्वान्नित्याः ततः कामेश्वरी नित्या नित्या च भगमालिनी नित्यक्लिन्ना
पि च तथा भेरुंडा वह्निवासिनी महाविद्येश्वरी दूती त्वरिता कुलसुं
दरी नित्या नीलपताका च विजया सर्वमंगला ज्वालामालिनी वि
चित्रा चेत्येवं नित्याः षोडशेति चतुःशतीशास्त्रोक्ताः पुनः शब्दाद
ध्येयेदित्यनुषंगः।

तत्र प्रकटयोगिन्यश्चक्रे त्रैलोक्यमोहने इति

तत्राद्ये चक्रे त्रैलोक्यमोहने चक्रे एतौक्तनिर्वचने चतुरस्रत्रयलक्ष
णे प्रकटयोगिन्यो यष्टव्या उत्तरस्थितेनान्वयः प्रकटपदस्य निर्वचन
माह।

**मातृकास्थूलरूपत्वात्तगादिव्यापकत्वतः यो
गिनः प्रकटा ज्ञेयाः स्थूलविश्वप्रथात्मनि ।**

मातृकायाः परापश्यन्तीमध्यमावैखरीत्वात्तस्याः स्थूलमकारादिक्ष
कारान्तं पञ्चाशद्वर्णमयं वैखरीरूपं तदुक्तं स्वच्छन्दे स्थूलं पञ्चाशद
क्षरमिति तद्रूपत्वात् मातृकास्थूलरूपवैखरीवर्णात्मकमयत्वात्
सिद्धीनां ब्रह्मादीनां च तदुक्तं चतुःशतीशास्त्रे तत्त्वक्रमयोगेन य।

संमात्राष्टकेस्थितं वदेतामष्टवर्गोत्थमहासिद्ध्यकेश्वरीमिति
त्वगादिव्यापकत्वतः त्वगस्रंगांसमेदोस्थिमज्जाशुक्रोजसः आ
दिनाष्टस्तेतत्व्यापकत्वात् त्वगाधारभूमध्यरक्तानितेवस्तनमा
स्तनाभिस्वाधुहृदयांद्यस्थि कंठमज्जाशुक्रनासापुटरूर्ध्वलला
टचक्रेषुस्थितत्वा ब्राह्म्यादीनांस्थूलविश्वप्रयात्मनिस्थूलत्वकथ
नात् अतएवविश्वप्रकर्षेणायन्तइतिविश्वप्रयाविश्वंभरातदात्म
ति भूगृहतयात्रैलोक्यमोहनेचक्रेस्थितत्वात् मातृकास्थूलरूप
त्वात् त्वगादियात्वनांस्थूलशरीरावयवतयातद्व्यापकत्वात् त्रै
लोक्यमोहनचक्रस्यस्थूलविश्वंभरात्मकत्वात् तदंतर्गतःसिद्ध।
योब्राह्म्याद्याष्टप्रकरतेयः अतभूगृहवासिनीनांनामग्रहणए
कंध्यानमाह

अणिमाद्यामहादेविसिद्धयोष्टौव्यवस्थिताः ता
त्वरक्ततनावर्णाः वराभयकरास्तथा एताश्चि
तामहारत्नामनीषितफलप्रदाइति

अणिमापश्चिमद्वारइत्यादि वन्हःशतीशास्त्रोक्ता लघिमावहिमे
विनावशित्वप्राकाम्यभुक्तीछाप्राप्तिसर्वकामाख्याःसिद्धयः त
वादिशाहेनब्राह्म्याद्याष्टसहांतेष्टौव्यवस्थितः अष्टौसिद्धयोनिंत्ये
वप्रसिद्धाः अत्रतदर्शितितातथे वामजंघासमारभ्यवामादिक्र
मतोपिच सिद्ध्यष्टकंन्यसेत्तेषुहृद्यपादतलेन्यसेदित्युत्रैवोक्तत्वा

नू महारत्नचिंतामणिः शिष्टम् स्पष्टम्

ब्राह्म्याद्याश्चपितृदैवयष्टव्याः क्रमशः प्रियेइति

ब्राह्म्याद्याः ब्रह्माणीपश्चिमद्वार इतिचतुःशती शास्त्रोक्ताः तत्रैव
मध्यमचतुरश्रेयष्टव्याः क्रमशः क्रमेणतासांध्यानमाह

ब्रह्माणीपीतवर्णाचचतुर्भिश्चाभिमानमुखैः वरदा
भयहस्ताचकुंडिकाहस्तशुभानना माहेश्वरीश्वेतव
र्णात्रिनेत्राशूलधारिणी कपालमेनंपरशुंदधाना
पाणिभिःप्रिये पैंद्रीतश्यामवर्णाचवज्रोत्पलला।
सकरा कौमारीपीतवर्णाचशक्तितोमरधारिणी
वरदाभयहस्ताचध्यानमाचरेश्वरी वैष्णवीश्या
मवर्णाचशंखचक्रगदाब्जकान् हस्तपद्मैश्चबिभ्रा
णाभूषितादिव्यभूषणैः वाराहीश्यामलच्छायापोत्रि
वक्त्रसमुज्वला हलेवमुसलंखड्गंखेटकंदधतीभुजै
रिति
कैरितिशेषः सिद्धंस्पष्टम्

चामुंडाकृस्नवर्णाचमुसलंडमरुकंतथा ख

यो॰ हृ॰ टी॰ ९९ खड्गवेतालकं चैव दधाना दक्षिणे भुजे नाग
खेटकं घण्टाश्चैव दधाना मे: कपालकमिति

96

वेतालाः पिशाचविशेषाः मूलक्रमतः खड्गवेतालौ दक्षिणैः
करैः नागखेटकं घण्टां च कपालानि वामकरैः दधानेत्यर्थः

महालक्ष्मीः सुपीताभा पद्मादर्पणमेव च मा
तुलुंगफलं चैव दधाना परमेश्वरीति

स्पष्टम् नन्वष्टादशकं किमिति न वक्तरक्षोक्तमेतेन नाशोकं
सत्यं वतः शक्तीशास्त्रेष्वष्टकस्यैव प्राधान्येन नाम्नातः
किं तु श्रीचक्राभ्यासे मूलाधारस्यैवष्टादशकं साधकोत्तम
इति सूचिताः अतो न स्वतन्त्रतोऽष्टादशकमपि पूजयेदि

ति ॥

एवं ध्यात्वा पूजयेद्देवताश्चक्रेशीं त्रिपुरां ततः इति

एवमुक्तप्रकारेण एताः प्रकटयोगिनीर्ध्यात्वा चक्रेशीं त्रैलो
क्यमोहनचक्रेशीं त्रिपुरां पूजयेत् विद्यादेवतयोरभेदविवक्ष
या त्रैलोक्यमोहनचक्रेशी विद्यानिर्वचनमाह ॥

कर्मेंद्रियाणां वैमल्यात्कारणशुद्धिकरी स्मृतीति

कारणात्मपरामृष्टकार्यरूपां शलिस्थितां करोमि विन्मयी
शुद्धिंकरयोः स्पर्शशोधिनी मित्यभिमुक्तवचनोक्तरीत्या का
र्यस्य शुद्धिर्नाम कारणतावन्मात्रतया पर्यवसानम् अथवा
अणोरणीयानिति श्रुतेरणीयसि कारणे विद्यमानस्यात्म
नोणिमा सा सिद्ध्यतीति सिद्धिः सा चाद्ये त्रैलोक्यमोहने चक्रे स्थि
तेति तात्पर्यं द्वितीयचक्रे सवासनांरजामाह ॥

षोडशस्पंदसंदोहचमत्कृतिमयीकलाः प्राणा
दिषोडशानां तत्प्राणानां प्राणनात्मिकाः वीजरूत
स्वात्मतात्कलना वीजरूपकाः प्रतरंगतया गुप्त
योगिन्यः संस्थिता मताः कामाकर्षणरूपाद्याः षोडशि
प्रायाम ततः प्रिये सर्वाशापूरणाख्येन चक्रे वामेन पू
जयेत्

स्पंदो नाम परायाः स्वस्वरूपेण प्रसारः तदुक्तं परापंचाशिकायां
सिसृक्षोः प्रथमः स्पंदः शिवतत्त्वं तदुच्यते प्रभासस्तमिति ते
न षोडशस्पंदाः षोडशविकाराः भूतेन्द्रियमनांसि तेषां संदोहः
समूहः स्वमकारो नाम तस्मिं चिद्दतिशयोदयः तदुक्तं क्रमोद
ये स्वैर्यमेव चमत्कारो विना विषयसंगतिमिति तन्मध्ये श्रेते

यो॰
हृ. टी.
९०
९७

द्रियमनः सुचिरन्तु प्रविष्टाः कलाः षोडशाधारस्फुरंति तदात्मि
कास्मर्थः कलाः षोडशकलासंख्येः कलाभिधानस्य प्राणः प्रा
दिर्येषां प्राणापानव्यानोदानसमान नागकूर्मकृकरदेवदत्त
धनंजयदशवायवस्तेषु षडंगमंतरेषु स्पन्दरूपास्तेषां प्राणना
त्मिकाः प्राणादयोऽवितेनतयैतेषां प्राणादीनामपि प्राणात्मिका
इत्यर्थः बीजभूतध्वनिबिंदुयुक्तत्वात्स्वराः षोडशकारादिविस
र्गांतास्तदात्मकत्वात् कलनात्म्यक्रमात्सबिंदुकस्वरप्राभवा
त् कलनाबीजरूपकाः स्वस्वबीजस्वरः स्वरूपांतर्गतया षोडश
विकाराणां त्वमादिधातुवदप्रकटत्वात् तन्मध्ये योगिन्यो गुप्ताः
संस्थिताः अंतरंगतया अंतरंगमंतरिंद्रियं तद्धि लक्ष्यमकार
मयत्वादेताश्चांतरंगगुप्तपद्मगुप्ताः सर्वाशापूरणाख्येचयो
गिन्यः तत्र ह्लादसत्त्वाद्द्वितीयार्थे प्रकाश्यमाना कामाकर्षिणा
द्याः कामाकर्षिणीरूपाः इत्यादिवत् शक्तीशास्त्रोक्ताः स्वा
दिप्राधान्यतः स्पष्टा वामाचक्रस्यैव प्राधान्यात् अस्य चक्रस्य स
ष्टिरूपत्वात् तस्या योगिनी वामेन पूजयेत् वामावर्तक्रमे
णार्चयेत् विकारषोडशविलासभूताः प्राणादिदशवायवस्ताज
गत्प्राणनादिशक्त्यात्मिकाः सबिंदुषोडशस्वरैः कलिताः अने
केतन्मयीः अंतरंगचिरन्तु प्रविष्टषोडशविकारतया गुप्ताः
कामकर्षिण्याद्याः कलाः सर्वाशापरिपूरके च क्रे वाममार्गेण
जयेदित्यर्थः एतासां ध्यानमाह ॥

पाशांकुशाकरापतारकारकोंवराहुताइति

तस्यचक्रदेवतार्चने सिद्धिमाह

प्राणशुद्धिमयीसिद्धिर्लघिमाभोक्तरात्मनइति

प्रानेदवातेस्ययथासलनोदकमतिश्रुत्मकरीताविस्यप्राणेन
रूपयस्त्वययासहृदयेदकमपानमनतिप्राणिति तस्मिंस्तका
रणोलय प्राणादीनांवायूनांलीनवायुलयलक्षणायांतस्य
होमनोलयलक्षणः समाधिर्भवति ततस्तदेकरमभूतस्य।
भोक्तरात्मनोजीवस्ययहुतत्तुणोलघिमासिद्धिर्भवति

प्राणशुद्धिर्नामअत्र
प्राणशब्दोवायु
मात्रोपलक्षणपर ४

त्रिपुरेशीचचक्रेशीपूज्यासर्वोपचारकैरिति

याहशैरवोपचारैःसर्वगंधादिभिर्मूलदेवीपूजिता ताह
शैरवोपचारैःसर्वाशापूरणचक्रेश्रीत्रिपुरेशीपूजनीयेति
साहम् तृतीयचक्रेपूजांसवासनामाह ॥

प्रकृतमष्टकारूपस्थःकवर्गाद्यष्टवर्गगाः प्रेतंग
उस्तमाद्यास्तसर्वसंक्षोभकारके चक्रेचाष्टांतरग

यो॰
स्व॰ टी॰
५८
९८

नादेताउत्तमतरामता: पाशांकुशायुधवीणाकरा
रका: समर्चयेत् कौलिकाद्युभयाविष्टवोपपर्य
ष्टकाश्रिता: वाग्भवाष्टकसंवद्वादुत्तमवर्गा: स्वर
पत: तामनुत्तमतरा: सर्वा: सर्वसंक्षोभणाद्य
चनंगकुसुमाद्यास्त्विति ।

कुलेषट्त्रिंशत्तत्त्वमयेशरीरेतद्विषयानुभव: कौलिकानुभव:
कृशोहं स्थूलोहमित्येदितेनाविष्टो जीवस्तदाश्रयतयातस्य
बोध: पर्यष्टकं चित्तिश्रितं व चेतनं चेतनाद्वयकमेव जीव:
कलाचटेवेशिस्तत्पर्यकमतमिति स्वच्छंदसंग्रहोक्ते: सू
क्ष्मपर्यष्टकं तदाश्रितास्तन्मयतया वाग्भवमेकारस्तानशा
क्षीनेमनावामूलताचषडितिकोर्थ: मूलेस्थितायाइच्छाश
क्तेकुलेकुंडलिन्या: अकुलेस्थेनाकारेण संघट्टे सतिएकारो
जायते उन्मेषशक्तिरूपायास्तस्याएवाकुलसंघट्टे सति ओका
रो जायते तयोरेवाकुलसंघट्टे सत्यैकारो जायते इत्यर्थ: तदु
क्तं परापंचाशिकायां अनुत्तरानंदमयी इच्छाशाक्तो नियोजि
ते त्रिकोणमध्यषट्कोणमिच्छायोगाद्विभागते तएवोन्मेष
योगेन क्रियाशाक्तेः स्फुटं वपु: उक्तत्रिशक्तिसंघट्टत्रिशूलेदैन
वस्वरमिति मिश्रेच्छाभाविते रपि इच्छेषणांतराद्यफा: स्फुट
स्फुटजगन्मया: चत्वार: पञ्चतोवर्णा: षंढात्मान: प्रचोदिता इति

पंचाशिकोत्करीत्या ऋक्षलेषणाभ्यां मिश्रेच्छाभाविताः षंढा
ऋॠलृलॄवर्णास्तैरपि तच्चक्रस्वत्वमेवग्राह्यं अतएवाऋलृए
कोवर्णाः द्वितीयवर्णारच्छात्मकः उन्मेषोपरः परं षंढह्रस्व
ह्रयं च एकारैकारौकाराश्चेति नवस्वराभवति वेद्योग्ररूपमा
यार्णैः सत्तावाचिनिर्वीजत्वसादिमायांतिमं जगत् विलमश
न्याकारमेतत्स्यपरिशिष्यतमिति परापंचाशिकोत्करीत्या
वेद्यस्य षट्त्रिंशतत्त्वात्मनः संकल्परूपाङ्क्षाणाः शषसहाश्चे
ङ्क्षाणा इति तं ज्ञातेरेवमनित्याशुचिरूपसंसारलक्षणां परमदौ
र्भाग्य विहाय तस्य नित्यशुद्धपरमप्रेमास्पदसर्वस्पृहणीयपर
मशिवस्वरूपप्रकाशनमेवसौंदर्यं तदेवगुणस्तेन संयुता।
नादेकरस्तया चक्रेश्वरी सर्वसंक्षोभणाख्यान्तर्तीयचक्रस्य
रीकोर्थः विनायकशास्त्रादिविषयप्रमातः तेत्रस्तस्यापि रूपद
रूपरूपातीतविश्रांतिरूपलक्षणात्रितयउरातनी तदे
करस्य सौंदर्यशालिनी त्रिपुरसुंदरीत्स्तीयचक्रेश्वरीत्यर्थः
बुद्धिशुद्धिरूपात्तदैः शुद्धिनीमविषयसंसर्गं विहाय निर्वि।
कल्पचिदात्मलयरूपातएवमहिमासिद्धिरूपात्तदेरवि
षयोपरागाच्चिदात्मनो महिमामहत्त्वं सिध्यति तत्सिद्धिरू
पा चक्रेश्वरी सर्वोपचारकैः सर्वैर्गंधाक्षतादिभिरभ्यर्च्या चत
र्थचक्रेप्रज्ञासवासनामात्र ॥

यो· हृ·दी· ५५

99

द्वादशग्रंथिभेदेनसमुल्लसितसंविदैः विस
र्गांतदशावेशाच्छाक्तोद्भवएवैकमिति

ग्रंथिः षट्चक्राणां प्रत्येकं पूर्वापरौग्रंथिद्वयंद्वयमिति द्वादशग्रं
थयः अग्रेवक्ष्यति द्वादशग्रंथिभेदनवर्णनाद्यंतरेष्वियइति
यदुल्लसितायास्तत्रस्थायाः संविदः कुंडलिन्याः द्वादशग्रंथिभेदे
न विसर्गांतदशावेशाद्धि विसर्गः षोडशस्वरस्तेन विसर्गशब्देन षो
डशसंख्या गृह्यते अतो विसर्गांतं षोडशांतं यत् षोडशकलाका
रभूतं तद्व्योमांगं वयत् षोडशांतमिति ख्यातं व्योमस्थानेंदुमंड
लमिति स्वच्छंदसंग्रहोक्तरीत्या तदेवदशाविषयावस्थामदा
वेशः तदापत्तिः तत्क्रमेणैव व्योमेंदुमंडलासक्तस्वरूपाश्रांतः
स्वरूपिणीति शाक्तोद्भवएवैकं मूलोत्थितायाः कुंडलिन्याः
षट्चक्रग्रंथिसंचयभेदक्रमेण व्योमेंदुमंडलासक्तपरिकल
नमेव शाक्तोद्भव स्तत्स्वैकं भाविवर्णितस्थितिरितिक्रिया।
विशेषणं त्रैलोक्यमोहनादिचक्रत्रयी वैखरीमयता वासना
त्मकासर्वसौभाग्यदायिकादिचक्रत्रये भूतलिपिमयत्वमाम
यवासनामाह।

उन्मेषशक्तिप्रसरे इच्छाशक्तिप्रधानकैः
नपैवाकुलसंस्थरूपैर्वर्णैश्चलत्प्रत्यय वेध्या
पश्यंत्या मध्यमांमिश्रेच्छाभाविनैरपि कुल

शक्तिसमावेशरूपवर्णाद्वयात्मिकैरिति

अकुलसंघट्टरूपः अकुलं ब्रह्मरंध्रांभोरुहं सहस्रदलक
मलं तत्रस्थोकारः सर्ववर्णाग्रः प्रकाशः परमः शिवः इति सं
केतपट्टस्थककारः परमशिवात्मकः अकुलशब्देन लक्ष्यते
तेन संघट्टसंबंधः तद्रूपैरिच्छाशक्तिप्रधानकैरिच्छाशक्तिर
कारे उन्मेषशक्तिप्रसरैः उन्मेषशक्तिरकारः तदुक्तं परापं
चाशिकायां अनुत्तरेच्छा उन्मेषश्चानिमेषणमूलता क्रियेच्छा।
णामष्टकेन संबंधः सूक्ष्मैर्वैखरीवर्णाष्टवर्गाः तदुक्तं स्वच्छंदसं
ग्रहेपि स्थूलं पंचाशदाकारं सूक्ष्ममष्टाष्टकमिति तत्स्वरूपाः
स्वरात्मकत्वात्सूक्ष्मतराः सूक्ष्मवैखरीवर्णवर्गात्मकत्वात्।
ता अपि सूक्ष्मा अनाद्यंतानंतरंगतया सूक्ष्मतरा इत्यर्थः ताः सर्वा
अंतरंगकमसमाद्याः सर्वे इत्यादिवर्णाः शांतीशास्तोकाः सर्वसं
तोभगाद्यलतीयचक्रेष्टदलकमलेस्मादिति तासां ध्यान
माह

रक्तकंचुकशोभिताः वेणीकृतकलसकोशा
स्त्रापवाणधराः शुभा इति तत्तदाकारबुद्ध्यात्म
भोगप्रभोक्तमेहेशिनः पिंडादिपदविश्रान्तिः
सौंदर्यगुणासंयुता चक्रेश्वरीवृद्धिरूपाव
परमेश्वरि महिमासिद्धिरूपावस्थासर्वोपवा

यो॰
हृ॰ टी॰
१००
100

रवैरिति ॥

इंद्रियद्वारा बहिर्निर्गमनं तत्तदाकारतत्तदिंद्रियार्थाकारकारि
ता बुद्धिरंतःकरणपरिणतिस्तदात्मनो भोग्याः शब्दस्पर्शरूप
रसगंधास्तेषां भोक्ता प्रमाता स एव महेशिता भूपतिस्तेन तत्त
त्तियावत् तस्य पिंडादीनां पिंडपदरूपरूपातीतानां स्थानानां
विश्रांतिः रूपातीते तुरीयपदे मुक्तिः अत्र प्रमाणवचनं पिंडे
मुक्ता पदे मुक्ता रूपे मुक्ताः षडानन रूपातीते च ये मुक्तास्ते मु
क्ता नात्र संशय इति स्वच्छंदवचनात् एवंभूताः सद्यादिर्यस्य
हकारस्य स एव वेद्योऽस्वरूपाः सादिर्हकारः तदाद्यवर्णैः अत्रे
कच्यादिशाद्योव्याहार्थैः हयराः कुलशक्तिसमावेशरूपवर्णै
हृदयान्वितैः कुलशक्तिः कुंडलिनी तस्याः समावेश उदयविश्रां
तिस्थानं हृदयं आधारब्रह्मरंध्रमध्यं तद्रूपं वर्णे हृदयं वकारल
कारात्मकं आधारपंकजे पीतचतुष्कोणे सकेसरमित्यादि पा
र्थिवपंकजे हेतुदिग्गाद्यैतेन स्वच्छंदसंग्रहोक्तरीत्या आधार
पंकजस्य पार्थिवतया लकारः ब्रह्मरंध्रे यावदूर्ध्वकुंडलपद्म
महेश्वरस्थितं सकेसरोपेतं सहस्रारमयो शुक्ल इत्यादिव्या
पिनी केवला शक्तिरस्मृता चाप्रवर्षिणीत्याद्यैतेन स्वच्छंदसंग्र
होक्तरीत्या सततमयो वकारपतद्वर्णाः हृदयान्वितैः कोर्थः कु
लशक्तेरिच्छात्मिकायाः कुंडलिन्या उन्मेषात् षट्चक्रपंचग
गनद्वादशग्रंथिभेदक्रमेण कुलसमावेशात् अरुकल्प

पेङौङौहयवरल इति वर्णविवर्त्तदेशकमुच्यते तदुक्तमाग
माकारे भूतलिपिद्वारप्रसंगे पंचहस्वाः संधिवर्णाश्चाभवा
ख्यग्निजलं पेरेति तन्मयं वर्त्तदेशाख्यक्रममित्यर्थः संप्रदाय
क्रमायातसौभाग्यदायकशाम्भवोपासनामाह

शाक्तैः सारमयं तेन प्रस्तं तत्वात्महेश्वरि संप्र
दायक्रमायातश्चैकैः सौभाग्यकारकैः निरंतर
प्रथारूपसौभाग्यबलयोगतः प्रत्येकं समस्तकै
र्देवि प्राणिमासहृपीः सुवाः सर्वसंतोभिणी
एवा इति

शाक्तेरिच्छाशक्तेः ऊंइलिन्नाः साराः प्रसाराः एवीकरीत्या प्र
फलस्थानस्थानुत्तरशिवसंसर्गाः तन्मयत्वेन तदुत्तरत्वात्
यत्नेन वर्णानां तैर्वर्णैः प्रस्तं तत्वात्सर्वसंतोभिण्यादिशक्ती
नां संप्रदायक्रमायातत्वम् संप्रदायमहाबोधरूपगुरुमुखा
त्स्थित इति एवींकरीत्या गुरुमुखावगतत्वाद्वर्णानां तैः श्चासौ
वतन्मयत्वम् अतएवाः संप्रदायक्रमायाता इत्यर्थः प्राणिमा
सहृशीतास्वरकृतरावर्णैरिति एवोक्ता प्राणिमासिद्धिमहश्री
सर्वत्र सर्वशाक्तिसर्वत्वादिवत्तः शान्तीशास्योक्ताः निरंतरप्रथाः
अनंतरूपत्वभेदो निरंतरप्रथाशिवाद्वैतभावनासैव सौभाग्यप
रमसुभगापरप्रेमास्पदपराशिवाभेदगोचरत्वात देवबलेशानि

यो०
ह० टी०
९१
[0]

न्नयोगः अनित्याशुचिरूपपरमदुर्भगसर्वजनजुगुप्सास्पदलक्ष
णसंसारपरिपन्थिपरप्रेमास्पदसर्वस्पृहणीय परमसुभग
परशिवाहंतालक्षणसौभाग्यप्रतिपादनशक्तिसंयोगात्
अन्वर्थसंज्ञकेअष्टकूलाद्यारशालिनि संज्ञाभवति सौभा
ग्यकारकेचक्रेसंपूजयेदितिशेषः

देहाक्षादिविशुद्धिदाईशात्वसिद्धिरपिचवशी
कारूपेपुरत्रये योगादिक्लेशभेदेनसि
द्धात्रिपुरवासिनी एताः संपूजयेद्देवि
सर्वाः सर्वोपचारकैरिति

देहः षट्त्रिंशत्तत्वसमुदायलक्षणः तच्छब्देनतदहंताभिमा
नीप्रमातालक्ष्यते अक्षाणीन्द्रियाणिप्रमाणानि आदिशब्दाद्वि
षयाः प्रमेयरूपागृह्यन्ते तेषांशुद्धिश्चिदेकविश्रान्तिः तत्प्र
दातृत्वंसाशुद्धोयपुरीशिवंस्वांतंप्रसिद्ध्यति सवाचप्रोक्तरूपेप्र
मातृमानमेयलक्षणे पुरत्रयेपिनिवासशीलत्वात् अत्रैवव
सति मातृमानप्रमेयानांपुराणांपरिपोषिणीति योगादि
क्लेशभेदेनआत्मामनसासंयुज्यते मनइन्द्रियेणेन्द्रियमर्थे
नइन्द्रियाणांप्रकाशितनियमाननोऽर्थसन्निकृष्टेन्द्रियेण ।
नि तंज्ञानरोकरीत्या मातृमानप्रमेयेषु तत्तद्रूपेणविन्मरी

वीनां प्रसरस्तत्समवायो योगः सपवादिक्लेशः असंगाद
याविच्छिन्नसंविदात्मनो मानसेंद्रियविषयात्मना वहिरु
पराग एव क्लेशः क्लिष्टं तदेवेन प्रत्यग्रूपतया तदेकर
स्येन परप्रमातृविश्रांतिभेदः तदुक्तं परापंचाशिकायां स
र्वेसत्त्रीभेदाभिन्नविश्रांतिभूमये नमः प्रमातृविषये शिव
चैतन्यसिंधवे इति लोकावस्थामपि यत्रयत्र मिलितामरी
चयस्तत्र तत्र विश्वेरवत्त्रंभ इति स्थिता स्थिता त्रिपुरवा
सिनी एवोक्तपुरत्रयविश्रांतिरूपिणी चतुर्थचक्रेश्वरीप
नाद्यष्टावरणदेवता सिद्धिचक्रेश्वरीयुता सर्वाः सर्वोपचा
रैर्गंधादिभिः पूजयेत् पंचमचक्रपूजां वासनामाह

महातननानांनादानांनवरंध्रस्थितात्मने म
हासामानसरूपेणाव्याहतध्वनिरूपिणी प्रा
स्थिरस्थिरवेधानां छायारूपैर्देवताणिकैः कुलि
कौलिकयोगिन्यः सर्वसिद्धिप्रदायिका इति

महातननानां यावच्छरीरीभाविनां नादानामविकृतरूपत्व
स्पर्शनादध्वनिबिंदुशक्तिबीजानि तत्तद्रंध्राणां नवरंध्रस्थिता
त्मनां नवरंध्राणि नवद्वाराणि सप्तमांतर्गतगगनरूपवा
न् आधारस्वाधिष्ठानमणिपूरकानाहत उत्तरवक्त्रपद्मकंठ

यो॰ कलंविकाविशुद्धाज्ञाख्यानि तदुक्तं स्वच्छंदे आधारं स्वाधि
षि॰ टी॰ ष्ठानं मणिपूरमनाहतं मध्यमं पश्यकं च लंबिकाचविशु
१०२ द्धिकं आज्ञां च नवकं विद्धि षट्चक्राणि विहीनकमिति
102 तेषु स्थितात्मनो महासामान्यरूपेण मदृशाद्यंतरहितनि
र्विशेषध्वनिलक्षणा सामान्यं समष्टिरूपेणाहतध्व
निरूपिणी एवं व्याहतो नादो विमर्शो दशधा ध्वनिर्लिरू
पिणी अविकृतादिनादमयसूक्ष्ममध्यमारूपिणी सर्वः
अस्थिरस्थिरवेद्यानां अस्थिरवेद्यानि कर्मेंद्रियगोचरतया
क्रियारूपाणि वचनादानगमनविसर्गानंदाख्यानि स्थिर
वेद्यानि ज्ञानेंद्रियगोचराः शब्दस्पर्शरूपरसगंधाख्येषाम
स्थिरस्थिरवेद्यानां छायारूपैः प्रतिबिंबभूतैर्दर्पणिकैः
टतवर्गद्वयदशार्णैराविकृता इति शेषः कुलकौलिक
योगिनो तएव कुलस्य देहस्यावयवभूतानि दशेंद्रिया
णि कुलशब्देनोच्यंते तत्संबंधात्तत्स्थाश्च दश विषया
कौलिक इत्युच्यंते तयोर्योगः संबंधः कार्यकारणलक्षणो
यस्मात्तौ कुलकौलिकयोगिनः ननु श्रुतलिपिक्रमे क्रम
प्राप्तौ कवर्गचवर्गौ कथं टतवर्गौ यस्मिन्दशारे मुख्यक्रमेण
कथ्यते उच्यते चक्रदशारद्वयचक्राणां स्थितिरूपत्वात्
श्रुतलिपेर्मध्यमावयवत्वात् मध्यमायाश्च स्थितिरूपत्वा
त् स्थितिक्रमोयं वर्गक्रमः अत एव तत्कारणभूतमस्य

मध्यमानंदमयमन्त्राकथनमस्य चक्रस्य सर्वसिद्धिप्रदा
यकाः सर्वस्य सर्वोत्कस्यन्तानेंद्रियविषयजातस्य सिद्धिः
प्रतीतिः प्रमातृविश्रान्तिलक्षणायाः प्रतिपादिकाः
आसां ध्यानमाह

श्वेता वराभयकराः श्वेताभरणभूषिता इति

स्फुटम् सर्वार्थसाधकचक्रोत्पत्तिमाह

स्वप्रथामननत्राणयोगादन्वर्थसंज्ञके स
र्वसिद्धिप्रदाद्यात्मचक्रे सर्वार्थसाधके इति

सर्वसिद्धिप्रदाद्याः सर्वसिद्धिप्रदादेवीति चतुःशतीशा
स्त्रोक्ताः मन्त्राणां सर्वोत्कनिर्वचनानां स्वप्रथायोगात्स्वस्य शि
वात्मनः स्वसाधकस्य प्रथा शिवोऽहंभावभावना तदेव मन
नात्राणं तद्योगादर्थादन्वर्थसंज्ञके सर्वार्थसाधकपरानु
कूलार्थवत्संज्ञाशालिनि शिवाशिवाहंभावभावनालक्ष
णमननात् सर्वेषां स्वसाधकानामर्थं परमप्रयोजनं मोक्षं
साधयतीति योगात् सर्वार्थसाधके चक्रे संस्थिताः इति शेषः
स्वनामपरार्थश्रुत्यन्तिपरः सरमेतस्य चक्रेषीमाह

लोकत्रये समस्तानां हेलनाश्चक्र
नायिका त्रिपुरा श्रीमहेशानीति

लोकयतीति लोको लोक्यतेनेनेति च भुवनत्रयालोकत्रयस्य मा
तृमानमेयलक्षणस्य समस्तानां परिशरणपरप्रमातृविश्रांति
लक्षणानां हेलना त्रिपुराश्रीः पंचमचक्रेशी इत्यर्थः

मंत्रशुद्धिमवाप्नुतः वशित्वसिद्धिरा
ख्याता एताः सर्वाः समर्चयेदिति

मंत्राणां शुद्धिर्नाम प्रकृते त्रिपुरमंत्रे चैत्यादि ह्लींकारीत्योन्म
नीपर्यंतकलाबीजलक्षणोच्चारणेन विमर्शनात्मभावेन मंत्र
शुद्ध्या स्वसाधकस्य वशित्वं जगत्सर्वं प्रसृतं जगत्सर्जनसंहा
रैवस्थायतत्वं स्वात्मन्येव सिद्ध्यतीति नादशीघ्रपरशिवताप्राप्तेः
सर्वास्मिन्नवचक्रे वशित्वसिद्धिरिति एताः सर्वाः आवरणदेवता
श्चक्रेशी श्रीसिद्धियुताः समर्चयेत् षष्ठचक्रपूजां सर्वासनामा
ह ॥

ऊर्ध्वयोन्युत्थयादेवि कुंडलिन्याः प्रकाशिताः कुले
श्वर्या बहिर्भावात्कादिवर्णप्रथामयाः निर्गर्भयो
गिनीवाच्याः स्वरूपात्रयवेशके सर्वरत्नाकरे चक्रे

सर्वावेशकरेणः सर्वज्ञाद्याः स्थितास्त्विति ।

ऊर्ध्वाधोमुखयायदोहमस्मीत्यादि वक्तः शाक्तीशाख्योक्तरीत्या
अकुलपरपुरुषग्रामस्य ऊर्ध्वमुखयाअधरयोमुखया विश्वस्य
ये मूलाधारप्रविशंत्याः कुंडलिन्याः प्रकाशितात्प्रविश्वंजनताः का
रणोत्सत्वात् कुलेच्छया कुलमुकलत्वेणात्मात्मानमेयरूपतत्रि
च्छयानविर्माणेच्छयावहिर्भावात् कादिवर्णप्रथाम्याः षट्त्रिं
शतत्वसर्जनेनपतत्वत्रयमयमात्ममाणमेयलक्षणनिर्माणेच्छ
याकुलस्यपरशिवाहङ्कृतेः प्रसृतयासमस्ततत्ववर्णगर्भिण्या
कुंडलिन्या ककारादिदशवर्णप्रथारूपानिर्मितेत्यर्थः निगर्भ
योगिनीवाच्याः निगर्भयोगिन्य इति वचनात् निगर्भोपि महादे
विशिवगुर्वात्मगोचर इति सर्वोक्तरीत्या अहंतप्रथालक्षणः प
रप्रमातृयोगग्रासो योगिन्यो विषयेंद्रियसंसर्गलक्षणादर्पं
द्रियचक्रत्रयस्थितिमरीचयो निगर्भयोगिन्या स्वरूपावेशरूपकैः
स्वरूपस्यसायकात्मनाः प्रमातृत्वावेशः परशिवोहमितिम
तिः आवेशोहिलोकेवल्लरान्नसमोहमितिपराहंताप्रथातद्रू
पेतत्रिरूपके अत एव सर्वावेशकरे यत्रयत्रमनोयातीत्यादित
त्रत्वान्तमार्गेणचैतन्मयस्यतेप्रभोरिति विज्ञानभैरवभट्टारको
करीत्या सर्वत्र तत्पदावेशनदर्मेदेनसर्वैवस्फुरणंकरोतीति
सर्वावेशकरे चक्रे षष्ठचक्रे सर्वरत्नाकरे काके भोरत्नान्मन्त्रमि

यो॰ हृ॰ टी॰ १०४ 104

तिवचनात् प्रतिकूलपदार्थोपहतिपरिहारो रत्नानामसर्व
स्माह्लादप्रपंचलक्षणापरिपंथिनो रत्नापरशिवाभेदप्रतीति
रूपाः तत्करोपराः परशिवाद्वैतप्रतिपादनपरत्वादुत्कृष्टत्वा
त् सर्वाज्ञाद्याः सर्वशक्तिरित्यादि चतुःशतीशास्त्रोक्ताः स्थि
ताः तासां ध्यानमाह ॥

एताः सद्गुप्तानमालिका इति

गुलं गुलकं शिष्टसृष्टं नामगुप्तमिति गुरः सर्वचक्रेशीमाह

मातृमानप्रमेयाणां गुणानां परिपोषणी त्रि
गुणमालिनी ख्याता चक्रेशी सर्वमोहिनीति

गुणविस्पंदनिवासात्मनि प्रमेयाण्येव गुणानि तेषां गुणानां प
रिपोषणी सर्वेषां स्वप्रधानाप्रधानतोपबृंहिणी अत एव त्रिगु
णमालिनी ख्याता निरुक्ता चक्रेशी सर्वसंमोहिनी अत एव
तत्कृतमोहवशादेव हि मातृमानमेयरूपाभेदप्रथा तदुक्तं प
रापंचाशिकायां स्वांगभूतेषु भावेषु मायया नैव भेदधीरिति

विद्याशक्तिं विशुद्धिं च सिद्धिमाकाम्यसंज्ञितां ए
ताः सर्वोपचारेण पूजयेद्देवताः क्रमादिति ।

मांत्राः शुद्धरूपवाच्याधिष्ठिताः विद्याः स्त्रीरूपवाच्याधिष्ठिताः
अत एव विद्याशक्तेः सौभाग्यविद्यावर्णवाच्यायाः षट्त्रिंश
त्तत्वमयाः शुद्धिसत्वनीतपरविलक्षणा तद्रूपं प्राकाम्यं स
त्तितो सिद्धिं कामनानुरूपलक्षणां तदुक्तं महाकविभिः इवः
संज्ञातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः व्यक्तोऽव्यक्तेतरस्थासि
प्राकाम्यं तेविभूतिस्थिति एताः देवताः सर्वज्ञाद्याष्टकेऽपि सि
द्धिमुद्राः एताः क्रमात्प्रथमावरणदेवताः पञ्चाष्टकेऽपि
ततः सिद्धिमिति क्रमात्सर्वोपचारेण ज्ञानावेकत्वं सर्वोपचारैः
एतायेदित्यर्थः समस्तचक्रे एजं वासनामाह ॥

निरुद्ध्वाग्रुसंघट्टस्फुटितग्रंथिमूलतः हृद।
यांतरसविलिः स्वस्वपृष्ठकात्मना बीजरू।
पस्यरकलास्पृष्टवर्गोत्थमारतः रहस्ययोगि।
नी दैवि संसारदलनेज्वले सर्वरोगहरे च।
के यजेद्धाग्देवनाष्टकं म वशिन्याद्या इति

निरुद्धयोः परिश्लिष्टसैराचारयोर्वायोः प्राणापानयोः संघट्ट
न ऊर्ध्वमाक्रंच व्यक्तशः प्राणापानौ संयोज्येत्यभिप्रायकवचनो।
करीत्या मूलाद्युत्थितायाः कुंडलिन्यास्ततो हृदयपद्मांतः स्फुरं
तीं संविद्ां कलामित्यभिप्रायकवचनो करीत्या हृदयांतरस्फुरंतं मा

यो॰
स्व॰टी॰
१०५
105

संवित्तेश्चिदात्मनःमितिस्थितिंचैचेतनंचेतनैंद्रियकर्मचजीवः
कलाचदेवेशि सूक्ष्मपर्यष्टकमिति स्वच्छंदसंग्रहोक्तरीत्या सू
क्ष्मपर्यष्टकानांसूक्ष्मतयानुल्लेखत्वात् शून्यमित्युच्यते तस्यां
तुरीकंपरमध्यसंस्थितमिति अनेनकापरंशरीरंविदष्टकरूपं
सूक्ष्मशरीरंशून्यपर्यष्टकं तदात्मनातद्रूपेणापन्नारसत्वसंगः
हृद्येयंमातृकादेवीवीजयोन्यात्मनास्थितेति पराप्येवाशि
कोक्तरीत्या वीजरूपाआदिस्वराअकारादिविसर्गांतःषोडश
स्वराःकलास्ताभिः सृष्टाअवर्गेणगुप्तावर्गाःकचटतपयशा
ल्यास्तेषामनुसारः अवर्गःप्रथमोदेविवशिनीत्वसंस्थितेत्यादि
रीत्यास्वस्ववर्गवाङ्मूर्धेत्वष्टमंरेफमित्यादि चतुःषष्टीषा
स्तोक्त स्वस्ववीजानुसारतःक्रमात् स्वस्ववर्गेतिस्वस्ववीज
मुच्चार्यपूजयेदित्यर्थः नवचतुर्दशकोणादिषुएवोक्तचक्रे
षुदेवतानांश्रुतलिपिमातृकास्वरनवक्षहादि पंचकचटत
पवर्गमयत्वमुक्तं अष्टकोणादिदेवतानांकिमितिशिष्टव
र्गशाषसमयत्वंनोक्तमुच्यते चतुर्दशकोणादिचक्रेषुदेव
तानामकारादिश्रुतलिपिवर्गमयताकथनेनैवशिष्टवर्ग
शाषसमयत्वमष्टकोणदेवतावीजमंत्रोक्तमपिचवर्णांतस्थवीज
रूपस्वरकलास्पष्टवर्गानुसारतइति तत्त्वशिन्यादिदेवतापूजा
मंत्रकथनेनरहस्ययोगिनी सूक्ष्ममंत्ररहस्यंपर्यष्टकेनतेनसहयो
गःसंबंधःकार्यकारणलक्षणोयासांतावशिन्याद्यायोगिन्य

अत एव सर्वपापानित्याशुचिक्लेशरूपसंसाररोगस्य हरणा
त् सत्त्वतया पुष्टकमयत्वात्क्लोपनीयाः संसारदलनोज्ज्वले
अनित्याशुचिक्लेशरूपभेदः संसारस्य दलनेन हरणेनोज्ज्व
लेपरप्रकाशतावन्मात्रे अत एव सर्वरोगहरे चक्रे सर्वपापानि
त्याशुचिक्लेशरूपसंसाररोगस्य हरणे पटुः प्रभावशालिनि
समस्तचक्रे संस्थिता वशिन्याद्याः अवर्गः प्रथमो देवि वशिनी
तत्र संस्थितेति वत्तः शतीशास्तोकाः रजयेदित्र घंगः तासां।
ध्यानमाह

रक्तवर्णा वराभयमण्डिताः पुस्तकं च
मालाश्च दधानाः सिद्धियोगिनीरिति

सिद्धः परशिवस्तेन योगः संबंधः पूर्णाहंकात्मतया तस्य जीव
स्यजीवता पादनलक्षणस्तद्वतीः शिवं स्वं शुद्धविद्याविशु
द्धिं च तर्थसिद्धिं महेश्वरि ईश्वरीति पुरा सिद्धिं रजयेदिंद्रतर्पणे
रिति।

अर्हन्ते दंतयोरैक्यमिति विद्यानिगत इति

परापंचाशिकोक्तरीत्या शिवाद्वैतप्रख्यालक्षणायाः शुद्धविद्या
याः विशुद्धिः ज्ञानेन ज्ञानमालोक्य पश्चाज्ज्ञानं परित्यजेदिति व
चनप्रतिपादितरीत्या ज्ञातृज्ञानविभागस्य निर्विकल्पको

यो॰ यल्लक्षणपरशिवसमावेशलक्षरूपिणीं अतएवभुक्तिसिद्धिविश्व
हृ॰ दी॰ शिवादिभूम्यंतचमत्कारस्यात्मनस्य महीयसंमहाभोक्ते महेशाय
१९ निवेदयन्तिसम्भुक्तीकरोत्या महाभुक्तिर्विश्वविषयाणीष।
106 साधकस्यसिध्यति तांचेश्वरींसमस्तचक्रेश्वरींत्रिपुरांसिद्धिमात्र
मानमेयरूपिणीं त्रिपुराणामुत्तीर्णांशिवालयलक्षणांसिद्धिं
विंदुस्वरूपिणीः सातत्त्वक्रमैः स्वैः पूजयेदिति अष्टमचक्रेश्वरीः स्वां स
वासनामाह।

शक्तित्रयात्मिकादेवि विद्यामप्रसरः परः संव
र्तीत्रिकलारूपाः परमातिरहस्यगाः शर्णाशर्णास्व
रूपायाः सिद्धिहेतुरुपेश्वरि सर्वसिद्धिमयाख्ये
नवचक्रेनाथपंचभूषिते स्थिताः कामेश्वरीरवीश्व
नसः पीठदेवता इति

शक्तित्रयात्मिका इच्छाज्ञानक्रियात्मिका विद्यामप्रसराः विदः सं
विदः अंबिकादीक्षादियाग्राकिरणानांवामाज्येष्ठारौद्र्यात्मि।
कानामुद्ग्रीशाद्यधीव सिद्धचार्यानप्रसराः स्वंदृभूताः सर्वावरण
प्रधानभूतत्वात् संवर्तास्त्रिकलारूपाः संवर्तास्त्रिविन्दवः स्मरः पर
शिवेश्वरः तस्यकलाहकारस्वरूपाः तदात्मिकाः शांताशक्त्याव्य
वभूतत्वात् परमातिरहस्यगाः परमः सर्वावरणदेवताभ्यः सर्वा
वरणप्रधानरूपत्वात् अतिरहस्यामनोज्ञह्स्वकारायामत्रयपरि
स्फुरत्सरविदाधारभूतत्वात् संतगोपनीयाः शर्णाशर्णास्वरूपायाः

हृणीतत्वमत्र विश्वविषया सिद्धिस्ताहणाः सिद्धिहेतुः तदा
त्मिकायाः सर्वस्य त्रित्वादि शिवांतस्य परशिवविश्रांतिल।
क्षणायाः सिद्धिर्जीवन्मुक्तिहेतुस्तया सर्वसिद्धिमयात्मनि रू
कसर्वसिद्धिमयनाम्नि आयुधभूषिते कामेकामेश्वरयोः आ
युधैः शरचापपाशांकुशैरष्टभिर्मिथुनीकृतैः पश्चिमोत्तम।
पौरस्त्यदक्षिणाशाक्रमेण विसादि चतुःशतीशास्त्रोक्तरीत्या
लंकृते तेन आयुधानां कामेश्वर्याकारणांतःपातित्वात् सि
द्धिचक्रे ष्टमे स्थिताः कामेश्वरीस्वीः कामेश्वरीमध्यकोणश्री
मादि चतुःशतीशास्त्रोक्तास्तत्तत्पीठदेवता पीठानिका
रुजाद्विक्रमादि तिस्रो वीकानि मनोबुद्ध्यहंकारचित्तलक्ष।
णानि तेषु संक्रांता देवताः परप्रकाशावयवभूताः वामज्येष्ठा
रौद्र्यंबिकाभिरीशषषोडशउड्डीशचर्यानाथशिवांकस्याः उद्गु
नयशास्त्रावयवभूते ज्ञानक्रियाशांतामयकामेश्वरीवज्रेश्वरी
भगमालिनी महात्रिपुरसुंदर्यस्तत्तत्त इति नवचक्रदेवतया
सहसंकलनादष्टमचक्रे तत्तत्स्वरूपकामेश्वर्याद्याः साधुयाः

आयुधदेवतानां ध्यानमाह

आयुधाग्रधिरक्ताभाः साधुधोज्ज्वलमस्तकाः
वराभयहस्ता स्वस्वध्यानफलप्रदाः तदी
यायुधमहीवायुधसौवर्णाविधायिन इति।

यो॰ हृ॰ टी॰ १७ 107

आद्यया आद्ययादिदेवताः क्लींदमन्त्रान्तेलिंगप्रयोगा स्वाद्य
योज्ज्वलमस्तकाः स्वाधिष्ठिताद्यपरिकल्पितमस्तकाः महा
पद्मवनांतःस्थांकारणानंदविग्रहां मंदकोपाश्रयांदेवीमि
च्छाकामफलप्रदां भवतीमितिप्रवीणकरीत्या महापद्मवनां
तःस्थानाश्रितेस्वरस्यविस्वगुरोर्मिमार्कास्यायात्रनाश्रितक
लायास्तवसंवेधिनोबाणा यन्त्रः पाशांकुशाः स्त्रीवश्यविधा।
यिनःस्मर्थ्यः तदुक्तंचतन्त्रःशक्तीशास्त्रे मादनैमदनोभूत्वापा।
शांकुशयन्त्रःशरैः क्षोभयेत्स्वर्गभूलोकपातालतलयोषि
तः तथैवशास्त्रे देवेशि त्रिपुरीकृतविग्रहः क्षोभयेद्देवगंध
र्वसिद्धविद्याधरानपि इतिसाष्टमस्यात् एवंचतन्त्रःशक्तीशास्त्रे
नोक्तनवाक्षकिवीजान्यहरति

त्वगादष्ठमस्मेरोल्लिमज्ञाणांमः स्मेरेपरि द्वि
तीयस्वरसंयुक्तापंचबाणास्त्वदीयकाः इति

श्रीकंठादिन्यासपरिपाटीत्वगादीनांपंचानांधातूनांयवर्णाद
यः पंचपंक्ते द्वितीयस्वरसंयुक्ताबाणा अकारो द्वितीयःस्वरः
सामर्थ्याद्विंदुरपिलभ्यते त्वदीयबाणास्तवसंवेधिनोबाणा।
वीजानि तत्र यकारस्त्वगात्मको रेफोसृगात्मकः लकारो मांसा
त्मकः वकारो मेदःस्वरूपः अस्थिमज्जाशश्चोस्थिमज्जयोरुपरि
स्थितेन शुक्रात्मकेन मकारेणापीति तन्त्रःशक्तीशास्त्रेप्युक्तं।

नां कामेश्वरबाणबीजानामादौ यदौ वेरणावौ संपुटे श्रीलर
क्रयोरित्यादिना स्वच्छंदसंग्रहोक्तत्वादागमांतरेषु प्रसिद्धत्वाच्च
ग्रंथोहारः क्रियते

वामादीनां गुणानां तु जननी त्रिपुरांबिका पर
स्यां तस्य रूपत्वादिच्छासिद्धिर्महेश्वरि एताः स
वैंपचारेण पूजयेत्तु वरानन इति

वामादीनां वामज्येष्ठारौद्र्याख्यानां मित्रेशादिरूपाणां गुणाना।
मिच्छाज्ञानक्रियामयविमर्शरूपाणां कामेश्वर्याद्यधिष्ठान
त्वात् पुरशब्दवाच्यत्वं तेषां त्रिपुराणां जननी सैव चिद्रूपत्वा देवि
काशकत्वेन त्रिपुरांबिका निरुक्ता चक्रेश्यीत्यर्थः स्वेच्छयैव ज
गत्सर्वं निगिरन्त्युद्गिरन्त्यपीत्याशावतारोकरीमा परस्य शिवस्य
विश्वसर्जनसंहारलक्षणस्वातंत्र्यलक्षणेच्छासिद्धिरेतदेवेक
स्यसिद्धेति अतस्तस्य मिच्छासिद्धिरस्मिंश्चक्रे स्थितेत्यर्थः प
ताश्चावृतदेवताः कामेश्वर्याद्याः चक्रेशीसिद्धियुताः सर्वोप।
चारैर्गंधादिभिः पूजयेत् नवमचक्रस्य संज्ञां सवासनामाह

सर्वानंदमये देवि परब्रह्मात्मके परे चक्रेऽस
चितिरूपा च महात्रिपुरसुंदरी सैवावारेण सं
[illegible]त्नवहते दे[illegible]ः समा महाकामकलारूपेति

यो. आनंदोब्रह्मेति व्यजानादित्येतस्यैवानंदस्यवान्यान्यानंदा
हृ. दी. निमात्रामुपजीवयंतीतिश्रुतत्वात्सर्वानंदसमष्टिभूतपरा
१०८ नंदमयत्वात् परब्रह्मात्मकत्वेपव परविश्वोत्तीर्णपरशिव
108 स्पंदमयत्वाच्चक्रेनवमे संविन्निरूपणा संवित्त्रिपुरादेवी लोहि।
त्यंतविमर्शनमित्यभियुक्तोक्तरीत्या वेदकवेद्ययोरहंतेदंत
योः समरसमध्यस्यासंवित्तिर्महात्रिपुरसुंदरी सर्वोक्तनिर्वच।
ना महाकामकलारूपाप्रकाशविमर्शसामरस्यरूपा विंदुत्रय
मयहार्धकला तद्रूपा विंदुसंकल्पवक्रेत्यादि वचनःशातीशा
स्त्रोक्तरीत्या स्वैराचारेणसहजा यत्रयत्रमनस्तुष्टिर्मनस्तत्रैव
धारयेत् तत्रतत्रपरानंदस्वरूपंसंप्रकाशते इतिविज्ञानभै
रवभट्टारकोक्तरीत्या निजेच्छानुरूपैरिंद्रियप्रीणनैर्द्रव्यैः प
रिष्कारपरमानंदानुसंधानलक्षणेनस्वैराचारेणस्वसंविद्दे
वताभावनीयेत्यर्थः प्राप्तिसिद्धिमाह ॥

पीठविद्यादिसिद्धिदा महामुद्रामयी देवी सृष्टेति

का एजाते इति क्रमादितिपूर्वोक्ताः पीठाश्चत्वारः विद्यावाग्भ
वकामराजशक्तितृतीयवीजात्मकाआदिशब्दोदेवताः कामेश्व
र्याद्याश्चतस्रः तेषांतर्यातीतपदपरशिवविश्रांतिलयलक्ष
णांसिद्धिंददातिप्रापयतीति प्राप्तसिद्धिः महामुद्रामयी म

द्रामुद्रा सर्वमुद्रा समष्टिभूता तथा योनिमुद्रा तन्मयेष्टेत्यर्थः

पंचदशात्मिका तत्तत्तिथिमयी नित्या नवमी भैर
वी परेति

पंचदशात्मिका पंचदशाक्षरी विद्या या वाग्भूता पंचदशाक्षर
गुणात्मिका तत्तत्तिथिमयी प्रतिपदादिपंचदशपदरूपा नित्या
निजस्वरूपमयनित्यानिरूपमाकारा परा नवमी भैरवी परा मूल
विद्यामुख्यार्थे नवमचक्रेश्वरी विद्याया षोडशकलात्मिकामू
लदेवी नवमचक्रेश्वरीं संपूजेत्यर्थः

प्रतिचक्रं तन्मुद्रां स्वचक्रसंकेतचोदिता इति

प्रतिचक्रं त्रैलोक्यमोहनादिष्वेकैकस्मिंश्चक्रे चक्रसंकेतचोदिताः
योनिः प्रादुर्भूतः सैषा सर्वसंक्षोभिका पुनरित्यादिना चक्रसंके
तचक्रे विहिताः सर्वमुद्राः सर्वसंक्षोभिण्याद्याः तत्तच्चक्रे प्रदर्श्या
इति योऽर्थम्

नित्याक्लिन्नादिकाश्चैव काम्यकर्मानुसारतः च
तुरस्रांतराले वा त्रिकोणे वा यजेत्सुधीरिति

कामेश्वरीभगमालिन्योरावरणांतःपातित्वान्मध्यत्रिकोणाग्र
वामकोणयोः स्थितिरुक्ता शिष्टा नित्याक्लिन्ना भेरुण्डा वह्निवा।

यो. सितोमहाविद्येश्वरीहृतीत्वरिताकुलसुन्दरी नित्यानीलपता
हृ. टी. काविजयासर्वमंगला ज्वालामालिनी चित्राचेति चतुःश।
१०९ ष्टीशास्त्रोक्ता स्वयोदशनित्यास्त्रिकोणेवाश्रीचक्रमध्यत्रिकोणे
109 वावन्तरश्चान्तरालेवाकाम्यकर्मानुसारतः वश्यादिकाम्यक
र्मानुरूपवर्णध्यानपूजादिभिः स्वयोक्तकाम्यकर्मविधान
विषयत्वःचक्रपूजामुपसंहरन् कुलदीपनिवेदनमाह

अलिनापिशितैर्गन्धैर्धूपैस्तास्ताश्च देवताः च
क्रपूजां विधायैवं कुलदीपं निवेदयेत् अन्त
र्बहिर्भासमानं स्वप्रकाशोज्ज्वलं प्रियेऽइति

अलिनाहेतुपिशितरूपगन्धधूपशब्दाः स्पष्टार्थाः देवतास्त्रैलोक्य
मोहनादिवेन्द्वान्तचक्रगताः अलिपिशितगन्धधूपैस्तास्ता
स्य सर्वीकरीत्या चक्रपूजां विधाय कुलदीपं कुलं षट्त्रिंशत्
त्वसमुदायरूपं शरीरं तत्र दीपं ततो हृदयपद्मान्तःस्फुरन्तीं सं
विदं कलामिममभिमुखीकृत्य हृदयान्तर्भासमानं संवि
त्कलारूपं दीपं तमेवेन्द्रियद्वारा बहिरर्थेषु तद्रूपेणातएव स्वप्र
काशोज्ज्वलं तत्र प्रमाणनिरपेक्षप्रतीतिकं निर्वाणरहितं च नि
वेदयेत् पुनः प्रसमस्त्वतयातेनैवद्वारेणातः स्वसंविद्विश्रान्ति
तन्निवेदनाम्

पुष्पाञ्जलिं ततः कृत्वा जपं कुर्यात्समाहितः सं

यमेन्द्रियसंचारं प्रोच्चरन्नादसान्तरे एषएव
जपः प्रोक्तो न तु वाह्यजपो जप इति

प्रमाणवचनोक्तरीत्या समाहितो नियतेन्द्रियो नादरूपमेतं
स्मारलक्षणजपं कुर्यात् प्रत्यहं सहस्रम् जपप्रकारमाह ।

कूटत्रये महादेवि कुंडलीचिंतयेत्प्रिये चक्रा
णि एवं एवैषां नादरूपेणयोजनमिति

कूटत्रये कूटानां वाग्भवकामराजशक्तिबीजाख्यानां त्रयी कुं
डली चिंतयेत्प्रिये चकुंडलीत्रयमाधारे तत्राधारं वह्निबिंदुस्थानं
वपरिकीर्तितमिति स्वच्छंदसंग्रहोक्तेषु आधारहृदयब्रह्म
ध्रेषु स्थितानां वीजत्रयशिखरवर्तिकामकलांतर्गतमध्य।
रार्धकलारूपाणां वह्निसूर्यसोमकुंडलीनां त्रयेचक्राणां एवं
एवैषां अकुलेविष्णुसंतेवेत्सत्रोकाकलादिविंदुतस्थानेषु
नवस्वभावितानां त्रैलोक्यमोहनादिनवचक्राणामेकैकस्मि
न्वीजे कुंडलिन्यांच त्रिशस्त्रिशो विभज्य योजितानां नादरूपे
णयोजनं त्रैलोक्यमोहनादि नवचक्रादित्रयस्याधारस्थवह्नि
स्थितवाग्भवशिखरवर्तिकामकलांतर्गतहार्धकलारूपव
ह्निकुंडलिमध्यानोदितहृत्स्थकामराजवीजपर्यंतव्यापिना

यो॰
सु॰ टी॰
११०
110

दमयनाभावनवाग्भवबीजजपः सौभाग्यदायकादिचक्र
त्रयस्यहृदयस्थितसूर्यमंडलांतर्गत कामराजशिखरव
र्तिकामकलांतर्गत हार्धकलारूपसूर्यकुंडलिनीस्थानो
दितबिंदुस्थानगतशक्तिबीजपर्यंतव्यापिनादमयनाभाव
नाकामराजबीजजपः सर्वरोगहरादिचक्रत्रयस्यबिंदुस्थानें
दुमंडलांतर्गत शक्तिबीजशिखरवर्तिकामकलांतर्गत हा
र्धकलारूपसोमकुंडलिनीस्थानोदितब्रह्मरंध्रोपरिस्थित।
शिवतत्वातीत समनासीमपर्यंतव्यापिनानादेनमहोन्म
न्यांलयभावनेशक्तिबीजोच्चारइत्यर्थः तदुक्तमभियुक्तैः
पिंडेवान्यदविस्तस्यमहतः संस्कारशेषास्थितिर्नादोसौ
तवदेवितन्मूर्धिसमनासीमानमुद्दृंहयत्न् येदाक्राणइतिव
क्रमेणविरमंत्रेयामणीयस्तनीमाजिघ्रन्मविविदशाम
नुपमांनृतिपुरंध्रीमसेत्यैवेवोक्रम् तत्रुदीपाकारोर्धमा
त्रस्थललाटेहृतरध्यातरस्मादि त्रिषष्ठिपिबीजेषुउन्मनीपर्यं।
तउच्चारःकिमितिनोक्तःप्राणादीनुन्मन्यंतानां द्वादशा।
नांसर्वेत्रसाधारण्येनवक्ष्यमाणत्वादित्यतस्त्राह ॥

तेषु प्राणाग्निमायाशक्तिकला बिंदुर्धचंद्रकाः
रोधिनीनादनादांताः शक्तिर्व्यापिकयान्विता
समनाचोन्मनाचेति द्वादशांते स्थिताप्रिये

मूलकुंडलिनीरूपेमध्यमेवततःपुनः सृष्टि
र्मुखेचविश्वस्यस्थितिरूपेनत्वेषणि केवल
नादरूपेणउत्तरोत्तरयोजनं शबलाकार।
केदेविलसतीयेद्वादशकलेति ।

तेषुत्रिष्वपिवीजेषु अंतेप्राणोहकारः अग्नीरेफःमायाणिमी
कारःसएवकला तदुक्तंकामकलाविलासे विंदुरहंकारात्मा
रविरेतन्मिथुनसमरसाकारः कामःकमनीयतयाकला।
चदहनेंदुविंदुविग्रहो विंदुरिति विंद्वादयोनवोन्मन्यंतः
एवंकलात्मना पत्ने प्राणादयउन्मन्यंताः द्वादशस्थितामू
लकुंडलिनीरूपवाग्भववीजे याभासावसौलतातत्तुलस
त्तेतस्थितिस्पर्धिनीवाग्वीजेप्रथमेस्थितातत्वसदातांमन्महे
तेवयं शक्तिःकुंडलनीतिविश्वजननव्यापारवद्धोद्यमाना।
त्वेत्यंनपुनस्पृशंतिजननीगर्भेर्भकत्वंनराइति लघुस्तोत्रो
क्तरीत्या विश्वस्यसृष्टिमुखेमध्यमेकामराजवीजेविश्वस्यस्थिति
रूपेसंहारस्थेषामध्यस्थत्वात् केवलनादरूपेणनादाद्युन्मन्यंता
वयवोच्चारवर्जनाद्रूपेणोत्तरोत्तरयोजनं उच्चारक्रियाविशे
षणंवाग्भववीजशिखरवर्तिनंनादंस्पृशत्कामराजवीजपर्यं
तमुच्चरन् कामराजवीजशिखरवर्तिनंनादंविंदुस्थानगतश
क्तिवीजपर्यंतमुच्चरन् इत्यर्थः शाकलाकारकेपतद्वीजद्वयनाद

यो. ह्रययोगादिभिश्च उपलक्षितोये शक्तिबीजे द्वादशीकलोन्मनी स्थि
ह.टी. तेत्युक्तः तेन प्राणादयो द्वादशकला अपि लक्षितीयबीजशिखरे
१११ स्थिता उच्चार्या इति लभ्यते कोर्थः यद्यपि वाग्भवकामराजशक्ति
बीजानां त्रयाणाम् अध्ये ते प्राणाग्निमाया बिंदुअर्धचंद्ररोधिनी नादना
दांतशक्तिव्यापिका समनोन्मन्या महाद्वादशकलावर्त्तंते शक्ते
स्तथापि वाग्भवकामराजयोः प्राणादयउन्मन्यंता लक्ष्यापिता।
योः सृष्टिस्थितिरूपत्वात्तत्र विद्यातीतोन्मनीपर्यंत उच्चारः अ
तोपि न विरोध इत्यर्थः जपकाले भावनामाह ॥

मूलं शक्तस्वरेशानि श्रवस्यापंचवक्रेगुनः वि
श्वत्समरूपं भावयन्मनसा जपेदिति

एतानि विद्यावयवेषु भाव्यानि शिखिपत्रविश्वरूपे मंडलेः मू
लापंचवक्रे ध्यायतोऽन्तरे शून्यं परं व्योम तत्र मेव देदिति विज्ञानभै
रवमहाशेकरीत्या मूलषट्कस्वरूपं तेय श्रवस्यापंचवक्रे जाग्रत्स्व
प्नसुषुप्तितुर्यातत्स्यात्मकं जाग्रदादीनां स्वरूपं वस्पति विश्वव
त्समरूपं वक्ष्यति शून्यानां स्थानानि स्वरूपाणि क्रमेणाह

अग्न्यादिद्वादशांतेषु शीर्षस्थकावसाने तु मू
लत्रयं विजानीयादेकैकांतरतः प्रिय इति

एकैकस्य द्वयोर्द्वयोरंतर इत्यर्थः अग्न्यादिः अग्रेरेफः तदादि
शीक्षीन् षट् सकाशून्यत्रयेषट् शून्यानि विजानीयात् कोर्थः
हकारमायान्तरयोर्मध्ये रेफमायायोर्विंदूयोर्मध्ये विंदुमर्धचंद्र
नादयोर्मध्ये रोहिणीनादशक्त्योर्मध्ये नादांतेशक्तिसमन्वयोर्मध्ये
व्यापिकासमनोर्ये उन्मनामितिषट् सकारान्तरेफविंदुरोहिणी
नादाश्शून्यापिकाख्यानेषु पंचमहाशिखिपदानीति चित्ररूपेणिमादि
एवोंकरीमायावह्निर्विंहंगानंचंद्रकलादशरूपाणि पंचशून्यानि भा
वनीयानीत्यर्थः षष्ठोन्मनाख्यानेन पंचव्योमतत्त्वंभावयेदिति वि
ज्ञानभैरवमहारकोकरीमेव व्योमतत्त्वःशून्यंज्ञेयमितिसम्प्रदा
यः ॥

शून्यत्रयान्तरेस्थानेमहाशून्येविभावयेदिति

परेस्थानेमहाशून्यंनिराकारंभावयेदित्यर्थः इदानीमवस्था
पंचकभावानांक्रमोपरिवर्तनादौजागरितावस्थाभावना
माह।

प्रबोधकारणस्याथजागरत्वेनभावनं वक्ष्ये
देविमहाजाग्रदवस्थामिंद्रियद्वयैरिति

इंद्रियद्वयैर्ज्ञानकर्मेंद्रियैर्दशभिः जाग्रद्व्यवहारः जागरणं प्र
बोधजाग्रदुच्यते तत्कारणस्यप्रकाशस्यजागरत्वेनभावनं

अन्तःप्रकाशके वह्नौ तार्तीयबीजवर्तिनि रेफे महाजाग्रदेव।
स्या सर्वकालिकनिद्राक्षयलक्षणपरप्रबोधदशा भावनीये
त्यर्थः स्वप्नभावनामाह

अंतैःकरणैरेव स्वप्नो मायावबोधनः गलदेशे इति

बाह्येंद्रियविरतैरंतैःकरणैर्मनोबुद्ध्यहंकारचित्ताख्यैरेव
व्यवहारः प्रमातुः स्वप्नः स्वमायया तार्तीयस्थाने च तत्थस्वरे।
णावगतो बोधनस्तद्वाच्य इत्यर्थः गलदेशस्वप्नस्थाने सुषु
प्तिभावनामाह

सुषुप्तिर्लक्षणी एवं संवेदनं अंतःकरणाद्
लीनालयतो विषयस्य तु सर्वार्णानां विलोमे
नभ्रमध्ये विरसस्थितेति

स्वप्ने विद्यमानानामंतः
करणवृत्तीनां लयतः सर्वेंद्रियोपरतिः सुषुप्तिरिति लक्षण
अतो हि लीन सर्वस्य देहादिषु क्रोडीकृतस्य तस्य लीनस्यैव स्थि
तस्य स्वस्यात्मनो वेदनं प्रकाशनं भवति सुखमहमस्वाप्समि
ति हि पश्चात्स्वमयं स्वात्मरूपपरामर्शनेन मेयं सुषुप्तिः विष
यस्य तु विषयतार्तीयं बीजं विश्वव्याप्तिस्थानत्वात् तस्य सर्वा
र्णानां विलोमेन मायाबीजं महेशानि मादनं चक्रसंयुतं इंदुबी
नेकेवलं तत इत्यादि संहारक्रमयोगेन शक्तिबीजं समुद्धरेत्

ऽस्यं चतः शान्तीशान्तोत्त संहारक्रमोद्भूतानां शक्तिबीजवर्णा
नां विलोमक्रमेण परिपास भ्रूमध्ये विंदुमस्थिताभ्रूमध्यस्थान
स्थितत्वहे रवोर्ध्वविंदौ स्थिता भावनीयेत्यर्थः तुरीयभावनामा
ह ॥

तुर्यरूपं तस्य चाव्यक्तनादेश्च संग्रहः चैत
न्याभिव्यक्तिहेतोश्च नादरूपस्य वेदनमिति

चैतन्यसंविदात्मकेः परामर्शस्य हेतोः नादरूपस्य सर्वोकलत्व
णस्य वेदनमभिव्यक्तिस्तुरीयरूपं तस्य तुरीयरूपस्याव्यक्तानीय
बीजे ह्नार्थादेः ह्नार्थमर्धचंद्रप्राविशाहाद्योविनीनादोशूस्य
ते तेषां संग्रहः तानीयबीजशिखरवत्सर्वेवद्योपि नीनादश्च
स्यात्म चैतन्याभिव्यक्तिकारणनादरूपेणात्मकं तुरीयभाव
नीयमित्यर्थः तुर्यातीतभावनामाह

तुर्यातीतं सुखस्थानं नादान्तादिस्थितं प्रिये ब्र
ह्मैव जपकाले तु परावस्थां स्मरेद्बुधः इति

तुर्यातीतं यतो वाचो निवर्तन्ते अप्राप्य मनसा सहाह आनंदो ब्रह्म
णो विद्वानित्युपनिषद्कृतीया मनोतीतपरानंदस्वरूपं सुख।
स्थानं नादान्तादिस्थितं विलोमक्रमेणैव सुखस्थानं स्थितं नादा।

यो. हृ. टी. ११३ 113

तशक्तिव्यापिकासमनोन्मनाख्यस्थितं तद्गतीतं भावनीयमि
त्यर्थः अत्रैव शक्तिबीजपदपंचानस्थानसंधानपुरःसरं विधान
प्रकरणावधाननिपुणः इदानीं मन्त्रविषुवभावनानां विव।
तत्रादौ प्राणविषुवभावनामाह ॥

योगः प्राणात्ममनसां विषुवं प्राणसंज्ञकमिति

प्राणस्य ककारात्मनः वायोरात्मनो यहूर्मनसश्च संयोगः प्रा
णविषुवमित्युच्यते तदुक्तं स्वैरतंत्रे शिवात्मप्राणमनसां संयो
गं प्राणकं विदुरिति मंत्रविषुवभावनामाह ॥

आधारोत्थितनादेन लीनं ब्रह्मात्मरूपकं संयो
गेन वियोगेन मंत्राणां नाम हृच्छरि अनाहताधा
रांतेन नादात्मविविचिंतनं विषुवमिति ।

आधारान्मूलाधारादुत्थितेन नादानुनादेन बिंद्वादिशिखरान्तनिमा
त्मरूपकमात्मनोस्पष्टरूपं संविदात्मकं लीनं नादेनैकरसीकृतं
ब्रह्मा मंत्राणानां वाग्भवकामराजशक्तिबीजानां वियोगेन स्वा
मरूपेण संयोगेन तुरीयबीजेन च वा नाहताभ्याधारांतो अनाहतं
हृदयस्थानं आधाराणां सर्वेषामेतत्स्थानं ब्रह्मरंध्रं तत्पर्यंतं मं।

शांतः षड्लक्षणोच्चारितः अनाहताद्याधारांतमिति यावत्
नादात्मत्वविचिंतनेनादस्य षड्रूपत्वविभावनेविषुवंमंत्रसं
ज्ञकमितिशेषः कोर्थः मूलाधारस्थितवाग्भवशिखरवर्तिनं
नादंहृदयपर्यंतमुच्चार्य तत्रस्वयंलीनोद्भूतात्मतयाउसं
धानंमंत्रविषुवमित्यर्थः तदुक्तंशैववतंत्रे आत्मनोनादमध्येन
लयंसंचिंत्यमंत्रतः अकारोकारवर्णादिसंयोगेनवियोगतः
हृदयादिविलीनेचविषुवंमंत्रसंज्ञकमिति नाडीविषुवभाव
नामाह ॥

नादसंस्पर्शान्नाडीविषुवमुच्यते द्वादश
ग्रंथिभेदेनवर्णान्नाडीनेरधियेइति

वर्णाद्बीजत्रयशिखरवर्तिकामकलातरात् द्वादशग्रंथिभेदेन
मूलादिषट्चक्रग्रंथीभिर्भित्वा तेननाडीतेरसुषुम्नामध्यमार्गेण
नादसंस्पर्शात्त्रिबीजशिखरवर्तिनोनादस्य मूलाद्ब्रह्मरंध्रांतमु
च्चारतःसंस्पर्शेनाडीविषुवमुच्यते तदुक्तंशैववतंत्रे स्थूलमंत्रवि
स्थूलेनभित्वाग्रंथीस्तुक्रमात् नादनाडीसमायोगान्नाडीविषु
वभावनमिति प्राशांतविषुवभावनामाह ॥

नादयोगःप्रशांतस्तत्स्थानेदिग्योगोपरं वह्नि
मायाचकालचेतनामपूर्वकं रोहिणीनाद

यो० सू० टी० ११४ 114

नादांतं शक्तौ लीनं विभावयेदिति ॥

वह्निं रेफं मायामीकारं कालं तन्मध्यवर्तीमध्यपदार्थकलासंबंधि
रेखाग्रे चेतना बिंदुः वेद्यस्य संस्कारः वेदनरूपत्वात् तदुक्तं पर
पंचशिखायां बिंदुर्वेद्यस्य संस्कारः विसर्गः सर्गमिश्रस्यावित्ति
अर्धचंद्ररोधिनीनादनादांताः पूर्वोक्तलक्षणाः शक्तौ पूर्वोक्तल
क्षणायां लीनं विभावयेत् यतोयं प्रशांतो नादयोगाय पूर्वल
दतीतशक्तिलयलक्षणः अतः प्रशांतेंद्रियगोचरं सकलेंद्रि
यातीतविषयं तत्प्रशांतविभुत्वमित्यनुबंधः तदुक्तं शैवतंत्रे
अकारोकारवर्णौ च मकारं बिंदुमेव च नादनादांतसंज्ञौ क्रम
काब्रह्मादिभिः क्रमात् सप्तमे शक्तिमध्ये तु शिखान्तमानं वि
चिंतयेत् प्रशांतं तद्विजानीयात् प्रशांतेंद्रियगोचरमिति शक्ति
कालविभुर्यो भावनामाह ॥

विभुत्वं शक्तिसंतेवतदूर्ध्वं नादचिंतने तदू
र्ध्वं कालविभुत्वमुन्मनांतमहेश्वरीति ।

तदूर्ध्वं शक्तेरूर्ध्वं समानांतेन नादस्य चिंतने शक्तिविभुत्वं तदूर्ध्वं
समानायाश्च ऊर्ध्वं नादकलाभानमिति स्वच्छंदसंग्रहोक्तरीत्या
कालातीतोन्मनांतेन नादस्य चिंतने कालविभुत्वं तदुक्तं मध्यग
तो नादः समानांतं प्रसर्पति तच्छक्तिः विभुत्वं प्रोक्तमुन्मन्या काल

सत्तितमिति ननुकिंयताकालेननादतत्त्वांशोदयंनीत्याह

मुनिवेदाष्टदशभिस्त्रुटिभिर्नादवेदनमिति

सव्येनेरसमासीनेयावत्स्पंदतिलोचनमितितस्यत्रिंशत्तमो
भागस्त्रुटिः परिकीर्तितः तस्याःसप्तशतांशास्त्रुटिरित्यभिधी
यते इतितंत्रांतरोक्तरीत्या निमेषस्यत्रिसहस्रतमोभागस्त्रुटिः
मुनयःसप्तवेद्रूपेकः अष्टादशांसंख्येपसिद्धतेनहकाराद्युत्क्रमं
नानंविद्यावयवानां सप्तदशाधिकाष्टदशोत्तरदशसहस्रत्रु
टिभिरुच्चारे अंत्यकलेविश्रांतेचेतन्योक्तरीत्याकृतेसतिनादसंवि
त्तेनतत्त्वसंवेदनमित्यर्थः तत्रविश्वभावनामाह

चैतन्यशक्तिरेतत्स्थविश्वंतत्त्वसंतकमिति

चैतन्यस्यस्वात्मतत्त्वस्यशक्तेःप्रकाशस्यैतत्तत्त्वविश्वंकोर्थः
उन्मनोर्ध्वनंतरोक्तसप्तावतटिभिर्नादलयान्तात्मानुसंधाने
तत्त्वविश्ववमित्यर्थः तदुक्तंशैवतंत्रे स्वाधिकारेयेयाप्तिविश्वे
तत्त्वसंतकमिति

परंस्थानंमहादेविविनिसर्गानंदसुंदरमिति

यो· परंस्फुरत्तं शकावस्थायां एवं कमसमविषुवकोलाहलातीतोस्थानं वि
स्व· टी· श्रविश्रान्तिभूमित्वात् निसर्गानंदं सर्वदा सर्वविषयानंदसमष्टि
११५ भूतः परानंदो निसर्गानंदः अत एवानित्यश्चिद्भर्गोमेदश्च
115 पंचपरिपंथिपराकरणपरत्वात् परानंदलक्षणपरप्रेमास्पदप
रशिवरूपिनिसर्गानंदरूपमित्यर्थः एवोक्तभावनायाः फलम्।

६॥

एवं चिंतयमानस्य जपकालेषु पार्वति सिद्ध
यः सकलास्तस्य सिद्ध्यंति तत्प्रसादत इति

एवं एवोक्तप्रकारेण जपकालेषु जपाः आत्मानं सकलं प्रोक्तं
रूपा एवोक्तरीत्या सकलनिष्कलकेवलनिष्कलरूपाश्चिवि।
याजपास्तेषां कालः दीपाकारोर्धमात्रेष्वमात्रिना एवोक्तवि
धावयवानामुच्चारणकालाः तेषु स्फुरत्षट्कादिविचिंतयमा
नस्य सकालाः सिद्धियो निमाया एवोक्ता स्वस्यसादतः सिद्ध
तिप्रकाशात्मनो मम विमर्शशक्तेरेतयि प्रसन्नया तत्रतत्रात्।
मार्गेण चैतन्यं अस्तेप्रभोरिति विज्ञानभैरवभट्टारकोक्तरी
त्या सर्वप्रत्ययमध्यतानुपगतायां तत्प्रसादात्स्वायत्ताभव
तीत्यर्थः

एवं कृताजपं देव्यावाम हस्ते निवेदयेदिति

एवमुक्ताभावनापुरःसरं शुक्लतर्पणं कृत्वा प्रकाशविमर्श
सामरस्यरूपायां वामहस्ते विश्वकवलीकाररूपे विमर्शम
ये निवेदयेत् पूजाविधिमुक्त्वा तर्पणविधिमाह

अनामाङ्गुष्ठयोगेन तर्पयेच्चक्रदेवता इति

अनामा शक्तिरङ्गुष्ठः शिवस्तद्योगेन मेलनेन शिवशक्तिमे
लापनमुद्रयेत्यर्थः चक्रदेवताः चक्रस्था आदिदेवतान्तनवचक्र
निवासिन्यः प्रकाशविमर्शसमीरसभूताः तेनाद्वैततर्पणैः स्व
हि स्वैः स्वैरमृतात्मभिः महाहन्ताकरोमीदं विश्वहृद्यवपुर्यरमि
ति अभिमुक्तोन्नत्यापरस्मिंस्तर्पयेद्भावयेदित्यर्थः तर्पणसाधना
निवद्यमाह ॥

हस्रैं हौं मन्त्रेणार्घ्यं देव्यै तद्विनिवेदयेदिति

शिवशक्तिमेलनमुद्रया समस्तहस्रैं हौं मन्त्रस्यैव निवेदमेव
तर्पणमिति भावः समस्तेनैवामहस्रजयेदित्याह

कौलिकाचारसंयुक्तैर्वीरैस्तत्सहपूजयेदिति

ततस्तत्तर्पणे हृद्यतया तत्संयुक्तैः कौलिकाद्दक्षिणादिस्रोत

स्तदीतितात्सर्वमाचारः गुरुभक्तिप्रशांतिश्च पूजाश्रद्धा तमा
हृतिरित्यादि स्वच्छंदसंग्रहादिशास्त्रे विहितस्तस्यैकैवीरैश्च
हृमित्रलयकर्त्रैवेत्तिदमः प्रतियोगिनरति परापंचाशिकोक्त
रीत्या भेदप्रतीतिसामरस्येदंनारियोरहमिरणेणगनेप्रलयप्र
तिपादनपरैः सहस्रजयेत नेत्राचारपरिग्रहैः प्रपंचप्रतशालि
भिः पशुभिः सहकर्मस्थैः नकुर्यात्सहभोजनमित्यादिवचनसि
द्धैः सहपूजयेदित्यर्थः नतुकस्मिंश्चिदत्रैकस्मिन्वारेकस्मिन्वादि
नेपूजाकार्येत्यतआह

शुक्लभेनतवारेणसौरेचपरमेश्वरि गुरोर्दिने
स्वनक्षत्रेचतर्दश्याष्टमीषुच चक्रपूजांविशेष
णयोगिनीनांसमाचरेदिति

नित्यसंपूजयेद्देवीमासानांसाहृतिक्रमादिति स्वच्छंदसंग्रहा
दिशास्त्रेषुप्रतिदिनंपूजाविहिता तथापिशुक्लभेनशुक्लनक्ष
त्रेणसहसौरवारेगुरुदयभावैदिनेस्वनक्षत्रेचचतुर्दश्यष्ट
मीषुतिथिषुचक्रपूजांचक्राण्यात्तिवैदवांतचक्रगतानांदेव
तानांपूजाविशेषेणसमाचरेत् नित्यपूजात्तुनभवति किंतु
नैमित्तिकतया श्रष्टाष्टकादियोगिनीगणेशैणनपुनः सा
पूजयेदित्यर्थः चक्रेष्टाष्टकयजनंकथंसंपूजनरत्याशंका
मपंतदविशेषपूजामेवनिरूपणोति ॥

चतुःषष्टिर्यतः कोट्यो योगिनीनां महौजसां
चक्रमेतत्समाश्रित्य संस्थिता वीरवंदिते अष्टा
ष्टकं तत्कर्तव्यविनाशाद्यविवर्जितमिति

त्रैलोक्यमोहनचक्रनिवासिनीनां ब्राह्म्यादीनामंशभूताः प्रत्ये
कमाद्याश्चतुःषष्टियोगिन्यस्तासां प्रत्येकमंशभूतानां कोटिको
टिसंख्याकानां महौजसां महाप्रभावशालिनीनां योगिनीनां त्रु
कलनागणनामित्यनन्ताश्चतुःषष्टिकोट्यो यतश्चक्रमेतत्समा
श्रित्य संस्थिता मध्यमभूगृहान्तः चतुःषष्टिकोटियोगिनीस
मष्टिभूतानामतोऽम्बादीनां महाष्टकानामष्टकविनाशाद्य
विवर्जितं सर्वविभववैकल्यहीनं यथा भवति तथा कर्तव्यमय
ष्टकपूजितक्रियायोगोभिप्रेतः ननु तासां पूजने किमायतं ममे
त्यत आह ॥

त्वमेव तासां रूपेण क्रीडसि विश्वमोहिनीति

प्रकाशात्मनो मम विश्वबोधकस्यांशभूता विमर्शरूपिणी त्व
मेव वैन्दवचक्रगता विश्वमोहिनी संसारितोपपादनकारि
णीता सां ब्राह्म्यादीनां मन्त्रोत्थादीनां च रूपेण क्रीडसि प्रकाशसती
भगवती परमार्थतो विमर्शरूपमेव हृद्विया नतु नर्तकीवेत्य
भिप्रायः तद्रूपेण परिणममेतत्स्वांशभूतयोगिनीया।

यो॰ जनेनत्वमेवश्रीणामीमर्थः नत्वमतिवत्सदेवागमार्थसर्वग
हृ॰ टी॰ म्यतंतेशोविलसजादिप्रवृत्तिः सा किंगुरुपदेशेनेत्याशंका
११७ ह॥

117

प्रत्ताव्यानकुलाचारमयश्रीगुरुपादुको यो
स्मिंशास्त्रे प्रवर्त्तेतंतंत्वं पीडयसिध्रुवमिति

स्वप्रकाशशिवमूर्त्तिरेकैकात्तद्विमर्शनत्त्वेरेकैकात्तयोः सामर
स्यवपुरिष्यते परापादुका परशिवात्मनो गुरोरिमभिधकरी।
सा त्रिविधा महश्रीगुरोः अविदिताकुलाचारे कुलकौलिकदर्श
ने तत्राचारः स्वच्छंदसंग्रहादिशास्त्रे विहितः तं गुरुमुखाद्वि
ज्ञाय योऽस्मिंशास्त्रे प्रवीणपरमहितपरदेवतायजनपरमार्थ
साधके प्रवर्त्तेत तत्त्वं कार्यावरणपरो भवेत् तं वसकसाधक
मोऽसमज्ञादिशोधणादिरूपेण पीडयसि शृणुमि ध्रुवं नात्र संशे
काश्चतोगुरुमुखादेवाखिलार्थावगम्यास्मिंशास्त्रे प्रवर्त्तितव्यं
अन्यथा निष्फलत्वादित्यर्थः

एवं नानाविधोऽहं कौलाचारपरस्त्वया श्राव।
यो धृणावलाकारं देवि तस्मै निवेदय तत्त्वथा
प्रसन्नाकारत्वेनैव परिभावयेदिति

वर्णरोहामतत्काशिन्तुलमाध्वरवर्णिनीतिसंबोधः एवमुक्त्वा।

कारेणज्ञात्वा गुरुमुखादेव कौलाचारपरः कौलिकाः सर्वे कल
त्राणास्तेषां विहिताः स्वच्छंदसंग्रहादि शास्त्रेष्वाचारः सदा तद
नुष्ठानपरः आवयोः प्रकाशविमर्शात्मनोः शबलाकारस्तथा।
शक्तिः शिवोऽहं भमानंदो मोक्ष उच्यते इत्यभियुक्तरीत्या सामर
स्यापादनरूपं तत्सर्वैकरीत्या शोधितममृतीकृतं मध्यं निवेद्य
वयोरित्येवयोऽनन्यथाप्रसराकारः तव विमर्शशक्तेः प्रथा
प्रस्पंदः तत्प्रसारः तद्रूपा आकारायाः सामावरणदेवतानां ता
स्तथाविधास्त्वमेव त्वदन्यतोऽपृथग्भूताः परिभावयेत् मूलोड
वंशक्तिचक्रं यत्तत्तन्मये तेनागतं तस्मिन्नेवाप्येयाग्निविलीनं
परिभावयेत् इत्यभियुक्तोक्त्या विमर्शशक्ते विलासभूताद्या
कारायास्ता आवरणदेवतास्ते च वो विलीना भावयेदित्यर्थः

तस्मिन्नंगविग्रहां देवीं गुरुरूपां विभावयेत् शे
षं गुरोः निवेद्यापि पश्चादात्मनि योजयेदिति

देवीं विमर्शरूपिणीं विद्यां तन्निहतानाशहीनलीलाविग्रहामि
च्छाविग्रहामित्यर्थः तामेव गुरुरूपां विभावयेत् तदेतत्स्वरूप
स्य गुरोः निवेद्य शेषं देवतागुरुनिवेदितं शेषमात्मनि योजयेत्
यावत्साधकस्तावन्मामसमरसीभवति तावच्छेषं समयसपर्यं नीते
त्यर्थः बलिनिवेदनमाह।

यो॰
हृ॰ दी॰
११८
118

योगिनीनां महादेवि बटुकायात्मरूपिणे क्षे
त्रपतये मह्यं बलिं कुर्वीत हृत्तनेति

योगिनीनां सर्वीकरीत्यामात्मानमेव मरीचीनामात्मारूपिणे
परमात्मस्वरूपिणे बटुकाय क्षेत्रपतये क्षेत्राणि शरीराणि
तेषां पति जीवात्मास्मै मह्यमहंताविषयाय हृत्तना हृत्स्थेन द्वि
तीयेन बलिं कुर्वीत श्वासद्वयनिरोधेन कुंडलिनीचयसर्जना
त् यज्जीवशिवयोरैक्यं तेनासावांनरोवहिरिमस्सडुकरीत्या
सहितीयहंसेचीकरणोल्लसिते मनसि स्वतएव प्राणापानयोः
संचारध्वंते निरस्ते शिवलक्षणे भेदे शिवोहमस्मीति संततो।
बलिरित्यर्थः ततः स्वैराचारपरः स्यादित्याह ॥

पिबन्निसेवमनवादन्स्वेच्छाचारपरः स्वयं स्व
देहे तदेतयोरैक्यं भावयन्विहरेत्सुखमिति

नित्यहृप्रसन्नदत्पिवेतु गुरुदेवतानिवेदितशेषं हृत्तं खादन्नु तच्छेषं
खादंश्वमन् तद्धृयमपतिसामरस्यं लभ्य स्वेच्छाचारपरः यत्रय
त्रमनस्तत्रीमन्तस्तत्रैव धारयन् तत्र तत्र परानंदस्वरूपं संप्रका
शत इति विज्ञानभैरवोक्ता स्वस्य यत्रेच्छा जायते तत्तदेव शास्त्र
विहितं यत्र यत्र स्वेच्छा न जायते तत्तदेव शास्त्रनिषिद्धमतः स्वेच्छा

नुकूलेपदार्थान्भावयेत्तत्प्रतिकूलपदार्थान्परित्यजेदित्यर्थः
अहंतेदंतयोरैक्यंभावयन् अहंताज्ञातृधर्मः इदंताज्ञेयधर्मः
तयोरैक्यंयत्रयत्रमिलितामरीचयइत्यादि पूर्वप्रतिपादितरी
त्याज्ञातृज्ञेयचैतन्ययोः समरसीकरणलक्षणंज्ञानंतदेवाह
मितिभावयन्सुखंविहरेत्परिहरणेज्ञानानंदोभवेदित्यर्थः
तदुक्तंविज्ञानभैरवभट्टारकैः जग्धिपानकृतोल्लासरसानंद
विजृम्भणात् भावयेद्भरितावस्थांमहानंदस्ततोभवेदिति परम

प्रकृतमुपसंहरति

एतत्कथितंदेविसंकेतत्रयमुत्तममिति

स्पष्टम् सर्वज्ञानोत्तमत्वादेतद्गोपनीयमित्यतआह ।

गोपनीयंप्रयत्नेनस्वगुह्यमिवसुव्रतइति

यथास्वगुह्यंयोनिंपरमगुह्येभ्योगोपयसिप्रयत्नेनतथैतद
पिसंकेतत्रयमनर्हेभ्योगोपनीयमित्यर्थः ननुकेनार्हेभ्योगो
पनीयमित्यतआह

ग्रंथकेनानलब्धेनानप्रकाश्यंत्वयानघइति

भक्तिहीनोन्यत्रासक्तः ततंत्रवरेषु विद्यामात्रपाठी ग्रंथकाः

यो. ज्ञानलब्धोर्विद्यासाधारणाकामनादरकादिर्विद्यावदज्ञापिता
सू. टी. नेसंपाद्यमितिमन्वानः तयोः द्वयोरपीदं रहस्यं तेन प्रकटीकर
११९ णीयमित्यर्थः विद्यतिक्रमणाद्भयायेन करणीयं तमत आह

119

अस्मायेन न दातव्यं नास्तिकानां महेश्वरीति

विध्यतिक्रमभयव्याप्यः नास्ति परलोक इति मन्वते ये बौद्धाद यस्ते नास्तिकाः न तत्रको विधिरित्यत आह ॥

एवं त्वयाहमाज्ञप्तो मदिच्छारूपयाम्भोरिति

अम्भोजगत्प्रवृत्तिनियमात्मभावशालिनि अतएव शिरहणविना शिवे मूलेनाम यामन विद्यत इति वतः पाती शास्त्रोकरीत्या त याविनाहं किमपि कर्तुं वक्तुं न समर्थः ``मदिच्छारूपया मा लिवेश्वरस्यागमशास्त्रवक्तुरिच्छारूपयानादिनिकलयाः अ ज्ञाप्तः प्रेरितो ज्ञानमेव प्रकाशनं प्रोक्तवानस्मि अतो भवदा नैव विधिरित्यर्थः अतस्तदतिक्रमे महाविघ्नं स्यादित्याह

अस्मायेन तयोरद्यात्स परेतो भविष्यति

अन्यायेनतत्त्वराज्ञाविधिप्रवृहत्त्वभुवकादिभोयतएतच्छ्रीन
दद्यात्स्यपरेतोभविष्यति एतत्परिज्ञानफलमाह ॥

संकेतंयोभिजानातियोगिनीनांभवेत्प्रियइति

एतत्संकेतत्रयंगुरुमुखादेवयोभिजानाति सयोगिनीनांयो
गः परशिवसमवायलक्षणः परिच्छिन्नरीविभूताः शक्तय
स्तासांप्रियः परमशिवत्वस्यानंतशक्तित्वात् तदुक्तंतंत्रां
तरे शक्तयोस्यजगत्सर्वंशक्तिमांस्तुमहेश्वरइति तत्त्वपर
शिवतादात्म्यैकःपुरुषार्थइत्याह ॥

सर्वेप्सितफलप्राप्तिःसर्वकाम्यफलप्रदइति

यतःसर्वेषांजनानांकाम्यानांकाम्यमानानांफलानामाश्रयः
परशिव अतःसर्वेषांयानीप्सितानिस्पृहणीयानिफलानि
तेषांप्राप्तिः परशिवतादात्म्यपरिज्ञानाद्भवति सएवपर
मपुरुषार्थइत्यर्थः तत्त्वप्रकोप्रदर्शयतइत्याह

यत्नोपिदर्शयतेदेवीति

यो. यतो यत्र क्वापि वहिरंतर्वा मनः रतिं तत्र तदनुभवरूपेणास्य।
वि. टी. वहृश्यते तस्य सर्वगतत्वात् तदुक्तं विज्ञानभैरवभट्टारकैः
१२० यत्र यत्र मनो याति वाह्ये वाभ्यंतरेपि वा तत्र तत्र शिवावस्था व्या
120 पकत्वात्क्व यास्यतीति तत्र तत्रात्ममार्गेणैवैतत्तत्त्वमस्ति तत्प्रमो
रिति ननु किं सर्वेणाप्येवं न दृश्यत इत्याह ॥

कथं विज्ञानं चिंतयेदिति शिवम्

सत्वं दृश्यनेन तथा न पश्यति तन्मां पश्यति कश्चनेन्द्रपति।
घटुकरीत्या प्रत्यक्षागोचरं देवलोकचाक्षिप्रमाक्षि
नम् दृष्ट्वा श्रुतिः शिरस्नानमनुरोदितिदुःखितः इति
तेजेनेरीकरीत्या दृश्यमानमप्युपदेशाद्दीनानपश्यं
ति निष्कलं तं शिवं तु ध्याइति निष्कलपरशिवतादा
त्म्यपरोक्षानुभवशाली गुरुकटाक्षवीक्षणानुदिनपा
शजालः परिस्फुरत्परमशिवाहंताविज्ञानः कथं न।
चिंतयेदिति सर्वत्र नमज्ञावकथं न पश्येदित्यर्थः

शिवेनाम्बरहस्यानादविसृष्टनयोदितम् तद्रूप
नाथवचनादिष्टं तेमोत्तमसत्तनत्

इतिश्रीमत्परमयोगीन्द्रपुण्यानंदशिष्यामृतानंदनाथपर
महंसयोगिप्रवरविरचितायांयोगिनीहृदयदीपिकायां
पूजासंकेतोनामतृतीयःसंकेतः ३ समाप्ताचेयंयोगिनी
हृदयटीकाशुभम्

